शास्त्रसंदेश-२८

# स्तोत्रसंदेशमाला

## अनेककर्तृकृतचतुर्विंशतय

२

मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-२८

# स्तोत्र संदेशमाला-२

अनेककर्तृकृतचतुर्विंशतय:

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્
વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી
પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના
શિષ્યરત્ન
પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,
આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૨

## अनेककर्तृकृतचतुर्विंशतयः

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૦ + ૩૯૧ + ૬

સ્તોત્ર : ૪૦૩ શ્લોક : ૨૭૯૨

: પ્રમાર્જના :

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

: છંદ-સંયોજન :

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

**આભાર...!        અનુમોદનીય...!    અનુકરણીય...!**

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧-૨-૩ ના દ્રવ્ય લાભાર્થી

*શ્રી સિદ્ધગિરિરાજની છત્રછાયામાં*
*વિ.સં. ૨૦૬૭ની સાલે જૈનશાસનશિરતાજ,*
*દીક્ષાયુગપ્રવર્તક, તપાગચ્છાધિરાજ, પૂજ્ય આચાર્યદેવ*
*શ્રીમદ્ **વિજય રામચંદ્રસૂરીશ્વરજી મહારાજાના** શિષ્યરત્ન*
*ગુરુગચ્છવિશ્વાસધામ, વર્ધમાનતપોનિધિ,*
***પૂ. આ. શ્રી વિજય ગુણયશસૂરીશ્વરજી** મહારાજાના શિષ્યરત્ન*
*પ્રવચનપ્રભાવક*
*પૂ. આ. શ્રી **વિજય કીર્તિયશસૂરીશ્વરજી મહારાજાની** નિશ્રામાં*
*કુળદીપિકા **પૂ. સા. શ્રી રાજનંદિતાશ્રીજી મ. સા.** ના સદુપદેશથી*
*ધાનેરા નિવાસી*

***માતુશ્રી ચંપાબેન જયંતિલાલ દાનસુંગભાઈ અજબાણી***
***ધાનેરા ડાયમંડ પરિવારે***

*૬૦ શ્રમણો, ૩૦૦ શ્રમણીઓ, ૧૭૦૦ જેટલા ચાતુર્માસ આરાધકો, ૧૦૬૦ જેટલા ઉપધાન તપના આરાધકો અને તેમાં ૫૮૫ જેટલા માળ આરાધકો આદિથી સભર ઐતિહાસિક ચાતુર્માસ તથા ઉપાધનતપનું આયોજન કર્યું હતું. એ દરમ્યાન થયેલી જ્ઞાનખાતાની વિશિષ્ટ ઉપજમાંથી સ્તોત્ર સંદેશમાલાના ભાગ-૧થી ૩ ના પ્રકાશનનો લાભ લેવામાં આવ્યો છે.*

***અમો એ સુકૃતની ભાવપૂર્વક અનુમોદના કરીએ છીએ.***

***શાસ્ત્રસંદેશ, સુરત***

*સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

***આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.***

---

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | स्तोत्र | कर्ता | पेज नं. |
|---|---|---|---|
| १ | चतुर्विंशतिजिनस्तोत्राणि | पू.आ.श्री ऋषिवर्धनसूरि | १थी२८ |
| २ | चतुर्विंशतिजिनस्तोत्राणि | पू.आ.श्री जयकेसरसूरि | २९थी१०० |
| ३ | चतुर्विंशतिजिनस्तोत्राणि | पू.आ.श्री हेमचन्द्रसूरि | १०१थी१२२ |
| ४ | चतुर्विंशतिजिनस्तोत्राणि | पू.आ.श्री समन्तभद्रसूरि | १२३थी१४८ |
| ५ | चतुर्विंशतिजिनस्तोत्राणि | पू.मु.श्री विनयहंसगणी | १४९थी१६७ |
| ६ | चतुर्विंशतिजिनस्तोत्राणि | पू.मु.श्री पुण्यशीलगणी | १६८थी१९७ |
| ७ | चतुर्विंशतिजिनस्तोत्राणि | पू.आ.श्री विजयदेवसूरिप्रशिष्य | १९८थी२१० |
| ८ | चतुर्विंशतिजिनस्तोत्राणि | पू.मु.श्री हेमविजयजी | २११थी२२८ |
| ९ | चतुर्विंशतिजिनस्तोत्राणि | पू.मु.श्री कीर्तिमेरुविजय | २२९थी२४५ |
| १० | चतुर्विंशतिजिनस्तोत्राणि | – | २४६थी२६७ |
| ११ | चतुर्विंशतिजिनस्तोत्राणि | पू.आ.श्री मुनिसुन्दरसूरि | २६८थी३०० |
| १२ | चतुर्विंशतिजिनस्तोत्राणि | पू.आ.श्री रामचन्द्रसूरि | ३०१थी३०७ |
| १३ | चतुर्विंशतिजिनस्तोत्राणि | पू.आ.श्री जिनवल्लभसूरि | ३०८थी३२३ |
| १४ | चतुर्विंशतिजिनस्तोत्राणि | पू.आ.श्री देवभद्रसूरि | ३२४थी३४३ |
| १५ | चैत्यवन्दनचतुर्विंशतिका | पू.आ.श्री शीलरत्नसूरि | ३४४थी३६२ |
| १६ | चैत्यवन्दनचतुर्विंशतिका | पू.उपा.श्री क्षमाकल्याणगणी | ३६३थी३७७ |
| १७ | चैत्यवन्दनचतुर्विंशतिका | पू.उपा.श्री मुक्तिविमलगणी | ३७८थी३९१ |

पू.आ.श्री ऋषिवर्धनसूरिविरचितानि

# १. ॥ चतुर्विंशतिजिनस्तोत्राणि ॥

(अनुष्टुप्)

## १. श्रीआदिनाथस्तुतिः

परमात्मस्वरूपाय परमानन्ददायिने ।
नमः श्री ऋषभेशाय वीतक्लेशाय तायिने ॥ १

गुणान् व्यावर्ण्यतोऽनन्तान् केवल्यपि न पारयेत् ।
जन्मजिह्वाफलायैव तद्विवक्षा श्रमस्तु मे ॥ २

जन्मानन्तभवभ्रान्तौ तत्कुतः सुलभं विभो ।
त्वद्गुणग्राहिणी यत्र जिह्वा जागर्ति भक्तितः ॥ ३

जन्तुर्न जायते यावत् त्वद्गुणग्रहणाग्रही ।
निःसरत्यसकौ तावत् कथं संसारकूपतः ॥ ४

प्रभुत्वज्ञानवैराग्यो-पदेश-प्रशमादयः ।
गुणास्तव विभो विश्वो-पकाराय न केऽभवन् ॥ ५

दीव्यन्ति त्वद्गुणा यस्य चित्तसौधे प्रदीपवत् ।
दूरे मोहतमः स्तोमव्यामोहस्तस्य नश्यति ॥ ६

शक्रचक्र्यादि साम्राज्यं प्रतिष्ठात्वर्हदादिका ।
स्वामिँस्तव गुणस्तोतुर्भुक्तिर्मुक्तिश्च निश्चितम् ॥ ७

तात ! तत्ते गुणान् स्तौमि स्मरामि स्पृहयामि च ।
नित्यशो ग्रहणात्तेपि त्वत्प्रसत्त्या भजन्तु मां ॥ ८

एवं सर्वगुणग्रामविश्रामः कामनाधिकाम् ।
ददातु सात-सम्पत्तिं स्तुतः श्रीनाभिनन्दनः ॥ ९

इति चतुर्विंशतिजिनस्तुतौ श्रीऋषभदेवस्य गुणस्तुतिर्नामा प्रथमोल्लासः

## २. श्रीअजितनाथस्तुतिः

जयाजितजिनाधीश ! योगीन्द्रयतिजीवन ! ।
जगज्जङ्गम-कल्पद्रो ! ज्योतिर्मय ! निरञ्जन ! ॥ १

रागादिविजिताज्ञान-सुरैः साम्यं वदँस्तव ।
सर्वज्ञ-क्षीण-दोषस्य हास्यः स्यात्कस्य नो जडः ॥ २

राजरङ्कार्कखद्योत-क्षीरक्षार-मितद्रुवत् ।
अर्हँस्तव हरादीनामन्तरं हि महत्तरम् ॥ ३

किलाखिला अमी दोषास्त्वया निर्यासिताः प्रभो ।
शिश्रियुः परतीर्थेशान् रिपवोऽन्यनृपानिव ॥ ४

तेऽपि तत्प्रेरणामूढा बिभ्राणास्त्वयि मत्सरम् ।
बम्भ्रम्यन्ते भवाटव्यां द्वेषो दुःखाय यत् प्रभौ ॥ ५

निग्रहानुग्रहाद्या ये परैर्गुणतयोदिताः ।
दोषत्वात्ते त्वया त्यक्ताः सूक्ष्मदृक् ते तदद्भुता ॥ ६

रागाद्युपज्ञं विज्ञाय भवभ्रमपराभवम् ।
तत्त्यागाय तवोपास्तिं सन्तो धन्या वितन्वते ॥ ७

जयन्तु तव वाक्यानि तानि यैः श्रुतिमागतैः ।
दोषाः खलु विलीयन्ते हिमानीवार्करश्मिभिः ॥ ८

अमन्दानन्दपोषाय निर्दोषाय सुखात्मने ।
भवतेऽतिशयामेय ! वैजयेय ! नमो नमः ॥ ९

इति श्रीचतु० श्रीअजितनाथस्य दोषक्षयस्तुतिर्नामा द्वितीयोल्लासः

## ३. श्रीसम्भवनाथस्तुतिः

श्री सम्भवविभो ! भूरि-भवभ्रमणसम्भवम् ।
पराभवभयं भेत्तुं भजे भक्त्या भवत् पदौ ॥ १

कलयन्ति न के नाकि-नायकाः कलहंसताम् ।
क्रमकोकनदद्वन्द्वे तव देव ! दिवानिशम् ॥ २

चरणौ सुकुमालौ ते वहामीति मुदा हृदा ।
सुकुमालं सचरणं प्रति जन्मेदमस्तु मे ॥ ३

वज्रोत्कीर्णाविव पदौ तव यच्चेतसि स्थितौ ।
ज्ञानं च ब्रह्मसानन्दं न दूरे तस्य निश्चितम् ॥ ४

दशाशायातभक्ताशा-पूर्त्यास्योद्योतहेतवे ।
स्वर्मणी दर्प्पणायन्ते दशापि त्वत्पदोर्नखाः ॥ ५

तीर्थं पुण्यमयं नाथ ! सा धरा सधरोऽप्यभूत् ।
यत्रासीत्त्वत्पदन्यासः प्रभावोऽतः परोऽपि कः ॥ ६

रजोऽपि त्वत्पदोर्लग्नं ललाटे नम्रभाविनाम् ।
द्रव्यभावरुजः सर्वाः शमयेदद्भुताद्भुतम् ॥ ७

मुखस्पर्धा मुधामीभिः कृता तत्क्षम्यतां विभो ! ।
इतीव ते पदन्यासे सुराः पद्मान्यधो न्यधुः ॥ ८

न तादृक् व्रतदानादि-शक्तिर्मेऽत्र प्रभो ! परम् ।
त्वदङ्घ्रि-ध्यान-मेवैकं शरणं मेऽस्तु शर्म्मणे ॥ ९

इति श्री चतु० श्रीसम्भवनाथस्य चरणस्तुतिर्नामा तृतीयोल्लासः।

## ४. श्रीअभिनन्दनजिनस्तुतिः

शिवपूःस्यन्दनं पाप-तापव्यापैकचन्दनम् ।
अभिनन्दनमानौमि जगदानन्दनं जिनम् ॥ १

ससौरभं सुवर्णाभं तव वीक्ष्य वपुर्न के ।
सुवर्णं न सुगन्धि स्यादित्यसत्यं प्रपेदिरे ॥ २

स्मरोऽनङ्गस्त्वया चक्रे शक्राद्यास्त्रिदशाश्च ते ।
त्वत्पुरः किङ्करास्तत्ते रूपं केनोपमीयते ॥ ३

रूपं तेऽनुपमं पश्यंस्त्रिदिवादेत्य नित्यशः ।
शक्रः सहस्रनेत्रत्वं स्वस्य धन्यममन्यत ॥ ४

त्वदङ्गश्रीजितत्वेन ह्रीणं स्वर्णं तदाद्यपि ।
प्रविश्य ज्वलने जाने तदाप्त्यै तनुते तपः ॥ ५

रूपं पुण्योदयात् पुण्यं तवोत्कृष्टं त्रिविष्टपे ।
सर्वातिशायि तद्रूपं युक्तमेव जिनेन्द्र ! ते ॥ ६

स्वस्यान्यस्य च पापाङ्गं रूपं प्रायोऽन्यदेहिनाम् ।
उभयोः सुकृताङ्गन्तु त्वद्रूपं परमार्थतः ॥ ७

रूपं समवसरणजुषश्छत्रादि शोभितम् ।
तव यैर्ददृशे देव ! तैर्दृशां फलमानशे ॥ ८

ममाप्यकुण्ठा त्वद्रूपे-क्षणोत्कण्ठा विजृम्भते ।
प्रसादं कुरु कारुण्या-कर ! तां पूरयैकदा ॥ ९

इति चतु० श्रीअभिनन्दनस्वामिनो रूपस्तुतिर्नामा
चतुर्थोल्लासः ।

## ५. श्रीसुमतिनाथस्तुतिः

सम्मतेऽसुमतां मन्तु-मतोपि मम ते मते ।
सुमते ! रमते मीत-ममते मतिरुन्नते ॥ १

जीवाजीवादितत्त्वानां सम्यग् ज्ञानं च पालनम् ।
विना ह्यपारसंसार-निस्तारस्य कथा वृथा ॥ २

तच्च प्रजायते जन्तोः शासनोपासनात्तव ।
लभ्यते भूरिभाग्येन शासनं तव च क्वचित् ॥ ३

नयन्त्यसारसंसार-व्यापारैर्जन्म निःफलम् ।
मोहान्धा दुर्धियो धिग्धिक् तवासाद्यापि शासनम् ॥ ४

स्वर्मणीतरुगोस्वर्णनरसिद्धरसादितः ।
अप्याधिक्यादसुलभं तवाद्भुतमिदं मतम् ॥ ५

ऋद्धयः सिद्धयः सर्वाः सुखमाशिवमीप्सितम् ।
त्वन्मतासेवनादेव सम्पद्यतेप्यसंशयम् ॥ ६

औषधी-रस-मन्त्राद्या लब्धा अपि फलप्रदाः ।
सेवयैव यथा नाथा-सुमतां ते मतं तथा ॥ ७

त्वन्मतासक्तचित्तस्या-पदोप्यायति सम्पदः ।
परस्य भगवन् भूरि सम्पदोपि महापदः ॥ ८

अल्पायासं बहुफलं महत्वैकनिबन्धनम् ।
रत्नवाणिज्यवत् कश्चित् धन्यस्ते मतमश्नुते ॥ ९

इति चतु० श्रीसुमतिनाथस्य शासनस्तुतिर्नामा पञ्चमोल्लासः ।

## ६. श्रीपद्मप्रभजिनस्तुतिः

पद्मरागप्रभः पद्म-पूज्यः पद्मदलेक्षणः ।
पायात्पद्मप्रभः पद्मा-सद्म पद्माङ्कितक्रमः ॥ १

पञ्चत्रिंशदतिशयां श्रवणामृतसारिणीम् ।
द्विधा सकर्णः कोऽवर्ण्यां वाणीं शुश्रुषते न ते ? ॥ २

पृथक् सर्वाङ्गिभाषासु पर्यणैसीत्तवैकवाक् ।
बहुवर्णाम्बुकुण्डेषु सङ्क्रान्त इव शीतरुक् ॥ ३

अनेकदेहिसन्देह-सन्दोहानेकया गिरा ।
निराचकृथ कारुण्यात् कस्यान्यस्येदृशीशता ? ॥ ४

सुरासुरनराः पक्षि-पशुमीनोरगा अपि ।
दधुर्धर्मधियं के न त्वद्वाक् चातुर्यरञ्जिताः ? ॥ ५

तव वाचं निपीयापि गतमिथ्याभ्रमा न ये ।
सुधापानेपि नीरोगा भाग्यहीना न तेऽभवन् ॥ ६

मधुरं ह्यमृतान्नान्यत् त्वद्गीरग्रे तदप्यसत् ।
पिपासामास सोल्लासं यत्सुधाभुग्गणोपि ताम् ॥ ७

महानन्दनिलीनात्मा श्रोता शीतातपादिकः ।
विवेद सिद्धवद्धर्मो-पदेशं त्वयि तन्वति ॥ ८

धन्यास्ते यैः श्रुता गीस्ते स्थिता यद्धृदि तेऽधिकाः ।
धन्यातिधन्यास्ते कुर्युस्तदादिष्टविधिं तु ये ॥ ९

इति चतु० श्रीपद्मप्रभस्य वचनस्तुतिर्नामा षष्ठोल्लासः ।

## ७. श्रीसुपार्श्वजिनस्तुतिः

तपोऽकूपारपारीणं तमपारकृपारसम् ।
श्रीसुपार्श्वमपालस्यं श्रीसुपार्श्वमुपास्महे ॥ १

चक्रे प्रोचे च किं षोढा बाह्यमभ्यन्तरं तपः ।
सुदुर्जयान्तरङ्गारि-षड्वर्गविजिगीषया ॥ २

तवाश्चर्यमयैश्वर्यं जिनयुक्तं विजृम्भते ।
भवतेव तपःकर्म कर्तुं यत्केन शक्यते ? ॥ ३

प्रेक्ष्य प्रथमसंस्थानं दिव्यद्युतिमयं वपुः ।
कः श्रद्दधाति मिथ्यादृक् तव तीव्रतरं तपः ॥ ४

तपसः खलु सन्तोषः सन्तोषाच्च मनःसुखम् ।
ततोऽङ्गसौष्ठवं स्पष्टं स जडो नेति वेत्ति यत् ॥ ५

गोघृतेक्षुसितोत्पत्तिर्यथा युक्तिविदः सुखम् ।
तपोमर्मविदो मुक्तिर्विभो तेऽभूत्तथा सुखम् ॥ ६

भृगुपातासिघाताग्नि दाहादि क्लेशमप्यृते ।
तवैकाह तपस्यापि रात्यहो सुखमाशिवम् ॥ ७

पायसाद्यशिनां ब्रह्म सेवालादिभुजां भवः ।
सज्ञानाज्ञानतपसां द्विधापीशान्तरं महत् ॥ ८

अन्तः सुखं बहिस्तीव्रं यत्तपस्त्वदुदीरितम् ।
कथं प्रत्येति बध्नाति तत्रार्वाचीनदृग्रतिम् ॥ ९

आत्मैति हेममृदिवा-नादिकर्ममलाविलः ।
त्वत्प्रणीततपोवह्नि-योगे सिद्धसुवर्णताम् ॥ १०

तपः क्षपितपापाय दुःप्रापायाकृतात्मनाम् ।
नमस्तुभ्यमलक्ष्यात्म-स्वरूपपरमात्मने ॥ ११

इति चतु० श्रीसुपार्श्वनाथस्य तपःस्तुतिर्नामा सप्तमोल्लासः ।

## ८. श्रीचन्द्रप्रभजिनस्तुतिः

चन्द्रचारुयशाश्चन्द्र-वदनश्चन्द्रलक्षणः ।
चन्द्रप्रभ ! चिरं जीयाश्चन्द्रचङ्गाङ्गसौरभः ॥ १

त्वद्देहेऽनुपमं रूपमामोदश्चन्दनाद्भुतः ।
यच्च नामय-नामापि न स्वेदमलयोर्लवः ॥ २

ऊज्जृम्भाम्भोजसौरभ्यो यश्च ते वदनानिलः ।
स्निग्धगोदुग्धशुभ्रश्चाविस्रं यद्रुधिरामिषम् ॥ ३

यच्चाहारोपि नीहारो नृतिरश्चामगोचरः ।
तदेतेतिशयानेतश्चत्वारस्ते सहोत्थिताः ॥ ४

पूतिस्त्रीकुक्षिजत्वेपि तुल्येतेन्यविशां विभो ! ।
प्रागुग्रपुण्यभेदेन युक्तैवाजनि भिन्नता ॥ ५

पद्मसेवालयोर्भेदस्तोयादुत्पन्नयोर्न किम् ? ।
हिरण्यलोहयोश्चाद्रेः सिन्धोर्मौक्तिकमीनयोः ॥ ६

वर्णसत्त्वगतिस्नेह-स्वरलक्षणकान्तयः ।
भाग्यसौभाग्यदाक्षिण्य-लावण्यमतिशक्तयः ॥ ७

माधुर्यौदार्य-गाम्भीर्य-प्रतापोपक्रमादयः ।
अन्येपि सहजाः स्वामिन् ! गुणास्ते भुवनाद्भुताः ॥ ८

सहजानन्दरूपाय सहजानन्तशक्तये ।
नमः सहजशान्ताय भगवँस्तुभ्यमर्हते ॥ ९

इति चतु० श्रीचन्द्रप्रभस्वामिनः सहजातिशय-
स्तुतिर्नामाष्टमोल्लासः ।

## ९. श्रीसुविधिनाथस्तुतिः

प्रबोधसेवधे ! धन्यावधे ! धैर्यमहोदधे ! ।
विधेहि धर्मसान्निध्यं मयि श्रीसुविधे ! विभो ! ॥ १

चतुर्दश महास्वप्नानस्वप्नाधिपसेविते ।
त्वयि गर्भगते माता जातानन्दा निरैक्षत ॥ २

प्राज्यं द्विधापि साम्राज्यं भविताऽस्येति हस्तिराट् ।
असौ विशुद्धधर्मस्य भारं वोढेति मत्तगौः ॥ ३

मोहहस्तिमहायूथं हन्तासाविति केसरी ।
रन्तादः पदनम्राणां मन्दिरे श्रीरितीन्दिरा ॥ ४

यशः परिमलो विश्वव्यापकोऽस्येति दाम च ।
सुधावाक् नयनानन्दो भाव्यसाविति शीतरुक् ॥ ५

द्योतयिष्यति वस्तूनि ज्ञानमस्येति भानुमान् ।
अयमुच्चैरलङ्कर्ता कुलचैत्यमिति ध्वजः ॥ ६

मङ्गलानामयं मूलम् इति हैममहाघटः ।
विश्रामः शिवपन्थानामसाविति महासरः ॥ ७

संसारसागरस्यासौ पारं यातेति तोयधिः ।
कर्तारोऽस्य सुराः सर्वे सेवामिति विमानकः ॥ ८

गुणरत्नान्ययं दास्यतीति रत्नसमुच्चयः ।
आश्वसौ भस्मसात्कर्ता कर्मैधांसीति पावकः ॥ ९

भावार्थान् ज्ञापयामासुरमी, नाथ ! यथोचितान् ।
तवाचिन्त्यप्रभावस्यावतारे मुग्धचेतसाम् ॥ १०

एवं चतुर्दश स्वप्नफलैस्त्वं संस्तुतः प्रभो ।
चतुर्दश गुणस्थाना-रोहं मे देहि तत्फलम् ॥ ११

इति श्रीचतु० श्रीपुष्पदन्तस्य स्वप्नस्तुतिर्नामा नवमोल्लासः ।

## १०. श्रीशीतलजिनस्तुतिः

वाक्सुधाशीतलं पाद-न्यासपूतमहीतलम् ।
नमदाखण्डलं शीलामलं श्रीशीतलं स्तुवे ॥ १

उत्थायासनतः सम्यग् विधिना वासवादिभिः ।
ववन्दिषे गर्भगोपि माहात्म्यं किमतः परम् ? ॥ २

दोहदादिपूरणेन तव मातेति नार्यपि ।
माननीया महेन्द्राणां अप्यहो मानिनामभूत् ॥ ३

उद्योतो भुवने जज्ञे वायवश्च ववुः सुखाः ।
प्रसेदुः कुकुभः सर्वाः प्रापुः शं नारका अपि ॥ ४

उच्चस्थानं ग्रहा जग्मुः देशो निष्पन्नभूरभूत् ।
जनाः प्रमुदिताश्चासन् जिन ! जन्मक्षणे तव ॥ ५

शृङ्गारभासुराङ्ग्यः षट्-पञ्चाशद्दिक्कुमारिकाः ।
ईयुर्निजनिजस्थानात्तव जन्मनि तत्क्षणम् ॥ ६

अभ्यङ्गस्नानभूषादि सूतिकर्म यथोचितम् ।
मुदिता हृदितास्तेनुर्मातुस्तव च कौतुकम् ॥ ७

प्रमोदमेदुरा मेरौ सङ्गत्य सपरिच्छदाः ।
देवेन्द्रा विदधुः सर्वे जन्मस्नात्रोत्सवं तव ॥ ८

गन्धपुष्पफलस्वर्ण-रत्न-मुक्ता-धनादिकम् ।
तवावतारे गर्जन्तो घनवद् ववृषुः सुराः ॥ ९

दिवि दुन्दुभयो नेदुः जगुर्गीतं सुराङ्गनाः ।
तेने महं पिता यत्ते कस्य तद्विस्मयाय नु ॥ १०

महोत्सव-महानन्द-महातिशय-शालिने ।
श्रीशीतल ! नमस्तुभ्यं लभ्याय सुकृतात्मभिः ॥ ११

इति श्रीचतु० श्रीशीतलनाथस्य जन्मोत्सवस्तुतिर्नामा दशमोल्लासः ।

## ११. श्रीश्रेयांसनाथस्तुतिः

श्रेयः श्रीश्रेणये शान्ताशयं शमशमाश्रयम् ।
शेश्रीये शरणं शश्वत् श्रीश्रेयांसमसंशयम् ॥ १

तवास्यमुद्यदानन्दं शारदेन्दुसमप्रभम् ।
भालं शोभाविशालं चाष्टमीविधुविजित्वरम् ॥ २

अरालकोमलोन्मीलत्–स्वर्लताविभ्रमे भ्रुवौ ।
पद्मपत्रोपमे नेत्रे लावण्यलहरीभृते ॥ ३

तिलप्रसूनसङ्काशा नाशा चौन्नत्यशालिनी ।
बालप्रवालसोमालारुणावोष्ठौ ससौष्ठवौ ॥ ४

मुक्ताफलामलस्निग्धा दन्तपङ्क्तिश्च भास्वती ।
रक्तोत्पलदलाभासा जिह्वा पीयूषवर्षिणी ॥ ५

कर्णौ श्रीकेलिदोलाम्भौ कपोलो दर्पणद्युती ।
भुजौ करिकराकारौ जगदुद्धरणक्षमौ ॥ ६

वक्षश्च गोपुरस्कारं ज्ञानश्रीकेलिमन्दिरम् ।
पल्लवाभाङ्गुली कम्रौ करौ कमलकोमलौ ॥ ७

स्वरसत्त्वमनोवच्च नाभी गाम्भीर्यभाजिनी ।
रम्भा स्तम्भानघे जङ्घे पद्मापद्मौपमौ क्रमौ ॥ ८

पाणिपादनखाः प्रेङ्खच्चिन्तारत्नसखाः खलु ।
जिनान्यदपि ते सर्वमङ्गं त्रिजगदद्भुतम् ॥ ९

तवाष्टाधिसहस्राङ्गलक्षणे क्षणतोऽक्षिणी ।
कस्य स्यातां न हर्षाश्रुवर्षणोत्कर्षसाक्षिणी ? ॥ १०

दिव्यरूपस्वरूपाय रूपातीतपदार्पिणे ।
पुण्यनैपुण्यपुण्याय भगवन् ! भवते नमः ॥ ११

इतिश्रीचतु० श्रीश्रेयासनाथस्य रूपोपमास्तुतिर्नामा
एकादशोल्लासः ।

## १२. श्रीवासुपूज्यस्वामिस्तुतिः

वासये हृदयावासे वासनावासिताशयः ।
वासववावश्यपूज्यं श्रीवासुपूज्यं निरञ्जनम् ॥ १

अपिबन् जननीस्तन्यमप्यन्यजनतोत्तराम् ।
अपुषो वपुषः पुष्टिं यन्निजाङ्गुष्ठगामृतैः ॥ २

अस्पृशः शैशवे केलीर्बालीभूतागतामरैः ।
पित्रोः प्रमोदपोषाय ज्ञानत्रयधरोऽपि यत् ॥ ३

अज्ञासीः पण्डिताभ्यासेऽनधीयानोपि यत्कलाः ।
लिखितादिकलाः सम्यग् जातिस्मरणपाटवात् ॥ ४

अलङ्घ्यं भोग्यकर्मेति जानन् ज्ञानदृशा वशी ।
भुक्तवान्यदरागोऽपि विषयान् पञ्चलक्षणान् ॥ ५

अनिच्छन्नपि तद्भोगफलं हेमादिकोटिशः ।
यद्ददौ वार्षिकं दानं स्थितिरेषार्हतामिति ॥ ६

ब्रह्म मे ननु भावीति विजानन्नपि यत्तपः ।
चकृषे व्रतमादाय सिद्धिः स्यादुद्यमादिति ॥ ७

अनीहोपि सुरोपज्ञ-प्रातिहार्यश्रियं भवान् ।
भेजे यच्चान्यजन्तूनां लाभोऽस्या दर्शनादिति ॥ ८

तदिदं तवकश्चित्रं चरित्रं वेत्ति तुच्छधीः ।
योगिगम्यस्वरूपाय नमस्तत्ते महात्मने ॥ ९

इति श्री चतु० श्रीवासुपूज्यजिनस्याऽद्भुतचरित्रस्तुतिनामा द्वादशोल्लासः ।

## १३. श्री विमलनाथस्तुतिः ।

कल्याण–कमला केलि–कमलं क्रमयामलम् ।
सेवे श्री वैमलं कर्त्तुं कोमलं विमलं मनः ॥ १

कांस्यपात्रमिवात्यन्तं त्यक्तस्नेहजलोच्चयः ।
राज्यरामादिरङ्गेण न च भेद्योसि शङ्खवत् ॥ २

अपरैरप्रतीघात–यातायातोसि जीववत् ।
नभोवन्निजसामर्थ्या–दन्यालम्बनवर्जितः ॥ ३

वायुवच्चासि निःसङ्गः शुद्धहृत् शारदाम्बुवत् ।
भोगोपभोगनीरानु–पलिप्तः पद्मपत्रवत् ॥ ४

गुप्ताक्षः कूर्म्मवन्निश्रा–विप्रमुक्तो विहङ्गवत् ।
एकजातोसि रागादि–विरहात् खड्गिशृङ्गवत् ॥ ५

भारण्डवच्चाप्रमत्तो गजवत् कर्म्मशत्रुजित् ।
वृषवद्धर्म्मधौरेयो निःप्रकम्पः सुमेरुवत् ॥ ६

परीषहादिसारङ्गैर्दुर्द्धर्षोसि मृगेन्द्रवत् ।
समुद्र इव गम्भीरो नेत्रानन्दश्च चन्द्रवत् ॥ ७

सूरवद्विश्वविद्योती जातरूपः सुवर्णवत् ।
सर्वंसहोऽसि भूमिवत्तेजस्वी चासि वह्निवत् ॥ ८

इत्यागमोक्तोपमानैः स्तुतः श्रीविमलो जिनः ।
आगमाराधनफलं दत्तां मे शिवसम्पदम् ॥ ९

इतिश्री चतु० श्रीविमलनाथस्योपमानस्तुतिनामा
त्रयोदशोल्लासः

## १४. श्रीअनन्तनाथस्तुतिः

श्रीअनन्तजिनानन्ता–नादाविह भवे भ्रमन् ।
विना त्वद्दर्शनं जन्तुर्लभतेऽनन्तयातनाः ॥ १

अनन्तानन्तपुद्गल–परावर्त्तानयं पुरा ।
द्विधा निगोदकारासु क्लिष्टकर्म्मवशोऽवसन् ॥ २

अनन्तजन्तुभिर्जन्मा–हारादि बहुशः समम् ।
कुर्वन्नापाय(न्नाप?)सुखं तीव्रं त्वत्प्रसत्तिं विना विभो ! ॥ ३

तादृक्कर्म्मपरिणामात् कथञ्चिन्निर्गतस्ततः ।
यातायातमयं चक्रे पृथिव्यादिष्वनन्तशः ॥ ४

ततोपि निर्गतः प्राप्य त्रसत्वं कर्म्मलाघवात् ।
पुनस्तत्र ततानाय–मेहिरेयाहिरां मुहुः ॥ ५

भूरिशो नरदेवादि–भवेष्वेष ततश्चरन् ।
मतं ते क्वापि न प्राप रोरवत्सुरपादपम् ॥ ६

क्वचिदाप्यापि तच्चक्रे मोहलोभस्मरादिभिः ।
वृथा क्लीबेन जीवेन हा ! तत्त्वार्थमजानता ॥ ७

धन्यः कोपि पुनश्चिन्ता–रत्नवत् प्राप्य तत्प्रभो ! ।
विधिनाराध्य परमां कल्याणश्रियमश्नुते ॥ ८

अधुना भूरिभाग्येन देवावापि मयापि तत् ।
प्रसीदाथ तथा नाथ ! तन्मेऽस्तु सफलं यथा ॥ ९

इति श्रीचतु० श्रीअनन्तनाथस्य भवजीवस्थितिस्तुतिनामा चतुर्दशोल्लासः ।

## १५. श्रीधर्मनाथस्तुतिः

श्रीधर्म्मनाथ ! दानादि-चतुर्भेदं चतुर्मुखः ।
चतुर्गतिच्छिदे धर्मं चतुराणामुपादिशः ॥ १

भेदाः सर्वेपि धर्मस्य प्रायो दानानुयायिनः ।
यतिधर्मोऽपि दातारं विना यन्न प्रवर्तते ॥ २

दानं दातुश्च लातुश्च श्रेयांस ऋषभादिवत् ।
फलदायि तु शीलाद्याः कर्तुरेव गुणावहाः ॥ ३

तच्च लोकेप्यतिश्लाघ्य-मित्यादौ जगदे त्वया ।
दानं पात्रादिभेदेन बहुधा बहुऋद्धिकृत् ॥ ४

समस्ततपसां मूलं शीलं मन्त्रादिसिद्धिदम् ।
दानिनोपि प्रतिष्ठादिकारणं भूषणं परम् ॥ ५

महतामपि मान्यः स्याद् ब्रह्मचारीति दानतः ।
अन्वस्थापि त्वया शीलमुन्मीलन्महिमोज्ज्वलम् ॥ ६

निकाचितापि कर्म्माली तपसा क्षीयते क्षणात् ।
प्रयान्ति तपसा शान्तिमिन्द्रियाणि मनोपि च ॥ ७

तत्तपः शालिनां शीलमपि लीलायितं श्रयेत् ।
इति शीलादनुतपस्त्वयाख्यायि समृद्धिदम् ॥ ८

प्रमाणं न हि दानादि-त्रयं भावनया विना ।
दानाद्यालम्बिनी सापि भावना भूरिलाभभूः ॥ ९

साभिप्रायं क्रमेणेति त्वया धर्म्ममुदीरितम् ।
श्रद्धत्ते च विधत्ते यः सोऽभिष्टफलमश्नुते ॥ १०

शिवशर्मैकनिर्माणधर्म्ममर्माभिधायिने ।
भवाम्भोनिधिपोताय भगवन्भवते नमः ॥ ११

इति श्रीचतु० श्रीधर्मनाथस्य धर्म्मस्तुतिनामा पञ्चदशोल्लासः

## १६. श्रीशान्तिनाथस्तुतिः

श्रीशान्ते ! कृतभीशान्ते ! स्वान्ते शान्ते रसेरसम् ।
किमेकान्तेन मे कान्ते नरकान्ते करोषि न ? ॥ १

पिण्डस्थादि चतुर्भेदं ध्यानं कर्म्मक्षयाय यत् ।
तत्र शान्तो रसः कान्तो धुरि सर्वत्र सिद्धिदः ॥ २

विना शान्तरसं यस्तु ध्यानं मुग्धश्चिकीर्षति ।
स विहाय महापोतं तितीर्षति महोदधिम् ॥ ३

स तु शान्तरसस्वामिँस्त्वदाधारो विजृम्भते ।
चिन्तयन्ति ततः सन्तस्त्वामेव तदवाप्तये ॥ ४

आग्नेयीधारणायां यत् पिण्डस्थे ज्योतिरेधते ।
तत्त्वमेवान्यथा कर्म्मश्रेणीः स्याद् भस्मसात्कथम् ॥ ५

अर्हज्जिनादिनामानि तवानेकानि संस्मरन् ।
पदस्थध्यानवान् योगी पदमव्ययमाप्नुयात् ॥ ६

अर्हद्रूपं सभासीनं त्वामरूपञ्च सिद्धिगम् ।
रूपस्थे रूपहीने च ध्याने ध्यायति धीरधीः ॥ ७

भवन्निगदिताज्ञादि-क्षान्त्याद्यालम्बनं बुधः ।
अभ्यस्यन्धर्म्मशुक्लाख्ये ध्याने अप्यधिरोहति ॥ ८

जन्तोर्यातीश ! या वेला त्वद्ध्यानालीनचेतसः ।
कालेऽनन्ते पि सफला खलु सैव वृथापरा ॥ ९

त्वमेव ध्येय आराध्यो गम्यो नम्योसि योगिनाम् ।
ध्यानं यत्त्वां विना सर्वं तुषखण्डनवद् वृथा ॥ १०

सर्वध्येयप्रधानाय सर्वध्यानमयात्मने ।
तुभ्यमभ्यस्तयोगाय त्यक्तभोगाय मे नमः ॥ ११

इति श्रीचतु० श्रीशान्तिनाथस्य ध्यानस्तुतिनामा षोडशोल्लासः

## १७. श्रीकुन्थुनाथस्तुतिः

श्रीकुन्थुनाथ ! ते ग्रन्थ – कथा कर्णपथातिथिः ।
यथा तथा श्लथाः कुर्यान् मिथ्यामोहव्यथाप्रथाः ॥ १

जगत्यनित्यमत्यर्थमर्थदेहादिकं जडः ।
पश्यन्नपि न सेवेत त्वामक्षयसुखप्रदम् ॥ २

पिता माता सुतो भ्राता त्राता नान्योपि कश्चन ।
मरणादिभये जन्तोर्विना त्वामेकनायकम् ॥ ३

चतुर्गतिकसंसारे दुःखयोनिकुलाकुले ।
न ते भ्रमन्ति तत्त्वज्ञा ये त्वदाज्ञानुगामिनः ॥ ४

एकत्वादद्य यावन्मे स्थाने सिद्धिरभून्न हि ।
भाविनी तेऽथ साहाय्यात् भाग्याल्लब्धोसि यत्प्रभुः ॥ ५

मलिनाचेतने देहे निर्मलश्चिन्मयः स्वयम् ।
अशौचभिन्नते जन्तुर्जानीते ही न मूढधीः ॥ ६

सोल्लाससंवराभ्यास-प्रकाम(श?)पिहिताश्रवः ।
कर्माणि निर्जरत्याशु त्वद्गिरोन्मीलितेक्षणः ॥ ७

सुदुःप्राप बोधिमूलं दक्षाः क्षान्त्यादिलक्षणम् ।
आराधयन्ति ते धर्म्मं लोकाग्रगशिवेच्छवः ॥ ८

प्रभावपावनः प्रोक्त-द्वादशाद्भुतभावनः ।
श्रीकुन्थुनायको देयादुदयानन्दसम्पदम् ॥ ९

इति श्रीचतु० श्रीकुन्थुनाथस्य द्वादशभावनास्तुतिनामा सप्तदशोल्लासः ।

## १८. श्रीअरनाथस्तुतिः

श्रीअर ! श्रीकर ! परोपकारकरुणाकर ! ।
स्वाकार स्वीकुरु स्वैरं मामेकस्वकसेवकम् ॥ १

अनुभूयान्तरं सम्यग् वस्तुनो ह्यवसीयते ।
इतीव चक्रिता धर्म्मचक्रिता चादृता त्वया ॥ २

स्त्रीनिधीभादयो राग-लोभारम्भादिवृद्धये ।
कर्म्मबन्धश्च रागाद्यैर्नरकान्तासुखाय सः ॥ ३

इति तत्त्वधियालोच्य तृणवद्राज्यमुत्त्यजन् ।
भजन्संयमसाम्राज्यं न कस्याश्चर्यमातनोः ॥ ४

असतोपि जडो भोगान् कषायविषयादिभिः ।
ईहते त्विह वैराग्यात् तान् सतोपि त्वमत्यजः ॥ ५

एतैः कुमित्रवज्जन्तुः प्रेरितः पापकेलिषु ।
स्वार्थनाशेपि रज्यते त्वच्छिक्षां तात ! न स्मरेत् ॥ ६

अदः प्रसङ्गतः कर्म यदकार्षं करोमि च ।
तदुक्तौ त्रपते चेतः स्वयं वा वेत्सि किं ब्रुवे ॥ ७

तस्य प्राक्कर्मणः साटो नव्यस्याबन्धनं पुनः ।
यथा भवति मे नाथ प्रसीदाथ तथा कुरु ॥ ८

शिवधाम प्रजग्मुर्ये नाथ ! क्वचन यान्ति ये ।
यास्यन्ति मादृशा ये च तव सौम्यदृशैव ते ॥ ९

त्वं तीर्णस्तारकोसि त्वं मुक्तस्त्वं मोचकोसि च ।
बुद्धस्त्वं बोधकोसि त्वं सिद्धस्त्वं सिद्धिदोसि च ॥ १०

भवते चेतनागर्भवैराग्यनिरतात्मने ।
प्रकटीकृतसत्त्वाय ज्ञाततत्त्वाय मे नमः ॥ ११

इति श्रीचतु० श्रीअरनाथस्य वैराग्यस्तुतिनामाष्टादशोल्लासः ।

## १९. श्रीमल्लिजिनस्तुतिः

श्रीमल्लिर्मल्लिकामोदयशा जिनमति(त?)ल्लिका ।
कल्पवल्लिरिवाभीष्टं देयान्मदनभल्लिजित् ॥ १

भवकोटिभवं हन्ति भवद्भक्तिक्षणोप्यघम् ।
बालस्य पुनरालस्यात् कालस्यादफलो हहा ॥ २

कृत्रिमप्रेमबन्ध्वादि मोहेनान्तरितः कुधीः ।
तत्त्वबन्धुमपि त्वां नावज्ञया हन्त सेवते ॥ ३

स्तम्भेन त्वय्यनमनात् क्रोधेनानिष्टचिन्तनात् ।
लेभिरे प्रेत्य दासत्वं दुर्गतीश्च न केऽधमाः ? ॥ ४

चक्रे विचक्षणैस्तेऽर्वाक्षणे कृपणतानयैः ।
फलं प्रापुरनन्तं ते धृष्टा रंकास्त्वहो द्विधा ॥ ५

अज्ञानमतरागाद् ये व्यन्तरा(द्या)दरादथ ।
न दध्युस्तव शुद्धाज्ञां हारितं जन्म तैर्मुधा ॥ ६

न मद्यादि प्रमादो न बन्धुशोकोपि दुःसहः ।
त्वदागमार्थतत्त्वज्ञ-चेतः क्वचन बाध्यते ॥ ७

धनार्जनादौ व्याक्षेपो गीतादौ च कुतूहलम् ।
कामकेलिरसोपीशात्मानं मुञ्चन्ति न क्षणम् ॥ ८

आलस्याद्यन्तरायौघमपास्य त्वामुपासते ।
ये धन्याः कृतपुण्यास्ते कस्योपास्या न भाविनः ॥ ९

न लघुर्न महान्वापि जन्तुः कश्चित्क्वचित्प्रभो ! ।
परं यत्र कृपा तेऽभूत् स महान्महतामपि ॥ १०

प्रतिष्ठातिगरिष्ठाय वरिष्ठाय कृपावताम् ।
चिदानन्दैकनिष्ठाय भगवन् ! भवते नमः ॥ ११

इति श्रीचतु० श्रीमल्लिनाथस्यांतरायनिरासस्तुतिनामा
एकोनविंशोल्लासः ।

## २०. श्रीमुनिसुव्रतजिनस्तुतिः

पवित्रचरितं शान्त-दुरितं ज्ञानपूरितम् ।
करुणानिरतं दोषो-परतं सुव्रतं स्तुवे ॥ १

एकाश्वमिषतोऽन्येषामुपकर्तुं घनाङ्गिनाम् ।
आगा भृगुपुरे षष्ठि-योजनान्ते निशैकया ॥ २

सर्वे सुखैषिणः सत्त्वा-स्तन्मुक्तौ सा च धर्मतः ।
धर्म्मो दयामयः स तु जायते जन्तुरक्षणात् ॥ ३

क्रतौ जन्तुवधस्तस्मान्नरकं तत्र चासुखम् ।
इति तत्र सभासीनस्त्वं कृपावानुपादिशः ॥ ४

वाजीराजादयः के के देशनान्ते निशम्य नो ।
धर्मं बुबुधिरे पीता सुधा किं न हि रोगहृत् ॥ ५

सर्वे सत्त्वा न हन्तव्याः स्माहेति त्वं हि कोहिरुक् ।
देशचिन्ताधिपस्यैव न रोरस्योदरिम्भरेः ॥ ६

पशुपक्षिमरुद्वृक्षादयः सुरनरा अपि ।
सत्यापयन्ति ते सेवां युक्तं विश्वैकरक्षितुः ॥ ७

या कृपा योगमुद्राया यज्ज्ञानं या च वाक् कला ।
यन्माहात्म्यं च ते तन्नान्यत्र क्वापि प्रभो ! मनाक् ॥ ८

कृतानन्तोपकाराय निर्विकाराय नित्यशः ।
भुवनाद्भुतभाग्याय ससौभाग्याय ते नमः ॥ ९

इति श्रीचतु० श्रीमुनिसुव्रतस्वामिनो दयास्तुतिनामा विंशोल्लासः ।

## २१. श्रीनमिनाथस्तुतिः

अमानमहिमानं श्रीशोभमानशमानघम् ।
नमामि नमिनामानं समानामानमानसम् ॥ १

मणिसिंहासनं रत्न-कङ्केल्लितरुरुन्नतः ।
छत्रत्रयं पवित्रम्भा-मण्डलं देवदुन्दुभिः ॥ २

प्रसूनप्रकरो जानुद्वयसश्चा(च्चा)रुचामराः ।
सर्वसाधारणा वाणी मधुरा योजनानुगा ॥ ३

इति ते प्रातिहार्यश्रीर्बाह्यापि जगदद्भुता ।
सुरस्यान्यस्य कस्यासीत् कस्ते कक्षां करोतु तत् ॥ ४

गव्यूतद्विशतीं साग्रां त्वद्विहारादृतक्षितौ ।
स्वान्यचक्रभयं रोगा दुर्भिक्षं वैरमीतयः ॥ ५

अवृष्टिश्चातिवृष्टिश्च मारयो न भवन्त्यपि ।
तिर्यग्नृदेवकोटीनां योजनान्तः स्थितिः सुखम् ॥ ६

दिव्यवप्रत्रयं धर्म्मचक्रं च चतुरास्यता ।
इन्द्रध्वजः पदन्यासे नव हेमाम्बुजानि च ॥ ७

कण्टकाधोमुखत्वं च गन्धवाहानुकूलता ।
गन्धाम्बुवर्षणं पक्षिप्रादक्षिण्यं द्रुमानतिः ॥ ८

इन्द्रियार्थानुकूलत्वं समं सर्वर्तुसम्भवः ।
रोमाद्यवृद्धिः पार्श्वे च सुरकोटि र्जघन्यतः ॥ ९

चत्वारः सहजा दिव्य-देहरूपादयश्च ते ।
एवमेताननतिशयाँ-स्तव नाथ ! स्मराम्यहम् ॥ १०

एतच्चिन्तनतो नित्यं सुकृतं यदहं लभे ।
तवांह्रिसेवा तेनास्तु मम जन्मनि जन्मनि ॥ ११

इति श्रीचतु० श्रीनमिनाथस्य सर्वातिशयस्तुतिनामा
एकविंशोल्लासः ।

## २२. श्रीनेमिनाथस्तुतिः

नयनानन्दनं नन्दिनिदानं नलिनाननम् ।
नयानूनं ननु ज्ञाननिलीनं नौमि नेमिनम् ॥ १

यासाविशो वशीकुर्यान्मृगाक्षी क्षणमीक्षिता ।
भोज्या नवभवस्निग्धा त्यक्ता तु तृणवत्त्वया ॥ २

विलासिनीविलसितै-र्न मनः कस्य भिद्यते ।
सत्यं स्रोतस्विनीस्रोतः स्फोटयेत्पर्वतानपि ॥ ३

तैरप्यभेद्यं भगवन्वज्रवत्ते मनः पुनः ।
कृष्णचित्रकमूलं हि प्रतिस्रोतः प्रसर्पति ॥ ४

जानेऽद्भुतफलं दित्सुः प्रेम्णा भोज्यां त्वमत्यजः ।
सैव द्विधा प्रसिद्धाभूत् का यदन्यजिनप्रिया ॥ ५

दृ(ष्टा)ष्ट्वा च दर्शिता कान्ता सुधावत्परदैवतैः ।
युक्तं जातास्तदासक्ताः स्वयं स्मरवशा जडाः ॥ ६

दृष्टा च दर्शिता कान्ता सर्वज्ञ विषवत्त्वया ।
तद्विरक्ता भवद्भक्ता युक्तं तत्त्वविदस्ततः ॥ ७

स दर्पेन्द्रादिजेतापि स कन्दर्पस्त्वया जितः ।
हिनस्ति हस्तिहन्तारमपीह शरभो हरिम् ॥ ८

विश्व-श्लाघ्य-चरित्राय पवित्राय कृपागुणैः ।
नमः कमनजैत्राय मैत्र्यादिसहिताय ते ॥ ९

इति श्रीचतु० श्रीनेमिनाथस्य कामजयस्तुतिर्नामा
द्वाविंशोल्लासः ।

## २३. श्रीपार्श्वजिनस्तुतिः

प्रभावप्राभवप्रौढ–प्रतापप्रभवः प्रभुः ।
पार्श्वोपासितपार्श्वः श्रीपार्श्वः पातु पटुप्रभः ॥ १

यत्र यत्र यासु यासु प्रतिमासु तवाभिधा ।
तत्र तत्र तासु तासु भक्तः स्वेप्सितमश्नुते ॥ २

यो यो यदीहते चित्ते स स तल्लभतेऽधिकम् ।
इयत्ता तव दानस्य कथङ्कारं भवेत् ततः ॥ ३

देवाः सेवाकरास्ते त्वद्दासा देव–द्रुमादयः ।
तवोपमां ददानस्य तैर्मनस्त्रपते मम ॥ ४

अतितुष्टाश्च ते किञ्चिद्ददते सुखमैहिकम् ।
ऐहिकामुष्मिकं सर्वं ददासि त्वं शिवं सुखम् ॥ ५

न भक्ता–भक्तयो–स्तोष–रोषौ क्वापीश ते परम् ।
सुखासुखफले स्यातां भक्त्यभक्ती तयोः स्वयम् ॥ ६

पूजादौ तव यद्वित्तं व्ययति क्वापि यः सुधीः ।
तस्यानन्त–गुणं तत्स्या–दहो ! ते दानवीरता ॥ ७

जलदो पि घनो युक्त्या सर्ववस्तुप्रदो यथा ।
धर्म्मोपदेश–दोऽपि त्वं तथार्हन् सर्वऋद्धिदः ॥ ८

सर्वातिशायिदानाय निदानाय शुभश्रियाम् ।
विश्वत्रय–प्रसिद्धाय सिद्धाय भवते नमः ॥ ९

इति श्रीचतु० श्रीपार्श्वनाथस्य दानस्तुतिनामा त्रयोविंशोल्लासः।

## २४. श्रीमहावीरजिनस्तुतिः

प्रवर्धमानातिशयं वर्धमानमहं जिनम् ।
सेवे शिवदृर्ध(द्धि?)मानश्री-स्पर्धमानमहोदयम् ॥ १

गर्भगे त्वयि सत्यार्थोऽजनि सिद्धार्थभूपतिः ।
सत्यार्थं स ददौ नाम ततस्तव महामहैः ॥ २

बाह्यान्तरङ्गरिपुभिः क्षोभ्योऽयं न मनागपि ।
इति चक्रे सुरैरन्यन्महावीरेति नाम ते ॥ ३

तव नाम हृदि ध्यायन् देवोऽजनि स दुर्दुरः ।
श्रेणिकस्तीर्थकृद्भावी तत्त्वं नामैव ते ततः ॥ ४

अजेयं कलिकालेपि शासनं ते परैरभूत् ।
वनस्थमपि नाम्नैव कैर्ग्राह्यं वीर वस्तु यत् ? ॥ ५

जिनान्तररिपून् जेतुं बलं तादृग् न मे परम् ।
वीरभृत्याख्यया मत्तो नूनं नङ्क्ष्यन्ति ते स्वयम् ॥ ६

त्वन्नामरसिका लोलात्वद्ध्याना-सङ्गि मानसम् ।
त्वत्पादलग्नं भालं मे विभो भूयाद् भवे भवे ॥ ७

तवासाद्याधुना बोधिं सुधाघ्रात इव स्वकम् ।
स्वाराज्यं तृणवन्मन्ये सन्तोषसुखवानहम् ॥ ८

जिनाद्य सफलं जन्म जातोऽद्य नयनोत्सवः ।
मनः प्रमुदितं मेऽद्य यत्तवाजनि दर्शनम् ॥ ९

ज्ञातप्रणीततत्त्वाय सत्त्वादिगुणशालिने ।
सुखसिद्धिनिधानाय भगवन्भवते नमः ॥ १०

श्रीजयकीर्तिसूरिन्द्र-शिष्यः श्रीऋषिवर्द्धनः ।
तेने सर्वजिनेन्द्राणां स्तुतिमेतां महाफलाम् ॥ ११

इति श्रीचतु० श्रीवर्द्धमानजिनस्य नामस्तुतिनामाचतुर्विंशोल्लासः ।

## २५. अथ समुच्चयजिनस्तुतिः

रत्नत्रयोपदेष्टारं त्रिकालस्तुतिगोचरम् ।
त्रिजगज्जनताधारं श्रीअर्हन्तमुपास्महे ॥ १

दोषा अष्टदशापीश ! नश्यन्ति तव नामतः ।
चतुस्त्रिँशच्चातिशयाँस्त्यजन्ति न तवान्तिकम् ॥ २

विश्वविश्वोपकारैकफला ज्ञानादयो गुणाः ।
स्तूयन्ते कति तेऽनन्ता रसनैका यदानने ॥ ३

समस्त-सम्पदां हेतुः सेतुः संसारसागरे ।
पापपावक-पाथोदः सोदरस्त्वं शरीरिणाम् ॥ ४

कर्म्मामयागदङ्कारं सत्यङ्कारं शिवश्रियः ।
त्वामवापुर्दुरापं ये तत्त्वं ते लेभिरे न किम् ॥ ५

किञ्चिज्ज्ञानस्य नागम्यं शक्तेश्चाशक्यमीश ! नो ।
नापाल्यं च कृपायास्ते दानस्यादेयमस्ति न ॥ ६

पाणौ चिन्तामणिः प्राप्तः कल्पद्रुः फलितोऽङ्गणे ।
कामधुग्गृहमायाता सिद्धः कनकपौरुषः ॥ ७

दृष्टोऽक्षयनिधिर्देवा-स्तुष्टा वृष्टाः सुधाघनाः ।
त्रैलोक्यराज्यं मेऽद्याभूत् लब्धस्त्वमसि यत्प्रभुः ॥ ८

तत्त्वं यच्च रहस्यं यद् यद् गोप्यं ब्रह्म यत्परम् ।
यद् ध्येयं च यदाराध्यं, तत्त्वमेव ध्रुवं विभो ! ॥ ९

नेता हितविधातासि सेवकोऽस्मि तवानिशम् ।
कृपाङ्कुरु कृपानाथ ! देहि मे देव ! दर्शनम् ॥ १०

विश्वतत्त्वप्रदीपाय द्वीपाय भववारिधेः ।
शाश्वतानन्दकन्दाय नमस्ते परमात्मने ॥ ११

इति श्रीमदञ्चलगच्छेश श्रीजयकीर्तिसूरि-शिष्यश्री
ऋषिवर्द्धनसूरिकृतायां श्रीचतुर्विंशतिजिनस्तुतौ
सर्वजिनस्तुतिनामा पञ्चविंशोल्लासः ।

पू. श्रीमदञ्चलगच्छाधिपश्री जयकेसरिसूरीश्वरविरचितानि

# २. ॥ चतुर्विंशतिजिनस्तोत्राणि ॥

## १. श्री आदिनाथस्तवनम्

(वसन्ततिलका)

कल्याणकोटिसमसेवितमुल्लसन्त-
मुल्लासमीशमविनश्वरकीर्त्तिगौरम् ।
श्रीनाभिसम्भवजिनाधिपतिं जयाय,
संस्तौमि जैनजयकीर्त्तिमुनीन्द्रशिष्यः ॥ १

सर्वार्थसिद्धसुरमन्दिरतोऽपि वर्षं,
त्वं भारतं प्रियतमं भगवन्नमंस्थाः ।
सिद्धिस्ततोऽन्तिकतमाऽपि चिरेण लभ्या,
न स्यादितः परतरापि करस्थितेति ॥ २

इक्ष्वाकुभूमिवलये भवतोऽवतारे,
सौधादिभित्तिरचनारहितैव पृथ्वी ।
मुग्धात्मनां युगलिनां दलदन्तराय-
मानन्ददर्शनसखीव सुखीचकार ॥ ३

शक्रोपढौकितरसालदलाय पाणिं,
लम्बीचकर्थ भगवन्नपलौल्य एव ।
स्वस्यान्वयस्य च चिरस्य च तद्रसस्य,
सौरस्यतः कलयितुं सममन्दभावम् ॥ ४

राज्यं भुवस्त्रिजगतीपतिरप्युपादाः
क्लिद्यन्मना ऋजुनृणामुपकारबुद्ध्या ।
शिल्पादिकौशलवती भवतः प्रसादा-
दद्यापि देव ! जनता परिपाटीमीष्टे ॥ ५

सार्वत्रिकं ददति दानमुदारचित्ते,
देव ! त्वयि क्षितितले समता बभूव ।
लक्ष्मीवतामपि च चित्रमकिञ्चनाना-
मुच्चावचाः सलिलधाम्नि कुतः प्रदेशाः ॥ ६

कन्ये उभे उदवहः प्रथमं ततस्त्वं,
हित्वाऽपि ते दृढरसादुररीचकर्थ ।
सज्ज्ञाननिर्वृतिरमे समयेऽभिलिप्सु-
स्तत्प्रापणप्रतिभुवं चरणश्रियं प्राक् ॥ ७

मुग्धौ मृदू खचरराज्यमिवार्पयित्वा,
त्वं प्राहिणोः प्रतनु यौ रजतादिशृङ्गे ।
तौ बालवत्तदतिचीर्णमिवेश ! कृत्वा,
राज्यार्थिनौ भुवनमूर्ध्नि पुनः श्रितौ त्वाम् ॥ ८

त्वय्यागतेऽङ्गणभुवं रसमाददाने,
पौण्ड्रस्य चाभिपतति स्म सुवर्णवृष्टिः ।
श्रेयांसराजतनयस्य गृहे तदीष-
च्चित्रं तवार्चनमनन्तफलप्रदं यत् ॥ ९

त्वं केवली प्रथमतो भरतेऽभिवृत्त-
श्छित्त्वा कुकर्मकलुषाणि कथञ्चिदीश ! ।
सिद्धिस्तथापि भवतः प्रथमं जनन्या,
क्लेशं विनैव भुवनैकललाम लेभे ॥ १०

श्रीपुण्डरीकगणभृत्प्रमुखा नरेन्द्र-
पुत्रास्तवामृतकिरं गिरमापिबन्तः ।

स्वात्यम्बुशुक्तय इव स्म निधाय गर्भे,
मुक्ता इव प्रवचनस्रजमुद्गिरन्ति ॥ ११

उत्पन्नकेवलकलः कलभोपमान-
स्निह्यद्गतिः कनकपद्मनिवेशिताङ्घ्रिः ।
गर्जत्सु तूर्यनिनदेषु सुरासुरेन्द्र-
सेव्यस्त्वमत्र भुवने सुचिरं व्यहार्षीः ॥ १२

नीरञ्जनं पदमधीशमथाधिरूढ-
मुत्कण्ठितो निशमितुं तदनाप्नुवानः ।
स्वस्मिन् विरागमगमद् भरताधिराजः,
किञ्चित्तथाऽजनि यथा जगदेकदर्शी ॥ १३

त्वय्यापतन्ति गुणराशय ऊर्म्मिभाजः
प्रीताः परस्परसुखावहसङ्गमेन ।
दोषाः पयोनिधितरङ्गविहस्तिताम्बु-
फेनास्तटावनिमिवान्यमतानि भेजुः ॥ १४

अविकलपुरुषार्थप्रापणे दानशौण्डः,
परमतिशयितौजाः सर्ववित्सर्वदर्शी ।
त्रिभुवनजनरक्षादक्षिणश्चित्तवासे,
निवसतु मरुदेवाकुक्षिरत्नं जिनेन्द्रः ॥ (मालिनी) १५

## २. अष्टप्रातिहार्यगर्भितं श्रीअजितनाथ-स्तवनम्

(वसन्ततिलका)

उल्लासभासुरसुरासुरराजराजि-
नन्नम्यमानमणिमौलिविभाविभास्वत् ।

उद्भूतभक्तिभरतः प्रभुवैजयेय-
देवाधिदेवपदपङ्कजमानवानि ॥ १

आमोददायि तव पादसरोरुहं ये,
भ्रान्ता अपि भ्रमरवन्निलयं श्रयन्ते ।
भव्या भवन्ति भुवनोत्तरभागधेया-
स्ते सर्वदैव सुखसौरभभोगभाजः ॥ २

त्वत्पादनीरजमिदं जिनराज ! मन्ये,
संसारवारिनिधितारणयानपात्रम् ।
एतद्विहाय हृदि साहसमादधाना,
मज्जन्ति सप्तममहीवलयानि यावत् ॥ ३

त्वत्प्रातिहार्यसुषमा महिमाभिरामा,
दृष्टा परेषु तु सुरेषु न लेशतोऽपि ।
मूढास्तथापि कलयन्ति समानभावं,
विभ्रान्ति विप्लुतधियस्तव चापि तेषाम् ॥ ४

सर्वर्तुको मदनमीश तवायमेवं,
कङ्केल्लिरुल्लपति पल्लवकम्पनेन ।
यस्ते सखा मधुरसौ वसतीह नित्यं,
मा विश्वसीर्मृदुमते तदमुष्य नेतुः ॥ ५

आजानुपुष्पनिकरं परितः किरन्तो,
जाने जनानभिदधत्यमराः पुरस्ते ।
योऽमुं भजिष्यति भवी भववारपार-
स्तस्याचिरादपि भविष्यति जानुदघ्नः ॥ ६

आयोजनं समतया श्रुतिगोचरत्वा-
त्तत्त्रिशामकभणित्यनुगामुकत्वात् ।
मद्रादिनैकविधरागरसप्रियत्वात्,
धीरध्वनिस्तव न कस्य मुदं करोति ॥ ७

देव ! स्वदर्शननिदर्शनदर्शनेन,
त्वच्चामराणि कृतिनामिति बोधयन्ति ।
ये ये भजन्ति विभुमेनमिमे भवन्ति,
कल्याणसम्पदभिरामशिरःप्रसिद्धाः ॥ ८

सिंहासनं स्फटिकरत्नमयं सुवर्ण-
सत्पादपीठकलितं कलयाऽधिरूढे ।
देव ! त्वयि स्मृतिपथं विदुषामुपैति,
कैलासमेरुगिरियामलमेकवासम् ॥ ९

पूर्वामुखे दिनमुखे त्वयि सन्निविष्टे,
भामण्डलं भुवनभासकपृष्ठभागे ।
युक्तं तवाऽथ जिननाथ ! कुतोऽनु धत्से,
तत्रैव तद्दिनपतौ श्रयति प्रतीचीम् ॥ १०

विश्वैकराज्यपदवीपिशुनः पुरस्ते,
यो दुन्दुभिर्नदति नेतरुदारनादः ।
सोऽपि त्वया वचनरङ्गकरिष्यमाण-
सन्तोषसज्जनसमागमपूर्वरङ्गः ॥ ११

आवेदयन्ति तव पञ्चदशातपत्रा-
ण्येवं विभो ! गणनया विदितं विशेषम् ।

दाता सुखानि भुवनाङ्कितरज्जुमान-
लोकाधिवासिभविनामयमेक एव ॥ १२

एवंविधाऽतिशयभासुरमप्यधीशं,
हित्वा परत्र कुमते किल केऽपि रक्ताः ।
काचग्रहाग्रहकुविग्रहमत्युदग्रा,
लब्धं विदूरमणिमुज्झितवन्त एते ॥ १३

विश्वत्रयेऽभिदधतीश ! बुधाः शरण्यं,
त्वामेव तेन शरणार्थितया श्रितोऽस्मि ।
सन्तश्च बिभ्रति सदाश्रितवत्सलत्वं,
तद्देव ! चिन्तय यथोचितमत्र शावे ॥ १४

अजितमजितनाथं रागरोषप्रमोहै-
रमितमतिशयौघैः प्रातिहार्यैश्च वर्य्यम् ।
अवितथतमवाचा धर्ममार्गं दिशन्तं,
त्रिकरणपरिशुद्ध्या नित्यमेवानमामि ॥ (मालिनी) १५

## ३. सहजातिशयगर्भितं श्रीसम्भवनाथ-स्तवनम्

(वसन्ततिलका)

श्रीसम्भवं भवपराभवभावितारं,
श्रीसम्भवं भुवनवैभवभावितारम् ।
उत्फुल्लतामरसकेसरगर्भगौर-
मायल्लकं मनसि मेऽर्चितुमुल्ललास ॥ १

त्वद्रूपसम्पदमभङ्गुरदीप्यमान-
लावण्यनिर्झरतरङ्गितकायकान्तिम् ।

द्रष्टुं दृगेव यदि वेदसुधां स्वदन्ती,
वक्तुं बिभर्त्ति जडिमानमियं तु लोला ॥ २

त्वय्यङ्गचङ्गिमविनिर्जितमीनकेतौ,
लग्नाः कटाक्षविशिखाः सुरसुन्दरीणाम् ।
मोघत्वमेव भगवन्नितरामवापु-
र्लोहं निशातमपि किं गगनं भिनत्ति ॥ ३

स्मेरं तवाननसरोरुहमद्भुतश्री-
संवासशोभनमनर्गलसौरभाढ्यम् ।
ऐक्षन्त ये सुभगभोगिशिरोमणित्वं,
ते लेभिरे नयनलब्धिफलञ्च लोके ॥ ४

भर्त्तस्तवाननमनेन निशाकरेण,
सम्भावयामि सुभगं किमिवोपमेयम् ।
शीतोऽपि निर्मलतरोऽपि कुरङ्गनाभि-
क्षोदाभिमानसुरभिं र्नयतो मृगाङ्कः ॥ ५

त्वद्देहसौरभविलोभनलोलुभालि-
झङ्कारमिश्रमसृणाखिलदिग्विभागम् ।
उच्चावचास्तत इतश्च समापतन्तो,
वाताः प्रथामगुरिमामिति गन्धवाहाः ॥ ६

स्तन्यं न जातु भगवन्नपिबः पुरन्ध्री-
वक्षोजघर्म्ममलकश्मलपित्सलं यत् ।
रोगाः प्रवेशमलभन्त न तत्त्वदीये,
देहे सुधाशनसमेधितनिर्मलाङ्गे ॥ ७

लोकोत्तरा लवणिमा वपुषि त्वदीये,
रोगाः कदाचिदपि तेन न सम्भवेयुः ।
नायान्ति वा यदि रुजस्तत एव पुण्यं,
लावण्यमित्यवधृतो नियमस्तवैव ॥ ८

देहे तव स्तबकितं न हि घर्म्मवारि,
तत्कौतुकं शमसुधाजलधे ! किमत्र ।
प्रायः प्रकोपविकटानलतीव्रहेति-
सोष्माभितापजनितं भविता भवेत्तत् ॥ ९

अङ्गं तवाङ्गसुभगं मलकश्मलानि,
विश्राणि घर्म्मसलिलानि न संसजन्ति ।
रत्नानुविद्धकनकप्रतिमासुदृष्टो,
न श्यामिमा किल मनागपि सन्निबद्धः ॥ १०

देवाधिदेव ! तव देहमधौतशुद्धं,
बाह्या मलाः कथमिवेह परामृशेरन् ।
अन्तर्मलाः कमनमत्सरमोहमुख्या-
स्ते यत्त्वयि स्थितिमपि स्म न सूत्रयन्ति ॥ ११

त्वत्कर्णनेत्ररसनादशनालिघोणा-
मुख्यानि यानि निदिशन्ति मलाकुलानि ।
स्थानानि तानि पवनाभ्यसनेन गर्भ-
योगीश्वरः प्रथममेव शुचीन्यकार्षीः ॥ १२

नासा तवातिसुरभिश्वसनाभिरामा,
कृत्वा पुनर्जननमादिमनन्तमन्तम् ।

बीभत्सपिच्छलकफाकुलिमानमीषत्,
सिङ्घाणकञ्च न कदाचन पर्यविष्ट ॥ १३

अङ्गप्रसङ्गमधिगम्य विलीनभावं,
बीभत्सतां विरसविस्त्रविगन्धिताञ्च ।
मांसासृजी तव परित्यजतः स्म धेनु-
धारोष्णदुग्धधवले अवलेपमुक्तः ॥ १४

नीहारभोजनविधी तव चर्मचक्षु-
र्दृग्गोचरौ न जननावधि सम्भवेताम् ।
तल्लोकनायक ! समस्तजनातिशायि-
माहात्म्यरत्ननिधये सततं नमस्ते ॥ १५

## ४. ज्ञानवर्णनगर्भितं श्रीअभिनन्दनस्वामि-स्तवनम्

(वसन्ततिलका)

विश्वाधिनाथमभिनन्दननामधेयं,
निष्कश्मलत्रिभुवनाद्भुतभागधेयम् ।
स्तोतुं मनः परमसम्मदमाबिभर्ति,
विश्वं यदीयमहिमा सहसा पिपर्ति ॥ १

आविर्बभूव घनसंहतघातिकर्म-
निर्मूलनिष्कषणतस्तव यः प्रकाशः ।
सालोकलोकविषयस्य विशुद्धभासः,
पारम्परं न खलु कश्चन तस्य वेद ॥ २

जानासि सम्यगव केवलवेदसा त्वं,
विश्वानि तान्यपि च केवलवेदसा त्वाम् ।

जानन्ति सम्यगिति चेतसि सम्प्रधार्य,
विज्ञानकोशममलं स्तुमहे महस्ते ॥ ३

षड्द्रव्यसङ्गतनिवृत्तविवर्त्तमान-
निर्वर्त्स्यमानगुणपर्यवभेदभावान् ।
कालक्रमेण कलयन्नकलङ्कलीला,
लोकोत्तरस्फुरदनुत्तरबोधभृत्त्वम् ॥ ४

येऽनुत्तराः सुरवरा भवधारणीय-
कायोपगूढशुचितल्पलयाः स्मरन्ति ।
ज्ञानादनन्तगुणमुत्तरमप्यमीषां,
ज्ञानं तवाव्ययमनुत्तरमामनन्ति ॥ ५

कुड्यादिभिः परमसूक्ष्मतया क्वचिच्च,
दूरादतीवनिकटादथ वेदनानाम् ।
व्याघात इष्यत इतीति हयः स कोऽपि,
ज्ञाने तवाकृत न कृत्रिममप्यपायम् ॥ ६

ज्ञानं वलक्षमुपलब्धमपि प्रमादा-
पातेन नश्यति कदाचिदपीति दृष्टम् ।
निर्नामविप्लवमुपेतवता न तेन,
व्याहन्यते स्म तव तत्त्वपरोऽवबोधः ॥ ७

आचारकाण्यपि घनाघनमण्डलानि,
भासामधीशमिव तावकतत्त्वबोधम् ।
आवृत्य तानि पवनेन पराहतानि,
ध्यानेन ते क्षयमगुर्न पुनर्भवाय ॥ ८

स्वामिन्ननादिसमयावधिसङ्गतानि,
छद्मानि यच्चटुचिरन्तनसेवकानि ।
ध्यानानलेऽशुचि विघट्य विघट्य भस्मी-
कृत्वा सुखी भवसि तात ! ततः कृतघ्नः ॥ ९

निस्तक्ष्य निर्दयमपोह्य विभज्य भित्त्वा,
कर्माणि तारक ! तथा कथमप्यधाक्षीः ।
जीवप्रदेशविवरोक्षकदम्बकस्य,
ज्ञाने यथा न किल किञ्चन तारतम्यम् ॥ १०

आत्मप्रदेशसमुदायमुदारबुद्धे,
नातिश्लथं च न तथातिसुसंहतञ्च ।
ज्ञानैकवृत्तिसमसम्मतिसन्निगूढं,
धत्से तथेतरगिरामपथं यथा तत् ॥ ११

ज्ञानं यथा तव चिरादनियत्तयाऽदः,
सम्वर्धते कलुषधिक्कणिकाविमुक्तम् ।
स्पर्द्धादिवातिगहनं हि तथा प्रमेय-
मप्याप पापविनिहन्तरनन्तभावम् ॥ १२

ज्योतींषि नाथ ! विविधानि यथोल्लसन्ति,
व्योमाधिकाधिकविशालतमं तथैतत् ।
एवं पदार्थनिवहोऽपि यथैव भूयान्,
भूयस्तमस्तव तथैव ततोऽपि बोधः ॥ १३

ईषत्प्रबोधकणदुर्ललिता विमूढा-
स्तीर्थान्तरीयगुरवो गहनेऽतिगूढे ।
उत्कीलितोत्कलदनाकुलकेवलस्त्वं,
वस्तुस्वरूपमवधारयसे यथास्थम् ॥ १४

सकलावगामुकविबोधवते,
सकलाविमेयशुचिबोधवते ।
अभिनन्दनाय जगदीश सता-
मभिनन्दनाय भवतेऽस्तु नमः ॥ (प्रमिताक्षरा) १५

## ५. वचनवर्णनगर्भितं श्रीसुमतिनाथस्तवनम्

(वसन्ततिलका)

आनन्दबन्धुरपुरन्दरमुख्यमन्त्रि-
प्रस्तूयमानगुणकीर्त्तनजातहर्षः ।
तीर्थाधिनाथसुमतिस्तवनेन जिह्वां,
बह्वादरस्मितरसेन पवित्रयामि ॥ १

वाणी तवेश ! सरणिः शिवपत्तनस्य,
वाणी च सारणिरियं श्रुतपादपानाम् ।
वाणी तवेश ! तरणिर्भववार्द्धिगानां,
वाणी तवेश ! तरणिः कलुषान्धकारे ॥ २

आयोजनं समतयैव निशम्यमाना,
वाणी कथं तव जिनेन्द्र ! गिरां विवर्त्तः ।
वीर्यान्तरायपरमक्षयदुर्द्धरं वा,
ब्रह्मौजसः कलयितुं बलमीशिता कः ॥ ३

तिर्यग्नृणामपि गिरः कुलदेशभिन्ना-
स्त्वं केवली कलयसीति विशुद्धमेव ।
ते यद्गिरं युगपदाददति त्वदीयां,
लोकोत्तरः स महिमा हि तव प्रतीतः ॥ ४

तिर्यग्नरामरगिरामनुगामिनी ते,
भाषा तुषारकरमण्डलकोटिशीता ।
दुश्चीर्णपापपरितापभरं हरन्ती,
दुग्धाश्रवादिगुणतः स्वदते न कस्य ? ॥ ५

वाणी सुधामधुरसालसिता रसाला,
दुग्धप्रियालसुरसालफलावलिभ्यः ।
माधुर्यसारमधिकाधिकमीश ! धत्ते,
भूयस्तरां परिचिता विरसा न सा यत् ॥ ६

न त्वद्गिरा सुरभिदुग्धममामनोन्यं,
सद्यस्कमप्यतितुलामधिरोहतीश ! ।
अम्लप्रसङ्गमधिगत्य मनागपीदं,
दृष्टं विनस्वररसं क्षणमात्रतो यत् ॥ ७

आहुः सुधेति पदमप्रवितर्कचारु,
यद् विस्त्रसादिहरणेऽम्बरपुष्पतुल्यम् ।
वाणी तवाऽऽशु भविनामजरामरत्वं,
विश्राणयत्यमृतमेव ततस्तु वस्तु ॥ ८

वाचं तव स्तिमितशान्तरसां पिबन्तो,
नाऽपि क्षुधं न च तृषं गणयन्ति लोकाः ।
किं चन्द्रमण्डलमृगः क्षुधितः पिपासुः,
केनाऽपि दर्शनपथं गमितः कदाचित् ॥ ९

पीयूषसारणिसमा तव देशनेयं,
शीतातपश्रमभयान्यपि निर्जजार ।

प्रायः प्रहीणतमसः परिनिर्वृतस्य,
शुद्धस्य नो शमरसस्य किमप्यसाध्यम् ॥ १०

बीजानि कानि समयोपमिमीमहे ते,
वाचं फलातिशयसम्पदुदारबीजम् ।
अष्टाक्षरामपि गिरं गणधारिणे य-
ल्लब्ध्वा फलन्ति गणिनां पिटकं समग्रम् ॥ ११

पृच्छन्ति संशयपदं सममेव देव !,
सङ्ख्यातिगाः सुरनराः पशवोऽपि यत्र ।
तत्र त्वमेकवचनेन फलस्यमीषु,
श्रद्धेयमेतदपि ते गहनं गुरुत्वम् ॥ १२

अब्दोऽपि चैकपृषता न बिभर्त्ति धात्रीं,
नैकेन हन्ति तिमिरं किरणेन सूर्यः ।
तात ! त्वमेकवचसा गणनातिगानां,
तान्युत्तराणि भणसीति महोमहीयः ॥ १३

आषाढसङ्गमनवोन्नतिगर्जितस्य,
ये चातका इव घनस्य घनाघनस्य ।
अम्भांसि ते शुचिवचांसि निपीतवन्त-
स्ते विश्रुतां महिमसिद्धिमवाप्तवन्तः ॥ १४

कोशस्त्वमेव भगवन् ! वचनामृतस्य,
पुण्यस्य निर्मलतरस्य यदक्षयस्य ।
तत्केवलोज्ज्वलकलानिलयाय विश्व-
जैवातृकाय गुणिनां गुरवे नमस्ते ॥ १५

## ६. अक्षीणमहालयभामण्डलवर्णनात्मक-
## श्री-पद्मप्रभस्वामि-स्तवः

(वसन्ततिलका)

अर्हन्तमादिनिधनातिगदिव्यचक्षु-
र्विज्ञातभूतभवमानभविष्यभावम् ।
पद्मप्रभौघपरिभावुककायकान्ति-
पद्मप्रभं भजत भक्तिभरेण भव्याः ॥ १

सिंहासनं श्रितवति त्वयि देव ! भूमी,
या योजनायतिमती परिमण्डलेन ।
तस्यां नृदेवपशुकोटिगुणाऽपि कोटी,
मातीत्यमेयमहिमैकनिधिस्त्वमेव ॥ २

त्वत्पर्षदामधिनिवासकृते विदम्भं,
विश्वम्भरा विपुलतां भजते वरं तत् ।
वासाय देव ! यशसां तव विस्तृतानां,
कस्मान्नभो मुकुलितं तदहं न वेद्मि ॥ ३

क्षेत्रे सदस्य निलये भवता हि पृथ्वी,
पृथ्वीकृतेति तव का जगदीश ! लब्धिः ।
अल्पाऽपि यत्त्रिपदगीर्गणधारिभिस्ते,
विस्तारिता प्रवचनग्रथनेन चित्रम् ॥ ४

वाचं तवाऽतिविपुला विपुलासुधाभां,
जाता निशामयितुमेवमहं स्मरामि ।
श्रूयेत यत्र भुवि गीः सममेव सैव,
विस्तारमागतवती न परा यदेषा ॥ ५

श्रोतृश्रुती सुपरिपूर्य वचः सुधेय-
मुल्लासिनी ननु पुरा मयि लालसीति ।
इत्यागमिष्य शुभसम्मदमुच्छ्वसन्ती,
विस्तारमाप्य वसुधा ध्रुवमुज्जगार ॥ ६

योगीन्द्रयोगपरिकर्मवचोऽतिगं ते,
सान्निध्यतस्तव चिराय विचेतनाऽभूः ।
वैपुल्यमाप्य महिमानमहो महान्तं,
लब्ध्वाष्टसिद्धिरिव दर्शयते जनेभ्यः ॥ ७

भामण्डलं भुवननायकमौलिपृष्ठे,
यद्दीप्यते तव तिरस्कृतभानुबिम्बम् ।
तद्धर्मचक्रबलधिक्कृतदुष्कृतौघ-
शेषं स्वपृष्ठनिलयं विलयं नु नेतुम् ॥ ८

उद्गच्छदच्छरविमण्डलजित्वरं त्वत्-
पृष्ठप्रभापटलपाटलमन्तरिक्षम् ।
मिथ्यात्वपुञ्जदहनाय समिद्धरोचिः-
सप्तार्चिषं समुदितं जिनराज ! मन्ये ॥ ९

देवाधिदेव ! शशिसूरविभाविशिष्टं,
पृष्ठालयं तव यदेतदुदेति तेजः ।
तद्बोधयत्यपि गते शिवपत्तनं त्व-
त्तेजस्त्वयीह वसतीव भविष्यतीति ॥ १०

उद्गच्छता सपदि लोकमिवाप्य लोकं,
वित्तेजसा भुवनभास्करभासयित्वा ।

नातः परं मम पुनः किमपि प्रकाश्य-
मस्तीति संश्रितमिदं तव मौलिपृष्ठम् ॥ ११

त्वत्पृष्ठतेजसि निरेनसि निर्मलत्वा-
दागत्य तात ! विनिपत्य भवन्त्यसन्तः ।
अज्ञानमीलितदृशामनुलग्नगानां,
दुर्मेधसां विमतिवादकणाः पतङ्गाः ॥ १२

कर्मक्षयोल्लसितमन्तरनन्तवस्तु-
विस्तारवेदि तव केवलबोधतेजः ।
आपूर्य सूर्यकिरणौघविजित्वरं त्व-
च्छेषश्च पृष्ठनिलयोऽयमिवावभातः ॥ १३

भामण्डलं तव पुरातनपापकोश-
निर्मूलनिर्मथननिर्मलकान्तिकान्तम् ।
मोक्षाभिलाषिकृतिनामनुगामुकानां,
विद्योतयत्यपथरेचनतः स्वमार्गम् ॥ १४

ज्ञानं यथा तव दिवानिशमेकरोचि-
र्विद्योतते दलितदुर्मततामसौघम् ।
भामण्डलं शुभदपृष्टगसूर्यरूपं,
तद्वद् विभाति जगदीश ! ततो नमस्ते ॥ १५

## ७. वैरशमनातिशयवर्णनात्मक-
## श्री-सुपार्श्वनाथ-स्तवः

(वसन्ततिलका)

स्वामी सुपार्श्वभगवान्नघवार्द्धिवीची-
विक्षोभदुर्ललितजाङ्गलजाड्यभाजाम् ।

निर्दूषणस्फुरितसद्वचनाञ्जनेन,
संसारिणां वितनुते नयनप्रकाशम् ॥ १

त्वां स्तोतुमीश ! रसनाशतचञ्चलोऽपि,
वर्षायुतैरपि न पारयति प्रवीणः ।
तीर्त्वा सरस्तरुणदोर्बलदुर्द्धरोऽपि,
सामर्थ्यमुद्वहति कस्तरितुं पयोधिम् ॥ २

त्वत्सन्निवाससुहिते परचक्रभीति-
र्नाऽपि स्वचक्रभयमस्ति महीविभागे ।
सन्तुष्टराजजनितप्रणयातिरेका-
ल्लोकाः कदाचन न कष्टलवं लभन्ते ॥ ३

निर्मत्सराः क्षितिभुजोऽपि भवन्ति तत्र,
यत्राऽऽदधासि कृपया चरणप्रचारम् ।
अन्तर्बहिः शमरसामृतसिद्धयोग-
साम्राज्यभाजिनि विभौ कलहायते कः ? ॥ ४

वैराणि यान्यपि परस्परबाधकानि,
लोकेषु च प्रकृतिषु क्षितिनायकेषु ।
तानि त्वदीयचरणस्थरजःप्रसङ्गात्,
सद्यः प्रशान्तिमुपयान्ति दवा इवाब्दैः ॥ ५

यज्जातिवैरमतिदारुणमङ्गभाजां,
शान्तं न शाम्यति न वा युगकोटिलक्षैः ।
कारुण्यपुण्यतमसिन्धुसुधासमुद्रे,
सामीप्यभाजि भवति प्रविशीर्यते तत् ॥ ६

सिंहा गजा अपि हया महिषास्तथा ये,
भेकाश्च भोगिन इमे भषणाः कुरङ्गाः ।
ओतुव्रजाश्च खनकाश्च विजातिदुष्टा-
स्तेऽपि श्रयन्ति शममाशु भवन्तमाप्ताः ॥ ७

सिंहीस्तनेषु सुभृतेषु कुरङ्गशावः,
स्तन्यं यथारुचि विलेढि तवोपकण्ठे ।
सिंहीसुतं सवितृमुक्तमतिक्षुधार्त्तं,
मुग्धा मृगी सपदि पाययते च दुग्धम् ॥ ८

क्षीरं वलक्षमभितः सुरभिः क्षरन्ती,
व्याघ्रीशिशोः कृषति नो मुखतोऽञ्चलञ्च ।
व्याघ्री च वत्समतिवत्सलदृष्टिपातैः,
प्रीणाति याति यदि नाम भवत्समीपम् ॥ (युग्मम्) ९

ये वर्षलक्षसमरैरवितृप्तदृप्ता-
स्ते दानवा दिविषदश्च तवाधिवासे ।
एकान्ततः प्रणयनिर्भरचित्तवृत्ति-
स्मेराननाः परममित्रवदासते स्म ॥ १०

यत्प्राकृतं च सहजं च भयाय वैरं,
भूयस्तरं भवति वा भविनां भवेऽस्मिन् ।
देव ! त्वदाश्रयसमाश्रयणेन सद्य-
स्तप्ताप्सु तल्लवणवद् गलतीति जीतम् ॥ ११

वैरं च कारणिकमाधुनिकं पुराण-
माविर्भवत्यपि यदङ्गविरङ्गहेतुः ।

तत्तावकीननयनाञ्चलशीतसौम्य-
पीयूषवर्षशमितं भवति प्रियाय ॥ १२

विध्यायतीह दहनः सलिलप्रसङ्गे,
नैवोपयाति कथमप्यथ शीतलत्वम् ।
वैरं विरोचननिभं भवदन्तिके यत्,
प्रेमायते तनुमतामिति कौतुकाय ॥ १३

माहात्म्यमद्भुतमुदारचरित्रचित्रं,
चैतत्तवैव यदि वा हृदि वासनीयम् ।
दृश्येत किं न विषमप्यमृतायमानं,
यद् योगिनां गुरुकृपाफलसिद्धिभाजाम् ॥ १४

दृष्टिस्तवामृतमयी परमोपकार-
कर्त्री जगज्जनसमृद्धिहितैकबीजम् ।
यत्र स्फुरत्यवितथामृतवृष्टिरेव,
तत्रेति वैरशमनाय विभो ! नमस्ते ॥ १५

## ८. निरीतिभावातिशयवर्णनात्मक-
## श्री-चन्द्रप्रभस्वामि-स्तवः

(वसन्ततिलका)

चन्द्रप्रभाविशदकीर्त्तिनिवाससौधं,
चन्द्रोपलश्रुतसुधासुरसस्ववाचम् ।
चन्द्रोपमा परिमलामलसद्गुणौघं,
चन्द्रप्रभं प्रणिपतामि जिनाधिराजम् ॥ १

प्रक्षीणघातिकलुषे कलुषेतरश्री-
विभ्राजिनि क्रमविहारवशात् समीपम् ।
त्वय्यागते धरणिरुच्छ्वसति प्रदेशा
निष्कश्मलाः किल भवन्ति महीतलस्य ॥ २

जायेत जातकलुषेषु जलेषु शुद्धि-
र्वह्निः प्रदक्षिणविकज्जलपिङ्गलार्चिः ।
वातास्तदा सुरभयः शिशिराश्च मन्दाः,
सर्वातिचाररहितं गगनं विशुद्धम् ॥ ३

उत्फुल्लपल्लवमणीव कशालिशाखाः,
सालाः पचेलिमफलावलिभारनम्राः ।
निर्दूषणानि कणिशानि तथौषधीनां,
लोकाः समृद्धिमुदिता अपि सम्भवेयुः ॥ (त्रि. वि.) ४

त्वत्पाविते वसुमतीवलये न रोगा
नो मारयः क्वचन लोकमुपद्रवन्ति ।
त्वत्पादरेणुकणिका अमृतच्छटाभाः,
क्लेशप्रशान्तिमिह यन्नियतामकार्षुः ॥ ५

अभ्यापतत्युदयशैलशिरः पुरस्ता-
ज्ज्योतिःपतावपसरन्ति यथा तमांसि ।
एवं समापतति देव ! भवत्यवश्यं,
नश्यन्ति जानपदलोकरुजः समस्ताः ॥ ६

तावज्ज्वलन्ति गिरिवंशकुडङ्गशृङ्ग-
सङ्घर्षणप्रभवदावमिलज्झलक्काः ।

यावद् घनाघनघनानघवारिधारा-
गर्जोर्जिता न नभसः सरलाः स्रवन्ति ॥ ७

एवं जनानपि रुजन्ति रुजो रजोव-
त्तावच्चिराय चिरकालभवा नवा वा ।
दिष्टोदयाधिगमिकेयमनिष्टहन्त्री,
यावत्त्वदागमनवृष्टिरहो दविष्ठा ॥ (यु.) ८

दीपे ललत्यधिवसन्ति गृहेषु यानि,
निःशङ्कमेव तिमिराणि नु तानि कानि ।
एवं त्वदागमनपावितभूमिभागं,
येन त्यजन्ति कतमे परमामयास्ते ॥ ९

गन्धो यतो मलयभूधरचन्दनस्य,
स्युः शाखिनस्तदपरेऽपि ततः सुगन्धाः ।
एवं यतोऽपि तव पादपयोजरेणुः,
सर्वे ततो विरुज एव जना भवन्ति ॥ १०

स्नातुः सुधासरसि तत्र सुधां च पातुः,
सज्जाः समं सपदि पुद्गलधातवः स्युः ।
एवं जनास्त्वदुपगाः प्रगुणा भवेयुः,
सर्वाङ्गपुष्टिनिरवद्यविभाविशिष्टाः ॥ ११

वृष्टिर्न चातिबहुलाऽपि न चाप्यवृष्टि-
स्तत्रास्ति यत्र विहरन्नसि नाथ ! देशे ।
इच्छन्ति जानपदभूमिषु यावतीं तां,
कौटुम्बिका भवति तत्र हि तावती सा ॥ १२

पुण्यप्रतापपतिना परिरक्षिते ते,
देशे न मूषकगणाः शलभाः शुकाश्च ।
धान्यानि जातु जिनराज ! विनाशयन्ति,
नश्यन्ति तामथ विहाय त एव भूमिम् ॥ १३

वृष्टे मृदेऽपि मुदिरे निकरे कणानां,
निष्पत्तिभागिव यदन्नमहर्घ्यभावः ।
दुर्भिक्षमेतदपि देव ! तवाधिवासा-
दाशु प्रणश्यति फणीव विहङ्गराजात् ॥ १४

वैराद्यरिष्टदववारिधराय सेवा-
हेवाकिनैकजगती जनजीवनाय ।
अश्रेयसां सपदि निर्दलनाय भक्त-
श्रेयस्कराय जगतां गुरवे नमस्ते ॥ १५

## ९. गन्धोदकवर्णनात्मक श्रीसुविधिनाथ-स्तवः

(वसन्ततिलका)

विश्वातिशायि-विशदातिशयाधिवासं,
श्रीपुष्पदन्तमघमर्षणबद्धकक्षम् ।
नित्यं नमामि नतनिर्जरमौलिरत्न-
किर्मीरितद्युतिमनोरमपादपद्मम् ॥ १

छत्राम्बरैणमदकेसरकुङ्कुमौघ-
कर्पूरचन्दनवरागुरुमिश्रितेन ।

देवा भवच्चरणचङ्क्रमणोचितायाः,
पुण्याम्भसा विरचयन्ति भुवोऽभिषेकम् ॥ २

गन्धाम्भसा तमभिषिच्य महीप्रदेशं,
कुर्वन्ति शीतलतमं च ससौरभं च ।
अस्मिन् भविष्यति जनस्य कषायशान्तिः,
ख्यातिश्च तीर्थमिति चारु विचिन्त्य देवाः ॥ ३

नाना रसानि सलिलानि जलाशयेषु,
स्रोतस्विनीषु जलराशिषु वारिदेषु ।
दृष्टानि च श्रुतगिराऽपि निशामितानि,
गन्धाम्बुवृष्टिरपरत्र न कुत्र लब्धाः ॥ ४

पीयूषवृष्टिरियमेव सुगन्धवारि-
वृष्टिर्विशङ्कमिति चेतसि निश्चिनोमि ।
दुर्भिक्षविड्वरविरोधविकोपमारि-
रोगादिशान्तिरचिरादपि तत्र यस्मात् ॥ ५

विश्वैकपावनगिरागरिमोत्तमत्वं,
दुष्टं रजः शमयसीति किमद्भुताय ।
गन्धाम्बु यत्तव समागमनेऽभिवृष्टं,
देवैः शमं नयति तज्जगतीरजांसि ॥ ६

लोका वदन्ति न कदापि भवत्यनभ्रा-
वृष्टिर्वचस्तदपि च व्यभिचारि मन्ये ।
गन्धोदकं शुचि निरभ्रकमेव देवा
वर्षन्ति तात ! तव पादविहारभूमौ ॥ ७

गन्धाम्भसा सुरभिते धरणिप्रदेशे,
पुष्पावलीपरिमलैः परितोषभाजः ।
शृण्वन्ति ये तव सुधासरसं वचस्ते,
धन्या वयं नु भुवि भारकरा इव स्मः ॥ ८

यत्केतकीकुवलयागुरुचन्दनत्वग्-
मिश्रं पयः सकुसुमं मरुतः स्रवन्ति ।
त्वत्पादसङ्गमवशेन सुतीर्थभूतां,
तन्मेदिनीं स्नपयितुं महितुं नु पुष्पैः ॥ ९

कल्पद्रुमाः प्रतिपदं सुरमन्दिरेषु,
ये सन्ति नित्यफलपुष्पभृतस्तवेश ! ।
भक्त्या स्रवन्ति सुरभि स्वरसं मिषेण,
गन्धाम्भसः स्वकुसुमानि किरन्ति किं ते ॥ १०

मन्ये यशस्तव चिरं जगदश्नुवान-
माक्रान्तवत् किल कलाधरमण्डलान्तम् ।
चुश्च्योतयत्तदमृतं निभृतं मिषेण,
गन्धाम्भसः परिषदीश ! तवैव लभ्यम् ॥ ११

त्वद्देशनाधरणिरेति सुगन्धशुद्ध-
वारिच्छटाविरलबिन्दुभराभिषिक्ता ।
मिथ्यात्वतीव्रतरतापतपर्तुशान्तिं,
वर्षत्यपि त्वयि शुचौ वचनामृतौघम् ॥ १२

त्वय्यापतत्यतिपवित्रचरित्रसत्रे,
वारिच्छटां सुमनसो ददते सुगन्धाम् ।

पृथ्व्याः कुकर्मकलुषाशयदुर्जनौघ-
संसर्गदूषणविशुद्धिमिव प्रणेतुम् ॥ १३

गन्धोदकं परमसौरभशोभनं तत्,
सद्यस्ककल्पतरुपुष्पभरः सुगन्धः ।
कृष्णागुरुर्मृगमदो घनसार एभि-
र्व्यामिश्रितैरपि च धूपघटी सुगन्धा ॥ १४

तारुण्यविभ्रमससम्भ्रमभूरिमाद्यद्,
भृङ्गाङ्गनामधुरझङ्कृतिनादहेतुः ।
श्वासस्ततोऽपि तव तीर्थपते ! सुगन्धः,
कं कं न मोदयति देव ! ततो नमस्ते ॥ १५

## १०. कुसुमप्रकरवर्णनात्मक-
## श्री-शीतलनाथ-स्तवः

(वसन्ततिलका)

लोकत्रयीविजयिनो विजयाः कषाया-
श्चेतः स्पृशन्ति न यदीयमगाधबोधम् ।
पीयूषशीतलगिरं ललितप्रबन्धै-
स्तं शीतलं जिनपतिं प्रयतः स्तवीमि ॥ १

वृन्तव्रजं कुसुमराशिरधो दधानो,
जाने जनाय कथयत्यविराममेवम् ।
आधारधामदृढतां चिरमाप्नुवन्ति,
ये सम्मुखास्त्रिजगदीशितुरस्य लोके ॥ २

वृष्टिः सुरद्रुमसुगन्धमणीवकानां,
जायेत या च गगने चरचारुमुक्ता ।
लोकत्रयीश ! तव पादविहारभूमौ,
पुष्पाणि तान्यपि न हि त्वदवाङ्मुखानि ॥ ३

पुष्पाणि यानि परितः परितः पतन्ति,
सर्वाणि तानि यदधःस्थितबन्धनानि ।
तान्याहुरस्य भजनादुपयान्त्यधोऽधो,
दुष्कर्मणां युगपदेव हि बन्धनानि ॥ ४

त्वत्पादसेवनकृते परितः पतन्ति,
पुष्पाणि यद् गगनतः खचरान् विहाय ।
तेषामथानुपदमैयरुरेव देवा-
स्ते देवराजसहितास्त्वमतोऽसि सेव्यः ॥ ५

अभ्यापतन्ति कुसुमानि भवन्तमीश !,
पुष्पेषु बाणनिवहा इव भान्ति भूयः ।
तानि प्रसह्य चरणाक्रमणोचितानि,
त्वं लीलया जिनपते ! पतितान्यकार्षीः ॥ ६

यः कौसुमः प्रकर एष पदाब्जलीन-
स्त्वां विज्ञ विज्ञपयतीति रहः प्रहस्य ।
पुष्पायुधः परिहृतस्त्वमुपाश्रितोऽसि,
तन्नाथ नाथ ! कुरु कोपमितोऽस्मदर्थे ॥ ७

क्षेत्रे च योजनमिते परिषन्निवासे,
पूर्येत यः सुमनसां प्रकरः सुरेन्द्रैः ।

तत्सौरभैर्दशदिशोऽपि हि वास्यमानाः,
सर्वत्र बिभ्रति तवागमनाभिलाषम् ॥ ८

सभ्याश्रये सुमनसः प्रकरं किरन्ति,
क्षेत्रे वयं सुमनसां तव जानुदघ्नम् ।
सार्वत्रिकश्च सुरभिश्च चतुष्प्रकार-
वर्णाश्रयोऽपि भवतीश ! स पञ्चवर्णः ॥ ९

त्वद्धर्मसंसद उपर्युपरि प्रमुक्त-
पुष्पोच्छ्रितः प्रकर एष विशेषमाह ।
यत्रैककस्तदवगाहमनन्तमुक्ता,
यत्रापुरास्पदमदः कृपया तदाप्यम् ॥ १०

देव ! त्वदीयसदसि प्रकरस्थितानि,
पुष्पाण्यपि प्रकटमेवमुदाहरन्ति ।
एतस्य चारुचरणार्चनचञ्चुचित्ताः,
सेव्याः परं वयमिवाशु न सेवकाः स्युः ॥ ११

पुष्पाणि तानि तव पादतलं निलीय,
गृह्णन्तु नाम जगदीश्वर ! सौकुमार्यम् ।
आजन्म यत् परिचितं सकलाङ्गसङ्गि-
चित्तावधिस्थिरतरं तु न हीयते तत् ॥ १२

नानाविधानि कुसुमानि तवाङ्घ्रिसेवा-
तात्पर्यमाशु दधतीति विभावयन्ति ।
एनं भजन्ति भुवि ये परितः परेषां,
ते संश्रयन्ति लघवोऽपि शिरःप्रदेशम् ॥ १३

मन्दारसारकुसुमान्यवचित्य देवा-
स्त्वद्देशनावनिमितः परिपूरयन्ति ।
हल्लीसकाद्भुतमितः परिपूरयन्ति,
प्रस्तावतो मृदुपदा दिविषन्मृगाक्ष्यः ॥ १४

निरवधिगुणरत्नस्थापनामूलकोशं,
निरुपधिनिरुपाधिज्ञानतेजोनिवासम् ।
सुपरिकलितभावाभावविश्वस्वरूपं,
तनुवचनमनोभिः शीतलेशं नमामि ॥ (मालिनी) १५

## ११. धर्मचक्रवर्णनात्मक-श्री-श्रेयांसनाथ-स्तवः

(वसन्ततिलका)

श्रेयस्तरुव्रततिवर्द्धनवारिवाहं,
श्रेयांसमुज्ज्वलविशालकपोलदेशम् ।
नित्यं नमामि नतनिर्जरनायकस्त्री-
निर्दिष्टचारुवचनाचलचित्तवृत्तिम् ॥ १

चक्रं जयत्यरसहस्त्रविराजमानं,
मुक्तावचूलमणिकिङ्किणिकावनद्धम् ।
सद्वर्तुलं मघवलालितवर्यवज्र-
धारानिशातनवनिर्मलनेमिकोटि[म्] ॥ २

चक्रं पुरस्तव सहस्त्रकरोपमानं,
देदीप्यमानमतिमानमिदं जनाय ।

आवेदयत्यवितथं जिनचक्रवर्ती,
विश्वत्रयेऽयमुदितोदितवैभवश्रीः ॥ ३

चक्रे पुरश्चलति तत् परतन्त्रवृत्ति-
श्चक्री चलत्यनुपदं विजयावनीषु ।
तस्मिंश्च तिष्ठति स तिष्ठति चक्रवर्ती,
कर्मानुगामिभविनामिदमेव रूपम् ॥ ४

निःशेषदूरितदुरायतिघातिकर्मा,
त्वं यत्र कुत्रचन सञ्चरसि प्रदेशे ।
चक्रं पुरश्चलति तत्र विभासमानं,
तच्च स्थिरं स्थितवति त्वयि विश्वभर्त्तः ॥ (यु.) ५

चक्रं पुरस्तव तदान्तरवैरिचक्रं,
भेत्तुं बिभर्त्ति निशितं परिधिं बहिस्तात् ।
बिभ्यत्यदस्तव सदः प्रविशन्त एव,
तन्मोहमत्सरमदस्मरमुख्यदोषाः ॥ ६

चक्रेण तेन च तथा कथमप्यपार-
तेजःस्फुलिङ्गततिभिर्ज्वलितं जगत्याम् ।
अज्ञानमोहनकलङ्कितदृक्प्रचारा
धूमान्धिता इव यथा भृशमान्ध्यमापुः ॥ ७

चक्रं तव स्फुरदपारमहः प्रकाशं,
मन्यामहे वयमुदित्वरमेव सूर्यम् ।
घूकायितं विमतिमीलितत्त्वदृग्भिः,
प्रद्योतते स्म भुवनत्रितयं च तस्मात् ॥ ८

अग्रेसरं सुकृतचक्रमहामहस्ते,
भामण्डलं द्युतिवितानमयं च पृष्ठे ।
मध्ये तयोर्विमलकेवलबोधभृत्त्व-
मेवं विहारसुभगो जगति त्वमेकः ॥ ९

बाह्यान्धकारभिदुरं तव धर्मचक्रं,
भामण्डलं च जिननायक ! नित्यदीप्तम् ।
अन्तस्तमांसि विनिहन्तुमचिन्त्यशक्ति,
ज्ञानं तव स्फुरति दूषणविप्रमुक्तम् ॥ १०

पाणौ च पादकमले च पुरश्च चक्रं,
धत्से जगत्त्रयपते ! सममेव तेन ।
द्वेषं च रागमयि मोहचमून्निरास्थः,
केनायुधेन विषमायुधमप्यजैषीः ॥ ११

चक्रं तवोदयगिरिस्थितमर्कबिम्बं,
प्रातर्भवत्यपि मयूखसहस्रमालि ।
तत्पश्यतामनुदिनं तु सुधाञ्जनाक्तं,
सम्यग्दृशां नयनयामलमद्भुताय ॥ १२

चक्रं तथा च तव चण्डमरीचिरोचि-
रुद्दीप्यते स्म जगति क्षपितान्धकारम् ।
अस्तङ्गतिर्ननु यथा च न वासतेयी
नेतस्ततश्च गमनं न दिनप्रहाणिः ॥ १३

सच्चक्रमोदनमनन्तरितः प्रकाश-
स्त्रस्तानि पापबलतस्करपेटकानि ।

सन्मार्गगामिचरणोद्यमसंविदानं,
पद्मोदयः समुदितः परितः पृथिव्याम् ॥ (यु.) १४

न हि महि[म]निमित्तं नापि सम्पन्निमित्तं,
चरणकमलयुग्मं तावकं नाथ ! सेवे ।
अविघटितमिदं मे मानसं शासने ते,
भवति सुचिरमेवं चैक एषोऽभिलाषः ॥ (मालिनी) १५

## १२. इन्द्रध्वजवर्णनात्मक-श्री-वासुपूज्यजिन-स्तवः

(वसन्ततिलका)

वीर्यान्तरायनिचयक्षयनिर्मलौज-
स्तेजोऽनुभावपरिभूतमहाविमोहम् ।
श्रीवासवासवनिषेवितपादपद्मं,
श्रीवासुपूज्यजिननायकमानवानि ॥ १

ईषत्तरं रणझणायितघर्घरौघ-
घण्टामणीमुकुरकिङ्किणिमालभारी ।
इन्द्रध्वजस्तव वितन्द्रतरः पुरस्ता-
दाभाति योजनसहस्रमजस्रमुच्चः ॥ २

माणिक्यनीलमणिवज्रविदूरजात-
मुक्तादिरत्नखचितः प्रवितः खमध्ये ।
ऊर्ध्वं च चन्द्रमणिकुम्भशुभस्तवायं,
चेतः प्रमोदयति देव ! सुवर्णदण्डः ॥ ३

अभ्रंलिहस्तव जिन ! ध्वज एष ताभि-
र्ध्वान्तं भिनत्ति निजरत्नमणिप्रभाभिः ।
आलेख्य दीपनिभताङ्गमितानि तानि,
द्योतींषि याभिरभितो गगनेचराणि ॥ ४

ईषत्प्रभञ्जनपराहतिहारिलील-
श्वेतःसुखाय जिनराज ! तव ध्वजोऽयम् ।
प्रत्तोर्णनेत्रसुरचीनजनिः प्रवाणि,
क्षौमांशुकोल्ललितवल्गितवेल्लिताढ्यः ॥ ५

नानासुवर्णमणिमण्डनमण्डितोऽसा-
विन्द्रध्वजः शुभति देव ! पुरस्तवैव ।
कल्पद्रुमप्रसवसन्मकरन्दपान-
पीनभ्रमद्भ्रमरगीतिनिनादनन्दी ॥ ६

इन्द्रध्वजस्तव मरीचिसहस्रमाली,
देवायुधाङ्कितमिवाऽऽतनुतेऽन्तरिक्षम् ।
मन्ये धियेति मदनो यदि पुष्पधन्वा,
स्वामी ममायमुदितो प्रणिरश्मिधन्वा ॥ ७

पुष्पेषु तेषु च भवन्ति विचित्रवर्णाः,
प्रत्येकमेककुसुमे तु स एक एव ।
एतत्तदेकमपि वर्णितपञ्चवर्णं,
पञ्चेषुधिकृतिधिया निरमायि किन्तु ॥ (यु.) ८

एष ध्वजस्तव जिनेश्वर ! संवरेण,
विस्तारितोर्ध्वमिव तर्जनिकोऽर्जयन्ती ।

विश्वत्रयी कदनकण्टकदर्पभाजं,
कन्दर्पसर्पमथ तर्जयितुं जगर्ज ॥ ९

उत्पश्यतस्तव जिनेन्द्र ! महेन्द्रदण्डं,
नानारुचीनिचयवीचिविरोचमानम् ।
शृङ्गाणि तुङ्गतममोहमहीधरस्य,
दूरं गलन्ति गलितानि पुनर्गलन्ति ॥ १०

अत्यन्तमुच्छ्रिततमो भुवनैकभर्त्त-
रिन्द्रध्वजो गगनमुल्लिखति प्रसह्य ।
एतद्भिया स च विहायसि नाकिदण्ड-
स्तिर्यग् भ्रमन् यदपरापरदिक्षु शेते ॥ ११

दण्डः प्रसूनधनुषः शिरसि प्रचण्डः,
सोऽयं जिनेश ! भवतो मणिरत्नदण्डः ।
तद्दण्डखण्डनकरं यदखण्डमेक-
मेतद् बलं तव जगत्यपि नेतरस्य ॥ १२

इन्द्रध्वजस्तव पुरः पथि सञ्चरिष्णु-
श्चित्रीयते गगनचारिगणस्य चित्ते ।
आदित्यमण्डलमिदं कलसायते स्म,
तस्योपरि क्षणमनुत्सुकमेतदित्थम् ॥ १३

निश्चेतनोऽपि भवतः सरलः पुरस्ता-
दिन्द्रध्वजो वियति सञ्चरति प्रभोऽयम् ।
यश्चेतनोऽपि कुटिलस्त्वयि चेतनावान्,
कश्चेतनं तमपि चिन्तयति स्वचित्ते ॥ १४

चेतो विशुद्धिकरमेव विभाव्यमानं,
माहात्म्यमेव मुदितोदितमद्भुतं ते ।
तद्देवराजनरराजभुजङ्गराज-
संसेव्यमानचरण ! प्रणिदध्महे त्वाम् ॥ १५

## १३. समवसरणवर्णनात्मक-
## श्रीविमलनाथ-स्तवः

(वसन्ततिलका)

त्वं नामतोऽपि विमलः परिणामतोऽपि,
सेव्यस्ततस्त्वमसि विश्वजनस्य सम्यक् ।
सेवाफलं च भवतोऽधिगतं महद्भि-
स्त्वामेव सेवकसदाफलमाश्रितोऽस्मि ॥ १

यद्दैवतो बहुमतो निजसन्निवेशात्,
कोणस्त्वयाऽपि भुवनत्रयनायकेन ।
देवत्रये विमतिविश्लथमूढचित्तै-
र्देवः सपङ्क्ति चरमः कथमप्यघोषि ॥ २

शीतेन सौरभवतापि च मन्थरेण,
वातेन निर्जरगणाः स्वविकुर्वितेन ।
भूरेणुभस्मतृणकण्टककाष्ठशीर्ण-
पत्राणि तत्र परितः परिशाटयन्ति ॥ ३

आयोजनं सुरभिवृष्टिजलच्छटाभिः,
सिक्तेऽथ पांशुनिवहे निभृते धरण्याः ।
पीठं मणीकनकरत्नमयं सुवृत्तं,
दूरोन्नतं विरचयन्ति च तत्र देवाः ॥ ४

पीठाधिरोहभुवि दक्षिणतश्च वामे,
सोपानपद्धतिनिबन्धसुखावतारा ।
उन्निद्रतामरसकेसरपिञ्जराम्बु-
पीयूषवारिघटिका इव पुष्करिण्यः ॥ ५

पीठस्य चोपरि महीमुकुरस्य मौलि-
देशो यथा किल समा च सुसंहता च ।
ईषत्तरामुभयतोऽप्युदितोदिता च,
निःकश्मला च मसृणा च मनोहरा च ॥ ६

सा चावनी मरकतोत्तमपुष्पराग-
ज्योतीरसाङ्ककुरुविन्दमहाशिलाभिः ।
बद्धा दृढं हरितपीतवलक्षशोण-
वर्णा महागिरितटीव विराजति स्म ॥ ७

तत्रावनौ सुरभिगन्धजलच्छटाभि-
षेकः पुनः पुनरपि क्रियते स्म देवैः ।
सद्यस्ककल्पतरुपुष्पभरं किरद्भि-
रापूर्यते स्म परितः प्रकरः पवित्रः ॥ ८

पीठस्य तस्य चतसृष्वपि दिक्षु वज्र-
माणिक्यमौक्तिकविभक्तिविचित्रचित्राम् ।
वैडूर्यचन्द्रकुरुविन्दमणीशिलाभिः,
सोपानपङ्क्तिरमरा रचयन्ति तत्र ॥ ९

उत्तालतालकलनाकुलशालभञ्जी,
गीतप्रणीतवरताण्डवडम्बराढ्यैः ।

स्तम्भावुभौ शिरसि कृत्रिमकेकिकेका-
रज्यत् किकीदिविशुकध्वनिदर्शनीयो ॥ १०

अस्त्री सहस्रघटितामलशातकुम्भ-
कुम्भौघनिर्दलितमेरुशिखाभिमानौ ।
उत्तुङ्गतोरणविभूषितमध्यदेशौ,
प्रत्येकमेतदुपरि प्रकृतौ च तत्र ॥ ११

तत्तोरणं मुकुरकोटिविलम्बिपुष्प-
मालासलीलमकराननैकचिह्नम् ।
नानामणिच्छुरितराजतहैमकुम्भं,
स्तम्भद्वयोपरि चकास्ति च दिक्चतुष्के ॥ १२

चत्वारि तत्र जिननायक ! तोरणानि,
स्तम्भेषु तानि विदितानि सुरैः कृतानि ।
मन्ये रवी च शशिनावपि तेषु जम्बू-
द्वीपस्थिता इव शिरस्सु विभान्ति कुम्भाः ॥ १३

ऐक्षन्त तान्यथ विधाय त एव देवा,
दृग्मानुषी तु न हि तावदवाप देशम् ।
सा चेदधो मणिशिलासु निरीक्षितेन,
तद्बिम्बितेन चिरमेव सुखानि लेभे ॥ १४

एवंविधां तव विभावयतां विभूतिं,
केषाञ्चिदुज्ज्वलपुरातनपुण्यभाजाम् ।
आपूरितानि नयनानि सुधारसेना-
ऽस्माकं तु तत्र मनसैव धृतिः सुखाय ॥ १५

## १४. प्राकारत्रयवर्णनात्मक-
## श्री-अनन्तनाथ-स्तवः

(वसन्ततिलका)

जन्मावसानगददुःस्थितिविस्रसादि-
क्लेशा मनागपि वयं न पराभवन्ति ।
तं स्तौम्यनन्तपुरनाथमनन्तबोधं,
सुस्वामिनं स्वयमनन्तमनन्तनाथम् ॥ १

भक्त्या तवेश ! मणिरत्नसुवर्णपीठं,
चक्षुर्विमोहनकरं विरचय्य देवाः ।
आसूत्रयन्ति रजतार्जुनरत्नभित्तिः,
सालत्रयं क्रमसमुन्नतमेतदूर्ध्वम् ॥ २

तत्रादिमो रजतकुण्डलवत् सुवृत्तः,
सौवर्णवर्ण्यकपिशीर्षकपङ्क्तिशाली ।
वप्रः स चन्द्रधवलः कलधौतभित्तिः,
क्षीरोदवीचिचयधौत इवाऽऽविभाति ॥ ३

तत्पिण्डतामुपगतं यश एव भर्त्त-
स्त्वत्तेजसां निवहमावहतीव मूर्ध्नि ।
लोके यशो विशदमुज्ज्वलतेजसः स्या-
ल्लोकोत्तरं चरितमस्मदगम्यमेतत् ॥ ४

एकाश्रयाणि भुवनत्रयसम्भवानि,
पुष्पाणि किं शतदलानि विधाय मन्ये ।
विश्वत्रयी सुरवरा विदधुस्तदूर्ध्वं,
भक्त्या तवात्र किमु चम्पकपुष्पपालीम् ॥ ५

कैलासवास इति लोकत ईश्वरस्य,
ख्यातिं निशम्य विबुधाः प्रथमेऽत्र दुर्गे ।
कैलासशृङ्गमवतार्य सुमेरुशृङ्ग-
च्छेदैरिवोपरि विशिष्य विभूषयन्ति ॥ ६

यस्ते सुवर्णरचनासुभगो द्वितीयो,
वप्रः सुवर्णवलयोपमितः पृथिव्याः ।
प्रद्योतिरत्नकपिशीर्षकराजिराजी,
चेतः प्रमोदयति देव ! चिराय दृष्टः ॥ ७

वह्निर्यथा मधुघृताहुतिजातदीप्ति-
श्चित्रस्फुलिङ्गकणशोभिशिखः सुखाय ।
दुर्गस्तथैव तव देव ! विमध्यमोऽय-
मानन्दयत्यविरलङ्कृतिनां मनांसि ॥ ८

देव ! प्रताप इव पावनपार्श्ववर्ती,
नानाविधातिशयसञ्चयरोचमानः ।
वप्रः सुवर्णरचनोचितरत्नचूल-
श्चेतःसुखाय सुचिराय तव द्वितीयः ॥ ९

भूषाविनिर्गलितनिर्मलहेमवर्ण-
निर्वर्ण्यमानसुपवित्रपतत्वमूर्त्तेः ।
जाज्वल्यते यदि मणिर्गरुडस्य शीर्षे,
दृश्येत तत्तव विमध्यमसालसाम्यम् ॥ १०

प्राकार उन्नततरस्तव यस्तृतीयः,
सद्वर्णरत्नरचनासुभगम्भविष्णुः ।

दिव्यानुभावमणिमण्डितचारुचूलः,
सोऽपि प्रमोदमणिरोहण एव मन्ये ॥ ११

रत्नानि तानि मणयश्च धियेति ते ते,
कृत्वा भवद्वरणवासमुपासते त्वाम् ।
अस्मासु बाह्यमियदेव च देवतेज-
स्तन्नश्चिरादनुगृहाण गृहाण कीर्त्तिम् ॥ १२

रत्नानि तान्यथ गुणा मनसीति मन्ये,
सल्लब्धयश्च मणयस्तदुपर्यमेयाः ।
त्वामेव देव ! जगदेकविभुं भजन्ते,
साकल्यतः क्वचिदनन्यनिवासभाजः ॥ १३

रत्नत्रयं समुपलभ्य भवाम्बुराशौ,
सङ्गृह्य निर्मलतरं तदथ प्रकुर्वन् ।
त्वं सेव्यसे सकलरत्नमणीसमूहैः
कम्बुव्रजैरिव समुद्धृतसृष्टिकम्बुः ॥ १४

त्वन्नाम नामगुणसङ्ग्रहतस्तदानी-
मापुः शमं जनरुजः किमितीह चित्रम् ।
नामाऽपि ते श्रुतमनन्तदुरन्तरोग-
क्लेशापदः शमयति प्रणतोऽस्मि तुभ्यम् ॥ १५

## १५. चैत्यतरुवर्णनात्मक-श्रीधर्मनाथ-स्तवः

(वसन्ततिलका)

कैवल्यकौशल-यथातथ-निर्विलम्ब-
हृष्टोपदिष्टनवतत्त्वपदार्थकोशम् ।

श्रीधर्मतीर्थपतिमुद्धृतधर्मरत्नं,
धर्माऽऽप्तयेऽनुदिनमादरतः स्तवीमि ॥ १

सम्प्राप्तकेवलविदि त्वयि योजनान्तं,
पीठं निबध्य विरचय्य च तत्र सालान् ।
तन्मध्यतो विरचयन्ति च पीठिकायां,
किङ्केल्लिवृक्षमभिवृष्य सुराः प्रसूनैः ॥ २

विश्वत्रयेश ! फलदस्तव चेदशोक-
स्तत् किं वृथा मनसि कौतुकमाविरस्ति ।
त्वत्तः फलानि विविधानि च कामयन्ते
ये तेऽपि तावकदृशैव भवन्त्यशोकाः ॥ ३

यः प्रागपि प्रथित एव जगत्यशोक-
स्त्वत्सङ्गतः स सुतरां भवतादशोकः ।
ये शोकमग्नमनसः कृतपूर्वपापा-
स्तेऽपि स्युरेव तव संसदि वीतशोकाः ॥ ४

आरण्यकोऽपि यदि देव ! विचेतनोऽपि,
शोकं जहाति सविधे तव पादपोऽपि ।
त्वत्सन्निधौ कुमनसः कथमीश ! वाच्या,
ये नागराः सुमतयो वदनाशिनस्ते ॥ ५

शोकं जहौ तव तरुः सहसैव शोक-
स्तं वा जहौ भवति तत्कथमित्यशोकः ।
व्युत्पत्तिरेव मुदितोभयथापि लोके,
तन्निर्णयो यदि परं भवतः प्रसादात् ॥ ६

शोकस्त्वया क्षपित एव हि हास्यषट्के,
निर्मूलतः प्रथमतः क्षयमेव नीते ।
तत् त्वद्भिया भवदुपान्तगते द्रुमेऽपि,
धत्ते न सङ्क्रमितुमप्यभिलाषमेषः ॥ ७

उत्तेजितामलिनविद्रुमपल्लवौघः,
सत्पद्मरागफलभारविनम्रशाखः ।
उन्निद्रमञ्जुलजपाकुसुमाभपुष्प-
च्छायाविदूरितखरांशुकरोपतापः ॥ ८

फुल्लत्फलावलिविचर्वणमोदमाद्यत्,
कीरावली कलकलारवकेलिशाली ।
उन्निद्रमञ्जरिमनोरमभोज्यरङ्ग-
रज्यत् पिकी चतुरपञ्चमगीतिवङ्गः ॥ ९

सर्वर्तुसङ्क्रमसदोद्गमकोरकाङ्क-
स्मेरप्रसूनपटलातुलसौरभाढ्यः ।
वायुश्चरन्मधुकरीसहचारिभृङ्ग-
झङ्कारविभ्रमविमोहितकर्णनेत्रः ॥ १०

आरक्तपल्लवदलप्रसवारुणश्रीः,
कल्याणकोश इव केसरकुङ्कुमाक्तः ।
छत्त्रत्रयोद्धरणशोभिशिरःप्रदेश-
श्चैत्यद्रुमो जयतु देव ! चिरं तवायम् ॥ (च. क.) ११

बालार्कविद्रुमजपारुणबन्धुजीव-
नारङ्गगौजदलकिंशुकपद्मरागान् ।

निर्जित्य शोणिमभरेण तवैष वृक्ष-
श्छत्राणि धारयति मूर्द्धनि युक्तमेव ॥ १२

श्रीखण्डभूर्जहरिचन्दनपारिजात-
च्छायातरुप्रभृतयो गणशोऽपि वृक्षाः ।
नैकोऽपि चैत्यतरुणा समतामुपैति,
यस्ते जगत्त्रयपतेरपि माननीयः ॥ १३

तपस्तप्त्वा क्षिप्त्वा कलुषकटुकर्माण्यधिगतो,
यदीयच्छायायां त्वमसमशमः केवलविदम् ।
तरुर्धर्मक्षेत्रे स खलु विहितः पञ्च गुणवा-
नपि स्थाने देवैः सपदि भवतो द्वादशगुणः ॥(शिखरिणी) १४

अपरिमितमहिम्नः कीर्त्यसे त्वं निवासः,
सुपरिकलिततत्तद्विश्ववर्त्तिप्रमेयः ।
निजगुणपरिवृद्ध्यै धर्मनाथ ! त्रिलोकी-
परिवृढनतपाद त्वां नमस्यं नमामि ॥ (मालिनी) १५

## १६. छत्रत्रयवर्णनात्मक-श्रीशान्तिनाथ-स्तवः

(वसन्ततिलका)

षट्खण्डभूमिभरतप्रभुमामनन्ति,
त्रैलोक्यनाथमपि यं शतशः प्रवीणाः ।
श्रीशान्तितीर्थपतिमर्थसमर्थनेन,
भक्तार्थिनस्तमभिनौमि कृतार्थयन्तम् ॥ १

द्वात्रिंशदातपनिवारणसत्सहस्रा-
ण्यामृद्य यद्वसुमतीं कथमप्यकार्षीः ।

एकातपत्रसुभगामथ तां विहाय
छत्रत्रयाय यतमान जिनेन्द्र ! जीयाः ॥ २

रागं च रोषमथ मोहमसून् विजित्य,
लोकत्रयी कुटिलकण्टकरूढिभाजः ।
युक्तं भुजोर्जितविवर्जितवैरिगर्ज-
च्छत्रत्रयं शिरसि धारयसे सुरेन्द्रैः ॥ ३

विश्वत्रयं परितताथपुलस्त्यजन्मा,
तं च स्मरः शरवशंवदमाततान ।
तं मन्मथं मथितवानसि तत्तवाऽथ,
छत्रत्रयं शिरसि सङ्गतमेव नाथ ! ॥ ४

पातालवासिपतयः पृथिवीभुजश्च,
स्वर्वासिनां परिवृढाश्च नमन्ति यत्त्वाम् ।
तल्लोकनायक ! तवोपरि धीयमानं,
छत्रत्रयं जगति सम्प्रति वारयेत् कः ॥ ५

यद्देव ! माण्डलिकभूपतिसार्वभौम-
तीर्थेश्वरत्वपदवीवरवैभवानि ।
लब्धानि तत्र भवता (भवतो?)भवन्ति,
छत्राणि मूर्ध्नि तव तद्गुणसम्मितानि ॥ ६

योगाङ्गकष्टपरिशीलनतो भवन्ति,
ज्ञानानि निर्मलतराणि न कौतुकं तत् ।
ज्ञानत्रयं गहनगर्भगतोऽप्यधस्ता-
च्छत्राणि मूर्द्धनि सुरास्तव धारयन्ति ॥ ७

ज्ञानानि यानि तव गर्भगतस्य तानि,
द्रव्यादिभिस्तरतमावगमोच्छ्रितानि ।
छत्राणि तेन नितरामुदितोदितानि,
तीर्थेश ! मूर्द्धनि दधुस्त्रिदशास्तवैते ॥ (यु.) ८

रत्नत्रयं सदसि बोधयितुं समर्थः,
स्वामी स एष न परो भुवनत्रयेऽपि ।
वैमानिका इति निवेदयितुं जनानां,
छत्रत्रयं दधति मूर्द्धनि तावकीने ॥ ९

छत्रत्रयं गगनगामि तवादधाना,
वैमानिकाः किमिति चारु निवेदयन्ति ।
विश्वत्रये कटुविपक्त्रिमपापताप-
निर्वापकः परमयं परमेष्ठिधुर्यः ॥ १०

प्राग्जन्मचीर्णसुकृतोऽत्र भवेऽस्य सेवां,
पुण्यादवाप्य स भजन् सुकृतान्यमुत्र ।
जन्मत्रयं सफलयत्यभिधारयन्त-
श्छत्रत्रयं तव सुराः किमिदं वदन्ति ॥ ११

दूरं विदूरमथ दूरतरं दधाना-
श्छत्रत्रयं शिरसि ते कथयन्ति देवाः ।
सत्त्वं रजस्तम इहेति गुणत्रयं यद्,
व्यापज्जगन्त्यपि तदेतदितो दविष्ठम् ॥ १२

वेदत्रयोपनिषदं स्वमठे पठन्त-
स्तत्र स्वरत्रयमखण्डितमुच्चरन्तः ।

वह्नित्रयं च हविषा परितोषयन्तो,
देवत्रयं प्रणिहिता अपि पूजयन्तः ॥ १३

एनं जगत्त्रयपतिं करणत्रयेण,
नोपासते परमभक्तिभृतस्तु यावत् ।
तावद्विदूरमपवर्गपदादितीव,
छत्रत्रयं तव सुरा दधतो वदन्ति ॥ १४

मूलाङ्गपूर्वसमयस्थितिमूलबीजं,
या वर्ण्यते त्रिपदगीरविगीतवर्णा ।
तद्भाषणेऽतिनिपुणो भगवन् ! भवांस्तत्,
छत्रत्रयं शिरसि धारयते नमस्ते ॥ १५

## १७. चामरवर्णनात्मक-श्रीकुन्थुनाथ-स्तवः

(वसन्ततिलका)

आकुन्थुकीटमपि कारुणिकाय तुभ्यं,
ये कुर्वते सुकृतिनः सततं नमस्याम् ।
निःश्रेयसावधिसुखानि हि ते लभन्ते,
तत्त्वां नमाम्यहमपि प्रभुकुन्थुनाथम् ॥ १

कैलासनिर्मलशिलाभरभङ्गिरङ्गद्-
गङ्गातरङ्गपृषतप्रकराभिरामा ।
उच्चामरास्तकरविश्लथवीज्यमान-
सच्चामरावलिरियं तव देव ! भाति ॥ २

कर्पूरपूरविशदा तव चामराली,
नालीकरोचिरुचिता सुचिराय चित्ते ।

निर्दूषणाणुकणसङ्गमसंयमाङ्ग-
मूलोत्तरानणुगुणामलपङ्क्तिरूपा ॥ ३

क्षीरोदसागरतरङ्गशिरःस्थरङ्गद्-
डिण्डीरपिण्डसुभगा तव चामराली ।
मन्ये महामहिममण्डितधर्मशुक्ल-
ध्यानद्वयी च परितः परिवर्त्तमाना ॥ ४

आसेव्य दुष्कृतसमुत्खननाय शुक्ल-
ध्यानस्य भेदयुगलं धुरि वर्त्तमानम् ।
हित्वा तदप्यथ तवोद्यमिनस्तदीयं,
भेदं तृतीयमपि चाऽन्तिममारुरुक्षोः ॥ ५

अस्मद्बलेन पदवीमियतीमवाप्य,
नाथ ! त्वया परिहृतावधुना किमावाम् ।
शुक्लस्य तौ चमरपङ्क्तिमिषेण भेदौ,
विज्ञप्तिमीश ! कुरुतः किमु कर्णमूले ॥ (यु.) ६

एते वदन्ति कवयः सुरदीर्घिकायाः,
स्रोतस्त्रयं यदमलं जनपावकं च ।
तत्सेवते चमरयुग्मसितातपत्र-
व्याजाद् भवन्तमघमात्मगतं निहन्तुम् ॥ ७

यः सर्वदेशविरतिप्रविभेदभिन्नो,
धर्मस्त्वया निगदितः परमार्थरूपः ।
संसेवते स इव चामरचारुयुग्म-
व्याजेन देव ! भवभीतिहरं भवन्तम् ॥ ८

कालोऽपि यः सकलवस्तुगतौ बलीयान्,
तस्याऽपि पक्षयुगलं न परं वलक्षम् ।
पक्षद्वयं तु विमलं चमरौघदम्भात्,
कालं जिगाय भगवानिदमेवमाह ॥ ९

त्वच्चामराणि निपतन्ति समुत्पतन्ति,
संसारिणामिति भवस्थितिभावुकानि ।
मा मंशतः स्थिरतरा भविनां विपद्वा,
सम्पच्च वा तदिह वः कतमो विमोहः ॥ १०

सौवर्णदण्डविरलश्लथसन्धिवल्ग-
न्माणिक्यमञ्जुवलयावलिनादवन्ति ।
ईषन्निपत्य पुनरेव समुत्पतन्ति,
त्वच्चामराणि किल कं न विमोहयन्ति ॥ ११

निष्कश्मलामलसुकोमलदीप्तदीर्घ-
सुस्निग्धसूक्ष्मशुचिसञ्चितरोमवन्ति ।
आमोदमोदिमृदुमारुतलोलितानि,
त्वच्चामराणि मनसैव विभावयामः ॥ १२

आभाति निर्जरकराम्बुजलाल्यमाना,
स्वर्धेनुदुग्धधवला तव चामराली ।
मन्ये विभो ! गगनगाङ्गतटान्मराली-
पङ्क्तिर्भवन्तमिव सेवितुमुत्तरन्ती ॥ १३

आपूर्णमण्डलकलाधररम्यरोचि-
श्चेतोहरा सकलमङ्गलमूलबीजम् ।

वृन्दारकैरुभयतस्तव देव ! मुक्ता,
मुक्तामणिस्रगिव राजति चामराली ॥ १४

स्तुतिं तव चिकीर्षता जडधियाऽपि यद्वल्गितं,
मया महिममेदिनीवलयितप्रभावाम्बुधे ।
न तत्र किल विस्मयः किमपि कारणं न स्मय-
स्तवाऽतिशय एव मां मुखरयत्यखण्डोदयः ॥ (पृथ्वी)१५

## १८. सिंहासनवर्णनात्मक-श्रीअरनाथ-स्तवः

(वसन्ततिलका)

वीरावदातरसिकश्चतुरन्तसीम-
क्षोणीतलं समुपभुज्य विहाय राज्यम् ।
यः कण्टकोद्धरणमन्तरपि प्रचक्रे,
स श्री-अरो वसति मे हृदि तीर्थनाथः ॥ १

सिंहासनं स्फटिकरत्नमयं पुरश्च,
नानामणिच्छुरितकाञ्चनपादपीठम् ।
अत्रागता अनिमिषा अनिमेषलक्ष्यं,
कुर्वन्ति सार्व ! तव खर्वितमोहगर्वम् ॥ २

निर्माय निर्मम सुरास्तव निर्मिमाणाः,
सिंहासनं स्वगतमेवमुदाहरन्ति ।
दन्ताबलः स किल माद्यति मोहनामा,
विश्वेशितुस्तदिदमेव हितं हि पीठम् ॥ ३

सिंहासना भगवती परिकीर्त्यते या,
सा च स्मृता बलवती शिवतोऽपि शक्तिः ।

लोकोत्तरप्रवरशक्तिमतस्तवैतत्,
सिंहासनं तदुचितं खचितं मणीभिः ॥ ४

सिंहा वयं परममी पशवो वराका,
नाम्नि ग्रहस्तव न साम्प्रतिको नृसिंहः ।
एवं तवासनगताः स्वयमेव सिंहा,
विज्ञापनामिव रहः स्पृहयन्ति कर्त्तुम् ॥ ५

सिंहासनं तव चिराय निरीक्षमाणः,
पार्श्वं समे तु स कथं मदनः कुरङ्गः ।
लीनः परं शशिनि सोऽपि यतः स्मरस्य,
वेलां विबोधयति वारिनिधेरिवाऽयम् ॥ ६

त्वत्तः परे न परमासितुमप्यवीत-
दोषा विदन्ति विकृतेङ्गितनेत्रवक्त्राः ।
त्वं शातितान्तरमदः स्थिरदृष्टिचेष्टः,
सिंहासनं सुचिरमीश ! तवेति जीयात् ॥ ७

पर्यङ्कबन्धललितं तव पाणिपादं,
दृक्साम्यसारमिलितं कलितं न केन ।
इत्यासनेऽपि दृढतामनुभावुकस्य,
सिंहासनं तव जिनाधिप ! युक्तमेव ॥ ८

कामागमे चतुरशीतिरथाऽऽसनानि,
तावन्ति तानि विदितानि च योगशास्त्रे ।
तत्तद्विलक्षणमिदं पुनरासनं ते,
सिंहासनं रचितमित्यमरैस्तवेदम् ॥ ९

आक्रान्तवक्त्ररिपुचक्रपराक्रमोऽयं,
यद्विक्रमोऽपि च गभीरतमो निनादः ।
ऊर्जस्वलावपि भुजौ च ततो नृसिंहं,
सिंहासनं तव न सम्मतिमेति कस्य ॥ १०

दग्धःपिनाकधनुषाऽपि परेतरूपो-
ऽनङ्गस्तथापि परितापयते जगन्ति ।
तन्मानमर्दनदृढासनबन्धधीर !
सिंहासनं तव शुचि स्तुमहे महेच्छ ! ॥ ११

चित्रं जगत्त्रयपतेऽपि समाश्रितस्य,
सिंहासनं मृगगणास्तव विश्वसन्ति ।
यद्वा चिरं सुपरिकर्मितसाम्यसार-
लीलाविजृम्भितमिदं ननु कस्य गम्यम् ॥ १२

त्वां सिंहविष्टरनिविष्टमविप्रकृष्टं,
दृष्ट्वाऽद्भुतं मृगगणा मुदमावहन्ति ।
अद्यापि देव ! तव यन्मृगवाहनत्वात्,
वायुर्न सम्मुखमुपैति महाबलोऽपि ॥ १३

जित्वा जिनेन्द्र ! मृगबाधकरं मृगेन्द्रं,
मात्राधिकोऽसि मृगबोधकरस्त्वमेकः ।
तद्देव ! सेवकसुरद्रुमयुक्तमेव,
सिंहासनं परिचितं निजतेजसा ते ॥ १४

इन्दुकुन्दधवलामिति कीर्त्तिं,
कीर्त्तयामि कियतीं तव नाथ ! ।

मन्दबुद्धिरपि किञ्चन वच्मि,
त्वद्गुणौघमुखरीकृतजिह्वः ॥ (स्वागता) १५

## १९. चतुर्मुखवर्णनात्मक-श्रीमल्लिनाथस्तवः

(वसन्ततिलका)

उत्फुल्लमल्लिकुसुमोपलकीर्त्तिधौत-
विश्वत्रयं मदनजैत्रमहः पवित्रम् ।
श्रीमल्लितीर्थकरमुत्पुलकाङ्गयष्टि-
र्दिष्ट्या चिरेण परिचित्य विभुं भजामि ॥ १

शुश्रूषया मिलितदैवतक्लृप्तरत्न-
सिंहासने समुपविश्य कृपैककोश ! ।
सच्छत्रचामरमहातिशयैरुदार-
स्तत्त्वानि निर्दिशसि देव ! चतुर्मुखस्त्वम् ॥ २

सर्वत्र संहितहितामृतमेध्यबुद्धि-
र्नोपैषि कुत्रचिदपीश ! पराङ्मुखत्वम् ।
सर्वेषु देहिषु समा मम चित्तवृत्ते-
स्तद्देव देव ! तव चारु चतुर्मुखत्वम् ॥ ३

चत्वार उल्वणतराः प्रतिपादयोऽमी,
विश्वोपतापकरणप्रवणाः कषायाः ।
तानेव वा युगपदेकगिरा निहन्तुं,
शत्रुप्रमाथचतुरश्चतुराननस्त्वम् ॥ ४

पात्रोचिताऽभयदयाभिदुराणि यानि,
दानानि कीर्त्तिसुकृतैकनिबन्धनानि ।

तानि स्वयं समकमेव पुरोपदेष्टुं,
दिष्ट्या भवानयमभूदिव वेदवक्त्रः ॥ ५

दुःखभ्रमीरनुभवन्ति गतिष्वनेके;
ये देहिनश्चतसृषु स्खलिताः पदव्याः ।
सर्वज्ञता ननु जिघृक्षुरिवाविलम्बं,
कारुण्यतो भवसि देव ! चतुःशरीरः ॥ ६

अङ्गानि यानि परमाणि चतुर्विधानि,
धर्मस्य जैनसमयेषु निरूपितानि ।
तानि स्वयं बिभणिषुः समकालमेव,
त्वं लीलया कलयसीह चतुर्मुखत्वम् ॥ ७

प्रष्ठः प्रसूनविशिखः सुभटौ च राग-
द्वेषौ जगत्त्रयविमोहकरश्च मोहः ।
प्रत्यर्थिनो युगपदेव निहन्तुमेतान्,
मन्येऽभवः क्षितभवश्चतुराप्तरूपः ॥ ८

निस्तेजसः किल कृता अपि विप्लवं ये-
ऽनन्तानुबन्धिन इति प्रथिताभिधानाः ।
कुर्वन्ति तानभिभवन्नथ चैकवेलं,
त्वं लक्ष्यसे सुकृतिभिश्चतुरङ्करूपः ॥ ९

त्वद्दिव्यदेहतुलयैव चतुर्निकाय-
देवास्त्रयं यदपरं वपुषां विवक्तुः ।
अत्यद्भुतं महिमवीर्यविजृम्भितं यत्,
तत्रापि तद्भवत एव परं सहायः ॥ १०

मन्ये मुनीन्द्र ! चतुरम्बुधिवीचिवेला-
गम्भीरगर्जितमवश्यमवेक्षमाणः ।
पीयूषपेशलविचारवचस्तरङ्गै-
र्गर्जस्यगाधमधुरं चतुराननस्त्वम् ॥ ११

देवाः पतन्ति सममेव चतुर्निकाय-
देवास्तवाङ्घ्रिभजनाय कृताभियोगाः ।
तेषां मुदे त्वमिव मूर्त्तिचतुष्टयीभृत्,
भक्तानुवर्त्तनपराः प्रभवोऽपि हि स्युः ॥ १२

मन्ये मनोऽभिरमयन्ति चिरं चतस्त्रः,
सज्ज्ञानकेलय इमा इव मूर्त्तयस्ते ।
द्रव्यादिगोचरतया समयार्थविद्भि-
र्बुद्धैस्तदेकविधमप्युदितं चतुर्धा ॥ १३

धर्मं दिशन्नमृतदेश्यगिरा चतुर्धा,
बिभ्रच्च विभ्रमकरीः स्वतनूश्चतस्त्रः ।
आभासि मङ्गलचतुष्टयमूर्त्तिमन्तं,
सङ्घं चतुर्विधमपीश ! निवेशयंस्त्वम् ॥ १४

विशदकनकपुत्रीदर्शनेन प्रबोधं,
षडपि हि भवता ते लम्भिता राजपुत्राः ।
मयि कलुषकलङ्कव्याकुलेऽपि प्रसीद,
प्रणमति जिन ! मल्ले ! देहि बोधिप्रकाशम् ॥ (मालिनी) १५

## २०. देवदुन्दुभिवर्णनात्मक-श्री मुनिसुव्रतस्वामिस्तवः

(वसन्ततिलका)

भक्तिप्रबोधितचमत्कृतजागरूक-
हर्षाम्बुनिर्झरपरिप्लुतरोमकूपः ।
जिह्वां पुनामि मुनिसुव्रत ! तीर्थराज !,
सद्भूतसुन्दरगुणस्तुतिकीर्त्तनेन ॥ १

औदीच्यमारुतसमुन्नतनीलकण्ठ-
कण्ठानुकारि शुचिकालिकवारिवाहम् ।
तर्जन्त एव गुरुगर्जमहोर्जितेन,
स्वामिन्नभोऽभि तव दुन्दुभयो नदन्ति ॥ २

त्वद्दुन्दुभिध्वनितमाकलयन्निवोच्चै-
र्लोके न चामयगणः प्रसरीसरीति ।
गारुत्मतातिकनकद्युतिपक्षवाते
जाते न जानुभुजगा भुवि विस्फुरन्ति ॥ ३

गर्जन्ति देव ! तव दुन्दुभयोऽन्तरिक्षे,
भूयोऽपि भूमिवलये विपदो गलन्ति !
जातेऽथवा घनघनाघनदिव्यनादे,
शुष्यन्ति किं न हरितास्तु यवासकौघाः ॥ ४

व्योमन्ययं गुरुगभीरनिनादशोभी,
त्वद्दुन्दुभिर्ध्वनति लोकमहोदयाय ।
आहुर्विदूरभुवि रत्ननवप्ररोह-
सम्पत्तये ननु पयोधरधीरगर्जम् ॥ ५

दिव्यानुभावधृतनादमनाहता ये,
गर्जन्ति देव ! दिवि दुन्दुभयस्त्वदीयाः ।
एते चिराय तृषितश्रवसां जनानां,
पीयूषपारणसुखाय विभो ! भवन्ति ॥ ६

कुक्षिम्भरिर्भुवननाथ ! दिवस्पृथिव्योः,
कं कं न तोषयति दुन्दुभिनाद एषः ।
योऽभिध्वनन् जनमनांसि तथाभिहन्ति,
सद्यो विमोहगरलानि यथा गलन्ति ॥ ७

नादस्तवानुपम एष स दुन्दुभीनां,
यो रोदसी समभिहन्ति समं समग्रे ।
तत्राद्भुतं किमथवा तव नाथ ! यत्र,
साहायकं गहनयोगविजृम्भितस्य ॥ ८

ज्ञानाद्वयं जगति रक्तपटा विवव्रुः,
ब्रह्माद्वयं च मुनिजैमिनिरप्यगासीत् ।
नादाद्वयं च तव दुन्दुभयो वितेनुः,
कुर्वन्ति किं विभुबलेन नवा महान्तः ॥ ९

मन्ये सुरासुरनरेश्वरखेचरेन्द्र-
योगीश्वरानपि तव स्तवनप्रसक्तान् ।
दृष्ट्वेव दुन्दुभिगणा अपि संस्तुवन्ति,
त्वां दूरदुर्गमगिरो निनदापदेशात् ॥ १०

आहुश्चतुर्विधममी कतिचित्कवीन्द्रा,
वाद्यं च पञ्चविधमप्यपरे वदन्ति ।

गर्जन्ननारतमजस्त्रमनाहतोऽपि,
त्वद्दुन्दुभिः कतमभेदगतो न जाने ॥ ११

देवाधिदेव ! तव दुन्दुभिनादमुह्यद् ,
देवाङ्गनानिवहविप्रजढः सुरेन्द्रः ।
पश्यन्नितस्तत इमाः परितः सहस्त्र-
मक्ष्णामयं यदि निनाय तदोपयोगम् ॥ १२

निःस्वाननिस्वनममुं च निशामयन्तः,
षड्वैरिवर्गसुभटाः प्रपलायमानाः ।
आशिश्रियुः किमु सुराचलशैलशृङ्ग-
वासेन नन्दनवनं षड्तुच्छ्लेन ॥ १३

सर्वेऽप्यमी सुरवराः पशवश्च सेवां,
कुर्वन्ति तात ! तव पादसमीपभाजः ।
दूरे वयं किमिति नादमिषेण तारं,
विज्ञापयन्ति सुरदुन्दुभयो भवन्तम् ॥ १४

इति यदुकुलरत्नं यत्नमाधाय बुद्धेः,
स्तुतिविषयमवापि ख्यापितश्च प्रबोधः ।
मम च मनसि वासं सर्वकालं विधत्ता-
मयमिह परमार्थप्रार्थना श्रेयसी मे ॥ (मालिनी) १५

## २१. केश-रोम-नखाप्रवृद्धि जघन्यतः सुरकोटिसेवनातिशय-वर्णनात्मक-श्रीनमिनाथ-स्तवः

(वसन्ततिलका)

राजाधिराजविजयान्वयपद्मसूर्यं,
विद्वेषिमोहबलभञ्जनसज्जशौर्यम् ।
नन्नम्यमाननरनायकनैकनाकि-
नागं नमामि नमिनामनिरीहनाथम् ॥ १

घातिक्षये चिकुररोमनखं न वृद्धि-
मायाति देव ! तव तज्जनविस्मयाय ।
अन्तःशमामृतरसायजतृप्तिभाजां,
दुःसम्भवं किमथवा मथितामयानाम् ॥ २

केशादयः परममी परिवृद्धिमाप्य,
भूयः क्षरन्ति च भवन्ति च भिन्नवर्णाः ।
तत्तानवस्थितमविश्वसनीयमित्र-
तुल्यानतुल्यमहिमन्नियतानकार्षीः ॥ ३

प्रायः स्मरस्य यदमी सकलाः सहाया
उद्दीपनप्रकृतयः सुहृदः प्रतीताः ।
तन्नीतितत्त्वविदुरश्चिकुरादिकानां,
वृद्धिं भवानभिभवां विजयी न सेहे ॥ ४

केशाः स्वभावमलिनास्तलिनानि चाऽपि,
रोमाणि तीक्ष्णविषमाः कुटिला नखाश्च ।

त्वं तान्यमूनि विकृतप्रकृतीनि मत्वा,
नेतर्यथास्थिति चकर्थ न वृद्धिभाञ्जि ॥ ५

ये वर्धितास्तनुसुखाय विवृद्धये वा,
क्लेशप्रहाणिकरणाय हिताय वा स्युः ।
औचित्यतो ननु विवर्द्धयितुं त एव,
योग्या भवन्ति भुविवल्लभ विभ्रमाणाम् ॥ ६

एते विवर्द्धिततमा अपि साधयन्ति,
प्रायः परिश्रमकरं कमपि प्रयोगम् ।
एवं विचिन्त्य सुचिरं चिकुरादिकाना-
माज्ञापयस्त्वमपि नाथ ! यथास्थितत्वम् ॥ (यु.) ७

त्वत्पादपद्मसविधं न जघन्यतोऽपि,
देवाः कदाचन जहत्यतिकोटिसङ्ख्याः ।
अल्पेपि शीतसमयादिषु चेत्तरङ्गाः,
पाथोनिधौ तदपि कोटिमिता भवन्ति ॥ ८

उद्यानसारणिसुरद्रुमपुष्पशय्या-
लीलागिरीन्द्रकदलीगृहदीर्घिकादीन् ।
प्रग्रीवतोरणविटङ्कितमङ्गशालि-
भञ्जिस्थिरस्थुलगवाक्षमणीगृहादीन् ॥ ९

दिव्याप्सरोललितनूपुरगीतवीणा-
सङ्गीतसङ्गमविजृम्भितविभ्रमादीन् ।
एतानिमाननुपमानवगण्य भावान्,
देवाः श्रयन्ति किल कोटिमितास्त्वदङ्घ्री ॥ १०

त्वत्पादपद्मनिलयं समुपागतानां,
तेषां सुखं भवति यत् त्रिदिवालयानाम् ।
तल्लेशकोटिकणिकाऽपि ननाम मन्ये,
देवालये विविधरत्नमणीगृहेषु ॥ ११

मन्ये सुरासुरगणा अमृताशनेति,
स्वं नाम नाम चरितार्थमिदं विधातुम् ।
त्वद्वाक्सुधानिभृतपानरसेन धर्म-
क्षेत्राणि कोटिगणिताः सततं श्रयन्ति ॥ १२

ये जापहोमपरिपूजनभोगभक्ति-
क्लेशैर्न दर्शनपथे पथिकाः कथञ्चित् ।
सद्योऽभवद्विशदभक्तिवशीकृतास्ते,
कोटीमिता न जहति क्वचन त्वदङ्घ्री ॥ १३

देवास्त्वदङ्घ्रितललीनतमास्तमांसि,
निर्भिद्य मुक्तिसुखलेशमिवाप्नुवन्ति ।
नो चेत्तथाविधसुरालयभोगभङ्गी-
लीलामनोरमरसं किमिव त्यजन्ति ॥ १४

ईशास्यन्ते सुरगुरुसुराधीशमुख्याननूनं,
देव ! स्तोत्रे तव निरवधौ वत्सराणां सहस्रैः ।
कोऽहं कीटः परिमितमतिर्यद् यते तत्र भक्तिः,
स्वामिन्नेषातिशयिततमा सम्भ्रमं मे तनोति ॥(मन्दाक्रान्ता) १५

## २२. कण्टकाधोमुखत्व-तरुनमन-पृष्ठानुगवायुता-पक्षिप्रदक्षिणलक्षणा-तिशयवर्णनात्मकः श्रीनेमिनाथस्तवः

(वसन्ततिलका)

आजन्मशीलकलनाकलितत्रिलोकी-
जङ्घालसङ्कटशरावलिपुष्पचापम् ।
श्रीयादवान्वयपयोधिकलाधरं श्री-
नेमीश्वरं सकलकष्टहरं नमामि ॥ १

तीर्थाधिनाथ ! पथि चाथ तव प्रयाणे,
सर्वेऽपि कण्टकगणाः स्युरधोमुखाग्राः ।
शक्राचलं समुपयाति सहस्रभानौ,
काकारिपेटकमधोमुखमेव युक्तम् ॥ २

आसाद्य कण्टकगणा जगदीश ! सद्य-
स्त्वत्पावितां भुवमधोवदना भवेयुः ।
दृग्गोचरे भवति दर्शनवर्जितानां,
युक्तः स केवलमधोमुखभाव एव ॥ ३

त्वत्पादपावितमहीवलये मुखानि,
कुर्वन्ति कण्टकभरा अध एव दूरम् ।
कन्दर्पसर्पगरुडे त्वयि देव ! दृष्टे,
तिष्ठन्ति तीक्ष्णवदनाः किमुदस्तवक्त्राः ॥ ४

स्मृत्वेति चेतनसुखावहमापतन्तं,
त्वामानमन्ति तरवः परितः समग्राः ।
उन्निद्र एष फलदेषु सदा हृदा नः,
पूजोचितस्तदयमेव महानुभावः ॥ ५

लोकत्रयावगमनिर्मलचेतनं त्वां,
वृक्षा इति प्रणिपतन्ति समीपभाजः ।
अस्मासु मन्दकलुषं यदिदं तदेत-
च्चैतन्यमस्तु विशदं भवतः प्रसादात् ॥ ६

त्वामप्यधीश ! शिरसा न नमन्ति केचि-
न्निःस्वादनीरसकठोरशिलाः परेते ।
एते वयं शिखरिणोऽपि न तादृशाः स्मः,
कृत्वेति पादपगणाः प्रणता भवन्तम् ॥ ७

यत्कीटकोशकलुषं विरजोरजस्त्वां,
नोपैति सन्मुखमदस्तदपीश ! युक्तम् ।
तप्त्वा तपः क्षितरजास्त्वमभूः स्वयम्भू-
र्यच्चानुगः सततमेष महाबलस्ते ॥ ८

आगर्भवासमपि रेचकपूरकाभ्यां,
भूयश्च कुम्भकबलेन विजित्य वायुः ।
वश्यस्तथा कथमयं विहितस्त्वया यत्,
पृष्ठानुगस्तव सदैष महाबलोऽपि ॥ ९

त्वन्नासिकामुखसमीरणसौरभेण,
निर्भर्त्सितः पवन एष विलज्जमानः ।
आयाति देव ! तव नाभिमुखः कदाचित्,
संसेवते भवत एव च पृष्ठदेशम् ॥ १०

तिर्यग्नरासुरसुरस्मयभञ्जनं य-
स्त्रैलोक्यकण्टकममुं मदनं विजिग्ये ।

तत्सम्मुखेन मयका मरुतैककेन,
किं तत्प्रभञ्जन इतीव तवानुगामी ॥ ११

यान्ति प्रदक्षिणममी पशवोऽपि पक्षि-
सङ्घास्तवोपरि विहायसि सञ्चरन्तः ।
देहि प्रसद्य भृशमुड्डयनाय शक्तिं,
यामस्त्वया सह शिवाय वयं धियेति ॥ १२

सर्वे भजन्ति खचरास्तव पादपद्मं,
नाम्ना खगा वयमपि प्रथिता इति स्मः ।
यान्ति प्रमोदरसनिर्भरमुत्पतन्तः,
सद्यः प्रदक्षिणमिमे तव पक्षिलक्षाः ॥ १३

निर्द्वेषनिर्ममसमं समचित्तवृत्ति-
र्भक्तद्रुहोरपि सपक्षविपक्षयोस्त्वम् ।
ख्याताः क्षमाधर तथापि वयं सपक्षा
यामो न वाममिति दक्षिणमागुरेते ॥ १४

गिरिवरगिरिनारप्राङ्गणे कल्पवृक्षः,
कुसुमशरभुजौजः क्षारनिक्षेपदक्षः ।
त्रिभुवनघनगर्जत्कीर्त्तिकेलीमृदङ्गः,
सृजतु मम सुखं श्रीनेमिनामा जिनेन्द्रः ॥ (मालिनी) १५

## २३. षड्तुसेवनेन्द्रियार्थानुकूल्यातिशयवर्णनात्मक-श्रीपार्श्वनाथ-स्तवः

(वसन्ततिलका)

योो भोगिनेऽपि तनुभोगभृते प्रसाद-
माधाय भोगिविभुतां भगवानयच्छत् ।
आप्तं तमाप्तपरमातिशयप्रभावं,
वन्देऽभिनन्दितजनं प्रभुपार्श्वनाथम् ॥ १

त्वत्पादपूतपृथिवीवलये वसन्त-
मुख्यर्तवो व्यभिचरन्ति निजं न कालम् ।
सुस्वामिनो हि समयस्य न संसहन्ते,
क्वापि व्यतिक्रममुपक्रमदोषमूलम् ॥ २

एते यथाऽनुपरिपाटि भजन्ति पुष्प-
कालादयः स्वमृतवः समयं त्वदग्रे ।
नायं नयस्थितिकरः क्षमते कथञ्चित्,
कुत्रापि दुर्नयमितीव भिया भवन्तः ॥ ३

किञ्चैतदद्भुतमुपत्वदनुक्रमाङ्कां,
भिन्दन्ति सम्मतिममी ऋतवो ननाम ।
आनित्यवैरकुलमूलमसम्मतिर्या,
सा सम्मतिर्भवति यत्तव पादपीठे ॥ ४

पुष्पायुधस्य धनुषा सममेव बाणा,
मन्ये जगत्त्रयपते ! ऋतवः षडेते ।
तं च त्वयाहतमवेक्ष्य तवोपपीठं,
स्वस्वस्थितिं व्यभिचरन्ति न जानुभीताः ॥ ५

त्वामागतं सदतिथिं जगदेकनाथं,
सर्वर्तवोऽपि च भजन्ति तवोपहारैः ।

स्वस्वप्रवालकिशलोत्करकोरकौघ-
भिद्यत् प्रसूनमकरन्दरसैरनर्घ्यैः ॥ ६

देव ! त्वदङ्घ्रिधनिके धरणीविभागे,
नैते कथञ्चन यदुत्क्रमतः फलन्ति ।
भावादिमे षडृतवः स तवानुभावः,
षड्वैरिवर्गदमनोद्यमदीप्तिभाजः ॥ ७

षाड्गुण्यनीतिनिपुणस्य तवानुभावा-
न्नैवाति यन्ति समयाः समयं निजं षट् ।
यत्त्वं जिनेन्द्र ! समयव्यतिभेदकस्य,
क्लेशागमं निरदिशः समये दुरन्तम् ॥ ८

कायान् यथा षडपि पालयसेऽङ्गभाजां,
विश्वैकतात ! शुचिवित्तवचस्तनूभिः ।
त्वन्निश्रया षडपि देव ! तथर्तवोऽमी,
भावैस्त्रिभिस्तरुगणं क्रमशः समग्रम् ॥ ९

शूरस्त्वमिन्द्रियजयात् किल कीर्त्यसे य-
त्तद्देव देव वितथं कथमुच्चरामि ।
शब्दादयः सुभगकामितमिन्द्रियार्थाः,
किं तद्भवन्ति भवतः परितोऽनुकूलाः ॥ १०

ये कामिताः परममी सहसा न लब्धा,
अप्यायतौ तनुभृतो नरकं नयन्ति ।
एते भवद्विषयिणां विषया न भूरि-
भाराय लोललघवः स्वयमागतत्वात् ॥ ११

शब्दादयः स्वरसतः परिभुज्यमानाः,
सम्यक् त्वया कटुविपाकफलाः प्रदिष्टाः ।
यत्ते तवातिसुरसाः स्वयमापतन्तः,
क्लेशावहाः किल जिनेश ! न लेशतोऽपि ॥ १२

निष्कन्दितं मदनमीशमवेक्षमाणाः,
साक्षात् त्वयास्य सुभटाः कटके धुरीणाः ।
शब्दादयः सममिव प्रतिकूलभाव-
मुज्झन्ति च प्रतिभवन्तमथानुकूलाः ॥ १३

नेतर्ध्वनिप्रभृतयः स्फुटमिन्द्रियार्था-
स्त्वत्सन्निधौ विरसतां विजहत्यवश्यम् ।
अभ्यागते त्वयि जगत्त्रयनायकेऽपि,
को नाम नोज्झति पुरः प्रतिकूलभावम् ॥ १४

त्वं विश्ववत्सलकृपः परितुष्टदृष्टि-
र्विश्राणयस्यमृतवागजरामरत्वम् ।
दृक्कोणमेककमितो मयि देव ! देही-
त्येतावतापि सफलं निजजन्म मन्ये ॥ १५

## २४. चरणाधःस्थितनवकमलवर्णनात्मक-श्रीमहावीरदेव-स्तवः

(वसन्ततिलका)

षड्द्रव्यपर्यवनिबद्धनयप्रमाण-
दुर्नीतिवास्तवविवेचकवाग्विलासम् ।

ज्ञेयावधिस्फुरदनुत्तरबुद्धिकोशं,
श्रीवर्द्धमानजिननायकमानमामि ॥ १

मोहे दिगन्तमभिसर्पति जातजा यत्,
कैवल्यनिर्मलकलानिलयं भवन्तम् ।
लोकोत्तरातिशयसम्पदुपेयमान-
मन्तर्मनः प्रणिदधामि सुधामिवाप्ताम् ॥ २

निर्णिक्तगैरिकसुरङ्गसुवर्णशोभा-
विद्रावणप्रतिभटौ तव यत्र पादौ ।
विश्वम्भरां कलयतः किल कल्पयन्ति,
तत्र त्रिविष्टपसदः कनकाम्बुजानि ॥ ३

उन्निद्रकोकनदकोरककामलौ यां,
पादौ श्रियं जनयतः स्म महीविहारे ।
सौवर्णपङ्करुहकुड्मलमाविशन्तौ,
तामेव देहि मम चित्तमथाधिशाय्य ॥ ४

त्वत्पादसङ्गमवशेन सरोरुहस्थं,
पावित्र्यमापयदिदं परमं सुवर्णम् ।
अद्यापि सर्वजनता कनकोदकेन,
शौचच्छटां निजगृहेषु तनोति तेन ॥ ५

नानासुरासुरनरेन्द्रपुरस्कृतस्य,
पुण्यप्रतापमहिमोदयभासुरस्य ।
मन्येऽथ मन्दसुकृताश्चरणोदकं ते,
तत्सङ्ग्रहीतुमनसोऽपि न शक्तवन्तः ॥ ६

त्वत्पादसङ्क्रमि पवित्रितपृष्ठपद्म-
हेमाभिषेकसलिलं जगृहुस्ततस्ते ।
संस्कारतो विदधतीव बुधाश्च तस्मा-
दद्यापि काञ्चनजलेन गृहेषु शान्तिम् ॥ ७

त्वत्पादशोणिमभरेण पुरा सुवर्णं,
पद्मालयं रुचिमवाप नितान्तरुच्याम् ।
तत्तादृशीमथ च कान्तिममी कलादाः,
कुर्वन्ति गैरिकरसेन विलिप्य तस्मिन् ॥ ८

देव ! त्वदङ्घ्रितलकाञ्चननीरजानि,
दिव्यानुभावशुभसौरभशोभनानि ।
स्वर्णं पुनः सुरभिरूढिरियं जनेषु,
जाता तदादिरिति चेतसि निश्चिनोमि ॥ ९

तथ्या विशेषबुधता विदिता सुराणां,
यत्त्वत्पदाम्बुजतले कनकाम्बुजानि ।
पर्युल्लसत् प्रमदतो विनिवेशयन्ते,
किं वस्तु यत्तदुचितं भुवने तदन्यत् ॥ १०

पादौ जिनेश्वरपदं तव सम्पदां तौ,
तासां च वासभवनानि सरोरुहाणि ।
तत्तावकीनचरणद्वितयस्य मार्गे,
युक्तं सुरा दधुरधः कनकाम्बुजानि ॥ ११

एतानि देव ! तव पादपयोरुहाणि,
भूमौ भवत्क्रमनिवेशवशाच्चरन्ति ।

तिष्ठन्ति हि प्रतिपदं निधयः पुराणा,
या विश्रुता श्रुतिममूं चरितार्थयन्ति ॥ १२

त्वत्पादयुग्मरुचिमण्डलमीश ! हेम-
पाथोजसेकसररुचिप्रचयैरधस्तात् ।
आक्रान्तमप्युपरि देव ! शिखामणीभि-
रुत्सर्पति प्रकटमेव तमो निहत्य ॥ १३

देवाधिदेव ! भवतश्चरणावधोऽधः,
क्षोणीतले नव नवानि नवाम्बुजानि ।
चामीकरेण रचितानि निधीन्न चापि,
व्यक्तीकृतानिव हि सङ्क्रमयन्ति देवाः ॥ १४

कल्पद्रुमः सुरमणिः सुरधेनुरेते,
मच्चेतसः प्रतिमया जगति त्वमेकः ।
तद्देव ! देव ! मयि भक्तिमतिप्रसद्य,
सम्भावनां कुरु यथा सुकृती भवेयम् ॥ १५

## २५. प्रशस्तिरूपा-श्रीवीतरागदेव-स्तुतिः
(वसन्ततिलका)

श्रीवीतरागसमयेऽतिशयास्त्वदीया-
स्त्रिंशच्चतुर्भिरधिकाः परिकीर्त्तिता ये ।
तानेव च प्रणिदधामि हृदा दधामि,
मूर्द्धन्यथाप्यभिदधामि गिरानुवेलम् ॥ १

यद्वा भवस्थवरकेवलिनामगण्या-
स्तीर्थाधिनायक ! तवातिशया अनन्ताः ।

नास्मादृशां तदुचिता गणनापि तेषां,
व्यावर्णने कुत इव प्रतिभा समर्था ॥ २

शक्येत वर्णयितुमेष न चैककोऽपि,
कोटीभिरीश ! शरदामपि तावकीनः ।
एकोऽपि किं लवणनीरनिधेस्तरङ्ग-
स्तीर्येत कोटिगणितैर्मणिकैर्वरीतुम् ॥ ३

व्यावर्णनं च भगवन्निजमत्यपेक्षं,
कुर्वन्न कोऽपि लभते वचनीयभावम् ।
धत्ते यतोऽणुकणिकोपमयामितापि,
तारा न किं निजविभावधिदीप्तिलेशम् ॥ ४

स्तोतुश्च साधनमतो मतिरेव मुख्यं,
ज्ञायेत सापि विमला तव च प्रसादात् ।
त्वं च प्रसादसुमुखः स्तुतिभिर्विधेय,-
स्तद्देव ! देव ! गहनेऽत्र गतिस्त्वमेव ॥ ५

निश्छद्मकेवलकलानिलयस्य नेतः,
सर्वं चराचरमिदं तव गोचरो यत् ।
विज्ञापयामि तदिदं मम भक्तिमेतां,
बुद्ध्वा ततस्तदुपमं फलमाशु दद्याः ॥ ६

यद्वा कृपा विकलुषा जिन ! तावकीना,
सार्वत्रिकी जगति सम्प्रति पोस्फुरीति ।
इच्छन्ति ये प्रतिदिनं न च कामयन्ते,
ये चापि वर्षति घनः सममेव तेषु ॥ ७

भो ! भो ! हिताः स्वसुहृदः शृणुतावधाय,
निर्मत्सरोऽपि भगवानथ निर्ममोऽपि ।
स्तोत्रैरमीभिरपि बालकमन्मनोक्ति-
प्रायैर्मयापि गमितः परमं प्रसादम् ॥ ८

इन्द्रादयोऽपि परितोषयितुं विभुं यं,
कुर्वन्ति कोटिगणिता विविधाः सपर्याः ।
तच्च प्रसादनमधीशितुरीदृशीभि-
र्वाग्भिर्मया कृतमहो ! कुतुकं महीयः ॥ ९

ज्ञातस्त्वया जिनपतिर्ननु सुप्रसन्नः,
स्वामी कथं प्रियजनैरिति नो विचार्यम् ।
अद्य प्रसादसुमुखः सुखमालुलोके,
प्रातर्मया प्रभुरयं मम सुप्रभातम् ॥ १०

(गुरु-परम्परा)

चान्द्रे कुलेऽतिविमले विधिपक्षशाखा,
तत्राऽऽर्यरक्षितगुरुर्गणधारिमुख्यः ।
सिंहोपमश्च महसा जयसिंहसूरिः,
श्रीधर्मघोषगुरुराज इतो रराज ॥ ११
सूरिस्ततोऽपि च जगर्ज महेन्द्रसिंहः,
सिंहप्रभो गुरुरथाऽजितसिंहसूरिः ।
देवेन्द्रसिंह इति गच्छपतिस्ततश्च,
धर्मप्रभो गणधरो गणमुद्दधार ॥ १२

सूरिश्च सिंहतिलकस्तिलकं पृथिव्याः,
श्रीमान्महेन्द्रगणभृच्च मुनीन्द्रचन्द्रः ।

श्रीमेरुतुङ्ग इति गच्छपतिस्ततश्च,
तत्पट्टमण्डनमभूज्जयकीर्तिसूरिः ॥ १३

शब्दद्वयं जगति यद्विदितं हितं च,
विश्वप्रियं च मनसोऽपि सुखावहं च ।
तत्सङ्ग्रहीतुमुदितो जयकीर्तिसूरिः,
सूरिं निजप्रतिभयाऽभिबभूव भूयः ॥ १४

शिष्यः श्रीजयकीर्त्तिसूरिसुगुरोरुन्मेषमन्तर्दधत्,
भक्तेरेष विशेषतस्तनुधियां मुख्यः परं पर्षदि ।
इत्थं तीर्थकृतां स्तुतीरशिथिलस्वार्थस्थितिप्रार्थनो,
जग्रन्थाऽथ विशोधयन्तु कृतिनः
सन्तुष्य चैताश्चिरम् ॥ (शा.वि.) १५

शिष्यः श्रीजयकीर्त्तिसूरिसुगुरोस्तत्पादपद्मद्वयी-
सेवालब्धयतिस्थितिर्मृदुमतिश्रेणीसदस्यग्रणीः ।
भक्तिप्रह्वमना जिनाधिपगुणस्तोत्रावलीं निर्ममे,
सन्तुष्टा अथ शोधयन्तु कृतिनश्चैतां विचारोचिताम् ॥(शा.वि) १६

स्तोत्राणि रचयन्नेवं जिनानां जयकेसरी ।
स्वचित्ते वृणुते वासं तेषां भद्रमहर्द्धये ॥ (अनुष्टुप्) १७

पू.आ.श्री हेमचन्द्रसूरिविरचिताः

(त्रिषष्टिशलाकापुरुषचरित्र-अन्तर्गताः-)

# ३. ॥ चतुर्विंशतिजिन-मेरुमहोत्सवस्तवाः ॥

## १. श्री-आदिनाथ - जिनस्तवः

(अनुष्टुप्)

नमस्तुभ्यं जगन्नाथ !, त्रैलोक्याऽम्भोजभास्कर ! ।
संसारमरुकल्पद्रो !, विश्वोद्धरणबान्धव ! ॥ १

वन्दनीयो मुहूर्त्तोऽयं, यत्र ते धर्मजन्मनः ।
अपुनर्जन्मनो जन्म, दुःखच्छिद्विश्वजन्मिनाम् ॥ २

युष्मज्जन्माऽभिषेकाऽम्भः-पूरैराप्लाविताऽधुना ।
अयत्नक्षालितमला, सत्या रत्नप्रभा प्रभो ! ॥ ३

मनुष्याः खलु ते धन्या, ये त्वां द्रक्ष्यन्त्यहर्निशम् ।
यथासमयमेव त्वां, द्रष्टारः कीदृशा वयम् ? ॥ ४

भरतक्षेत्रजन्तूनां, मोक्षमार्गोऽखिलः खिलः ।
त्वया नूतनपान्थेन, नाथ ! प्रकटयिष्यते ॥ ५

साऽस्तु तावत्तव सुधा-सध्रीची धर्मदेशना ।
त्वद्दर्शनमपि श्रेयो, विश्राणयति जन्मिनाम् ॥ ६

न कश्चिदुपमापात्रं, भवतो भवतारक ! ।
ब्रूमस्त्वत्तुल्यमेव त्वां, यदि ते तर्हि का स्तुतिः ? ॥ ७

नाऽस्मि वक्तुमलं नाथ !, सद्भूतानपि ते गुणान् ।
स्वयम्भूरमणाम्भोधेर्मातुमम्भांसि कः क्षमः ? ॥ ८

## २. श्री-अजितनाथ - जिनस्तवः

(अनुष्टुप्)

जय त्रिभुवनाधीश !, जय विश्वैकवत्सल ! ।
जय पुण्यलतोद्भेद-नवाम्बुद ! जगत्प्रभो ! ॥ १

स्वामिन् ! विमानाद्विजया-दवतीर्णोऽसि भूतले ।
इदं जगत् प्रीणयितुं, सरिदोघ इवाऽचलात् ॥ २

बीजं मोक्षद्रुमस्येव, ज्ञानत्रितयमुज्जवलम् ।
स्वामिन्नाऽऽजन्मसिद्धं ते, शीतलत्वमिवाऽम्भसः ॥ ३

ये त्वां त्रिभुवनाधीश !, धारयन्ति सदा हृदि ।
सम्मुखीनाः श्रियस्तेषा-मादर्शप्रतिबिम्बवत् ॥ ४

उल्बणैर्बाध्यमानानां, कर्मरोगैः शरीरिणाम् ।
दिष्ट्या त्वमगदङ्कारः, प्रतीकारकरोऽभवः ॥ ५

त्वद्दर्शनसुधासारा-स्वादस्य त्रिजगत्पते ! ।
मरुपान्था इव वयं, न तृप्यामो मनागपि ॥ ६

रथः सारथिनेवाऽद्य, कर्णधारेण नौरिव ।
पथा व्रजतु लोकोऽयं, त्वया नेत्रा जगत्पते ! ॥ ७

त्वत्पादपद्मशुश्रूषा-समयाऽधिगमेन नः ।
भगवन्निजमैश्वर्यं, कृतार्थमधुनाऽभवत् ॥ ८

## ३. श्रीसम्भवनाथ-जिनस्तवः

(अनुष्टुप्)

नमो भगवते तुभ्यं, विश्वनाथाय तायिने ।
तृतीयतीर्थनाथाय, सनाथाय महर्द्धिभिः ॥ १

ज्ञानैस्त्रिभिश्चतुर्भिश्चाऽतिशयैः सहजन्मभिः ।
जगद्विलक्षणोऽप्यष्ट-सहस्रस्फुटलक्षणः ॥ २

सदैव हि प्रमत्तानां, प्रमादच्छेदकारणम् ।
इदं त्वज्जन्मकल्याणं, कल्याणायाऽद्य मादृशाम् ॥ ३

सकलापि श्लाघनीया, यामिनीयं जगत्पते ! ।
अकलङ्कतनुर्यस्या-मुदगास्त्वं सुधाकरः ॥ ४

अमर्त्यलोकवन्मर्त्य-लोकोऽप्यस्त्वधुना प्रभो ! ।
देवैस्त्वद्वन्दनाहेतो-रेहिरेयाहिरापरैः ॥ ५

देव ! त्वद्दर्शनसुधा-स्वादसन्तुष्टचेतसाम् ।
पर्याप्तं जीर्णसुधयाऽ-तः परेण सुधान्धसाम् ॥ ६

भगवन् ! भरतक्षेत्र - सरोवरसरोरुह ! ।
भूयान्मधुव्रतस्येव, त्वयि मे परमो लयः ॥ ७

मानवा अपि ते धन्या, ये त्वां पश्यन्ति नित्यशः ।
त्वद्दर्शनोत्सवोऽधीश !, स्वाराज्यादतिरिच्यते ! ॥ ८

## ४. श्रीअभिनन्दन-जिनस्तवः

(अनुष्टुप्)

स्वामिंश्चतुर्थतीर्थेश ! चतुर्थाऽरनभोरवे ! ।
चतुर्थपुरुषार्थश्री-प्रकाशक ! जय प्रभो ! ॥ १

चिरान्नाथेन भवता, सनाथमधुना जगत् ।
विवेकचौरैर्मोहाद्यै-र्नैवोपद्रोष्यते क्वचित् ॥ २

पादपीठलूठन्मूर्ध्नि, मयि पादरजस्तव ।
चिरं निविशतां पुण्य-परमाणुकणोपमम् ॥ ३

मद्दृशौ त्वन्मुखाऽऽसक्ते, हर्षबाष्पजलोर्मिभिः ।
अप्रेक्ष्यप्रेक्षणोद्भूतं, क्षणात्क्षालयतां मलम् ॥ ४

मम त्वद्दर्शनोद्भूता-श्चिरं रोमाञ्चकण्टकाः ।
नुदन्तां चिरकालोत्था-मसद्दर्शनवासनाम् ॥ ५

त्वदाऽऽस्यलासिनी नेत्रे, त्वदुपास्तिकरौ करौ ।
त्वद्गुणश्रोतृणी श्रोत्रे, भूयास्तां सर्वदा मम ॥ ६

कुण्ठाऽपि यदि सोत्कण्ठा, त्वद्गुणग्रहणं प्रति ।
ममैषा भारती तर्हि, स्वस्त्यैतस्यै किमन्यथा ॥ ७

तव प्रेष्योऽस्मि दासोऽस्मि, सेवकोऽस्म्यस्मि किङ्करः ।
ओमिति प्रतिपद्यस्व, नाथ ! नातः परं ब्रूवे ॥ ८

## ५. श्रीसुमतिनाथ-जिनस्तवः

(अनुष्टुप्)

देवत्वज्जन्मकल्याणेनाऽपि-कल्याणभाग्मही ।
किं पुनः पादकमलै-र्यत्र त्वं विहरिष्यसे ॥ १

त्वद्दर्शनसुखप्राप्त्या, कृतकृत्या, दृशोऽधुना ।
कृतार्थाः पाणयश्चैते, भगवन् ! पूजितोऽसि यैः ॥ २

जिननाथ ! तव स्नात्र-चर्चाऽर्चाऽऽदिमहोत्सवः ।
मन्मनोरथचैत्यस्य, चिरात् कलशतां ययौ ॥ ३

जगन्नाथ ! प्रशंसामि, संसारमपि सम्प्रति ।
यत्र त्वद्दर्शनं देव !, मुक्तेरेकं निबन्धनम् ॥ ४

ऊर्मयोऽपि हि गण्यन्ते, स्वयम्भूरमणोदधेः ।
तवाऽतिशयपात्रस्य, न पुनर्मादृशैर्गुणाः ॥ ५

धर्मैकमण्डपस्तम्भ !, जगदुद्योतभास्कर ! ।
कृपावल्लीमहावृक्ष ! रक्ष विश्वं जगत्पते ! ॥ ६

निर्वृतेः संवृतद्वार-समुद्घाटनकुञ्चिका ।
धन्यैः शरीरिभिर्देव !, श्रोष्यते तव देशना ॥ ७

मन्मनस्युज्ज्वलाऽऽदर्श-सन्निभे ! भुवनेश्वर ! ।
त्वन्मूर्ति र्नित्यसङ्क्रान्ता, भूयान्निर्वृतिकारणम् ॥ ८

## ६. श्रीपद्मप्रभ-जिनस्तवः

(अनुष्टुप्)

अस्मिन्नसारे संसारे, मरौ सञ्चारिणां चिरात् ।
त्वद्दर्शनमभूद्देव !, देहभाजां सुधाप्रपा ॥ १

रूपेणाऽप्रतिरूपं त्वाम-श्रान्तं पश्यतां सताम् ।
कृतार्थेयं समभवद्-देवानां निर्निमेषता ॥ २

नित्याऽन्धकारे प्रद्योतः, सुखं निरयिणामपि ।
अभूत्ते तीर्थनाथत्व-रूपकस्य सुखं ह्यदः ॥ ३

पुण्यैः संसारिणां देव !, कृपासारणिवारिणा ।
सिक्त्वा नयसि वृद्धित्वं, चिराद्धर्ममहीरुहम् ॥ ४

जगत्त्रितयनाथत्वं, ज्ञानत्रितयधारिता ।
इदमाऽऽजन्मसिद्धं ते, शीतलत्वमिवाऽम्भसाम् ॥ ५

पद्मवर्ण ! पद्मचिन्ह !,पद्मगन्धिमुखानिल ! ।
पद्मानन ! पद्मान्वित-पद्मासद्म ! जय प्रभो ! ॥ ६

अपारो दुस्तरश्चायं सदा संसारसागरः ।
जानुदघ्नोऽधुना नाथ !, त्वत्प्रसादाद्भविष्यति ॥ ७

न कल्पान्तरसाम्राज्यं, नानुत्तरनिवासिताम् ।
वाञ्छामि किन्तु शुश्रूषां, भवतः पादपद्मयोः ॥ ८

## ७. श्रीसुपार्श्वनाथ-जिनस्तवः

(अनुष्टुप्)

अविज्ञेयस्वरूपे त्वय्य-र्थवादाऽऽग्रहो मम ।
आदित्यमण्डलाऽदाने, फलदानं कपेरिव ॥ १

तथापि त्वत्प्रभावेण, स्तोष्ये त्वां परमेश्वर ! ।
स्यन्दन्ते चन्द्रकान्ता हि, चन्द्रकान्तिप्रभावतः ॥ २

दत्से समस्तकल्याणै-र्यत्सुखं श्वभ्रिणामपि ।
तिर्यग्नरामराणां तत्, कथं नाऽसि सुखप्रदः ? ॥ ३

अप्युद्योतो जगत्त्रय्या-मस्मिन् जन्मोत्सवे तव ।
उदेष्यत्केवलज्ञान-तरणेररुणायते ॥ ४

त्वत्प्रसादस्य सम्पर्का-दिवैताः ककुभोऽखिलाः ।
प्रसादं कलयामासु-रधुना परमेश्वर ! ॥ ५

अमी च वान्ति सुखदाः, पवनाः पावनाकृते ।
सुखदे त्वयि नाथे, हि जगतां कः प्रतीपकृत् ॥ ६

धिग्नः प्रमादिनो धन्या-न्यासनान्यपि तानि नः ।
देव ! त्वज्जन्मकल्याणं, चलित्वाऽत्रापि यैः क्षणात् ॥ ७

निदानं देव ! बध्नामि, निषिद्धमपि सम्प्रति ।
त्वद्दर्शनफलं मेऽस्तु, त्वयि भक्तिर्निरन्तरा ॥ ८

## ८. श्रीचन्द्रप्रभ-जिनस्तवः

(अनुष्टुप्)

त्वामऽनन्तगुणं स्तोतुं, प्रवृत्तोऽस्मि हसास्पदम् ।
आधारबुद्ध्या गगन-स्योत्पाद इव टिट्टिभः ॥ १

व्यापिप्रज्ञस्त्वत्प्रभावात्-क्षमोऽस्मि नु तव स्तवे ।
दिशोऽश्रुतेऽभ्रलेशोऽपि, पौरस्त्याऽनिलसङ्गमात् ॥ २

भविना दृष्टमात्रो वा, ध्यातमात्रोऽपि वा प्रभो ! ।
कर्मपाशच्छेदनायाऽ-पूर्वशस्त्रं किमप्यसि ॥ ३

शुभानां कर्मणामऽद्य, जगत्यभ्युदयः खलु ।
पङ्कजानामिवाऽऽदित्ये, त्वयि विश्वतमश्छिदि ॥ ४

निजं फलमऽदत्वाऽपि, गलिष्यत्यशुभं मम ।
शेफालिकापुष्पमिव, निशाकरकराहतम् ॥ ५

प्रव्रज्याधारि रूपं ते, दूरे विश्वाऽभयप्रदम् ।
मूर्त्याऽनयापि भगवन् !, दुःखं हरसि जन्मिनाम् ॥ ६

कर्माणि भवमूलानि, छेत्तुमत्राऽऽगमः प्रभो ! ।
द्रुमानिवोन्मूलयितुं, वने मत्तमतङ्गजः ॥ ७

अलङ्कारो यथा मुक्ता-हारादिर्हृदयस्य मे ।
बहिरेष तथाऽन्तस्त्वं, भूयास्त्रिभुवनेश्वर ! ॥ ८

## ९. श्रीसुविधिनाथ-जिनस्तवः

(अनुष्टुप्)

धर्महर्म्यदृढस्तम्भ !, सम्यग्ज्ञानसुधाह्रद ! ।
जगदानन्दजीमूत !, जय त्रिभुवनेश्वर ! ॥ १

जगदीश ! तव ब्रूमः, किं नामाऽतिशयान्तरम् ।
यन्माहात्म्यगुणक्रीतिं, त्रिलोकी याति दासताम् ॥ २

स्वर्गराज्येऽपि न भ्राजे, तथा दास्ये यथा तव ।
भात्यद्रौ न तथा रत्न-मप्यऽङ्घ्रिकटके यथा ॥ ३

शिवं यियासुरायासी-र्वैजयन्ताच्छिवाऽन्तिकात् ।
मार्गभ्रान्तस्य लोकस्य, मार्गं दर्शयितुं ध्रुवम् ॥ ४

भरतक्षेत्रगेहस्य, चिरात्त्वमऽसि दैवतम् ।
निःशङ्कं तत्र धर्मोऽद्य, गृहस्थ इव नन्दतु ॥ ५

विश्वनाथ ! त्वदीयस्य, रूपस्याऽस्याऽतिशायिनः ।
अवतारणतां यातु, सर्वोऽयं दिविषद्गणः ॥ ६

ज्योत्स्नायिते प्रभापूरे, लीयमानानि सस्पृहम् ।
दिष्ट्या त्वयि चकोरन्ति, लोचनानि चिरात्प्रभो ! ॥ ७

वासागारे सभायां वा, तिष्ठतश्चलतोऽपि मे ।
त्वन्नाममन्त्रस्मरण-मस्तु सर्वार्थसिद्धिदम् ॥ ८

## १०. श्रीशीतलनाथ-जिनस्तवः

(अनुष्टुप्)

जयेक्ष्वाकुकुलक्षीर-रत्नाकरनिशाकर ! ।
जगन्मोहमहानिद्रा-विद्रावणदिवाकर ! ॥ १

त्वामाऽऽलोकयितुं त्वां च, स्तोतुं त्वामऽर्चितुं तथा ।
आशंसाम्यात्मनोऽनन्ता-दृशो जिह्वा भुजा अपि ॥ २

स्वामिन् दशमतीर्थेश !, तव पादाऽरविन्दयोः ।
न्यस्तान्यमुनि पुष्पाणि, सम्पन्नं तु फलं मयि ॥ ३

अमन्दं दददाऽनन्दं, दुःखतापाऽर्दिताऽऽत्मनाम् ।
मर्त्यलोकेऽवातरस्त्वं, जीमूत इव नूतनः ॥ ४

वसन्तसमयेनेव, दर्शनेन तव प्रभो ! ।
स्युरद्य नूतनश्रीकाः, प्राणिनः पादपा इव ॥ ५

त्वद्दर्शनपवित्राणि, यानि तानि दिनानि मे ।
दिनानि शेषाणि पुनः, कृष्णपक्षतमस्विनी ॥ ६

स्यूतानीवाऽत्मना नित्यं, कुकर्माणि शरीरिणाम् ।
त्वयाऽद्य विघटन्तां, द्रागऽयस्कान्तेन लोहवत् ॥ ७

अत्र वा दिवि वा तिष्ठँ-स्तिष्ठन्नऽन्यत्र वा क्वचित् ।
त्वद्वाहनमहं भूयां, त्वामेव हृदये वहन् ॥ ८

## ११. श्रीश्रेयांसनाथ-जिनस्तवः

(अनुष्टुप्)

सर्वकल्याणकश्रेष्ठं, जन्मकल्याणकं तव ।
विश्राणयतु कल्याणं, कल्याणीभक्तिके मयि ॥ १

स्नपयाम्यथ चर्चामि, किमर्चामि स्तवीमि किम् ? ।
त्वामितीश ! न तृप्तिर्मे, त्वदाऽऽराधनकर्मणि ॥ २

वृषः कुतीर्थिकव्याघ्र-त्रासितस्त्वयि रक्षके ।
अमुष्मिन् भरतक्षेत्रे, स्वैरं चरतु सम्प्रति ॥ ३

अद्य स्वयमधिष्ठाय, हृदयाऽऽयतनं मम ।
दिष्ट्या देवाधिदेव ! त्वं, सनाथीकुरुषेतराम् ॥ ४

न तथा भूषणं नाथ !, ममैभिर्मुकुटादिभिः ।
यथा शिरोऽग्रलुठितै-स्त्वत्पादनखरश्मिभिः ॥ ५

न तथा त्रिजगन्नाथ !, स्तूयमानस्य मागधैः ।
मम प्रमोदो भवति, त्वद्गुणान् स्तुवतो यथा ॥ ६

रत्नसिंहासनस्थस्य, नहि मध्येसभं तथा ।
उच्चैस्त्वं त्वत्पुरो भूमि-निषण्णस्य यथा मम ॥ ७

स्वराज्यसम्भवामेतां, न काङ्क्षामि स्वतन्त्रताम् ।
परतन्त्रश्चिरं भूयां, नाथेन भवता प्रभो ! ॥ ८

## १२. श्रीवासुपूज्यस्वामि-जिनस्तवः

(अनुष्टुप्)

चक्रिणां नैव चक्रेण, न चक्रेणाऽर्धचक्रिणाम् ।
न चेशानस्य शूलेन, न वज्रेण ममाऽपि वा ॥ १

न चास्त्रैरपरेन्द्राणां, यानि भेद्यानि जातुचित् ।
तानि कर्माणि भिद्यन्ते, दर्शनेनाऽपि नाथ ! ते ॥ २

नैव क्षीरोदवेलाभि-र्न प्रभाभिः क्षपापतेः ।
नैव वारिधराऽऽसारै-र्न च गोशीर्षचन्दनैः ॥ ३

न वा निरन्तरैः रम्भा-ऽऽरामैः शाम्यन्ति ये खलु ।
सर्वे ते दुःखसन्तापाः, शीर्यन्ते दर्शनेन ते ॥ ४

न ये नानाविधैः क्वाथै-श्चूर्णैश्च विविधैर्न ये ।
न च प्राज्यैः प्रलेपैर्ये, न च ये शस्त्रकर्मभिः ॥ ५

न च मन्त्रप्रयोगैर्ये, छिद्यन्ते जातु देहिनाम् ।
आमयास्ते प्रलीयन्ते दर्शनेनाऽपि ते प्रभो ! ॥ ६

खलूक्त्वा यदि वाऽनल्प-मल्पमेतद् ब्रवीम्यहम् ।
यत्किञ्चिदऽप्यसाध्यं तत्, साध्यते दर्शनेन ते ॥ ७

त्वद्दर्शनस्याऽस्य फल-मिच्छाम्येतज्जगत्पते ! ।
भूयो भूयः सम्प्रतीव, भवद्दर्शनमस्तु मे ॥ ८

## १३. श्रीविमलनाथ-जिनस्तवः

(अनुष्टुप्)

मोहेन तिमिरेणेव, परितोऽपि प्रसारिणा ।
नितान्तकोपनैर्नक्तं-चरैरिव जटाधरैः ॥ १

बुद्धिसर्वस्वहरणै-श्चार्वाकैस्तस्करैरिव ।
अत्यन्तमायानिपुणै-र्गोमायुभिरिव द्विजैः ॥ २

भ्रमद्भिर्मण्डलीभूय, कौलाचार्यैर्वृकैरिव ।
उलूकैरिव पाखण्डै-र्वल्गद्भिरपरैरपि ॥ ३

सिद्धेनेव विवेकाक्षं, मिथ्यात्वेन विलुम्पता ।
सद्भूतानां पदार्थाना-मविज्ञानेन सर्वतः ॥ ४

अभूच्चिरमयं कालो, यामिन्येव जगत्पते ! ।
प्रभातं त्वधुना जज्ञे, त्वया नाथेन भास्वता ॥ ५

त्वत्पादपद्मामाऽऽसाद्य, लङ्घिताऽलङ्घिता खलु ।
निम्नैरपि हि संसार-निम्नगा निम्नगा जनैः ॥ ६

भवच्छासननिःश्रेणि-मधिरुह्याऽचिरादपि ।
मन्येऽध्यासितमेवोच्चै-र्लोकाऽग्रं भव्यजन्तुभिः ॥ ७

अस्माकमप्यनाथानां, चिरान्नाथोऽस्युपस्थितः ।
निदाघाऽऽतपतप्तानां, पान्थानामिव वारिदः ॥ ८

## १४. श्रीअनन्तनाथ-जिनस्तवः

(अनुष्टुप्)

तवाऽग्रे भूमिलुठनै-र्ये हि भूरेणुनाऽञ्चिताः ।
गोशीर्षचन्दनेनाऽङ्ग-रागस्तेषां न दुर्लभः ॥ १

भक्त्यैकमपि यैः पुष्पं, त्वन्मूर्धन्यधिरोप्यते ।
ते छत्राऽशून्यशिरसः, सञ्चरन्ति निरन्तरम् ॥ २

अङ्गरागस्तवाऽङ्गे यै-रेकदाऽपि विधीयते ।
देवदूष्यांऽशुकधरा-स्ते भवन्ति न संशयः ॥ ३

निधीयते भवत्कण्ठे, पुष्पदामैकदापि यैः ।
लुठन्ति तेषां कण्ठेषु, दोर्लताः सुरयोषिताम् ॥ ४

ये वर्णयन्त्येकदाऽपि, त्वद्गुणानतिनिर्मलान् ।
ते गीयन्ते सुरस्त्रीभि-रपि लोकातिशायिनः ॥ ५

ये चारुचारीचतुरं, भक्त्या वल्गन्ति ते पुरः ।
ऐरावणकरिस्कन्धाऽऽ-सनं तेषां न दुर्लभम् ॥ ६

ध्यायन्ति परमात्मानं, ये त्वां देव ! दिवानिशम् ।
त्वादृशीभूय ते लोके, ध्येयतां यान्ति सर्वदा ॥ ७

स्नात्राऽङ्गरागनेपथ्याऽऽ-कल्पप्रभृतिकल्पने ।
अधित्वन्मेऽधिकारोऽस्तु, सदाऽपि त्वत्प्रसादतः ॥ ८

## १५. श्रीधर्मनाथ-जिनस्तवः

(अनुष्टुप्)

नमस्तुभ्यं पञ्चदशा-याऽऽर्हते परमेश्वर ! ।
परमध्येयरूपाय, परमध्यायिनेऽपि च ॥ १

देवेभ्यो दानवेभ्योऽपि, मर्त्यान्मन्ये गरीयसः ।
त्रैलोक्यवन्द्यो यत्र त्व-मुदभूस्तीर्थनायकः ॥ २

अपाग्भरतवर्षेऽस्मिन्, ममाऽद्यैवाऽस्तु मर्त्यता ।
मोक्षसाधनसाधीय-स्त्वच्छिष्यत्वजिघृक्षया ॥ ३

नारकेभ्यो नाकसदां, को भेदः सुखिनामपि ।
भवेद्येषां प्रमत्तानां, न भवत्पाददर्शनम् ॥ ४

विजृम्भितं तावदेव, घूकैरिव कुतीर्थिकैः ।
न यावत्त्रिजगन्नाथ !, रवेरिव तवोदयः ॥ ५

तव वर्षाऽम्बुदस्येव, धर्मदेशनवारिणा ।
भरताऽर्धं सर इवाऽ-शेषं पूरिष्यतेऽचिरात् ॥ ६

अनन्तान् देहिनो मुक्तिं, प्रापयन् परमेश्वर ! ।
अरिदेशमिवोर्वीश-स्त्वं कर्ता भवमुद्वसम् ॥ ७

त्वत्पादपद्मलीनेन, षट्पदेनेव चेतसा ।
भगवन् ! कल्पवासेऽपि, प्रयान्तु मम वासराः ॥ ८

## १६. श्रीशान्तिनाथ-जिनस्तवः ॥

(अनुष्टुप्)

भगवन् ! भवते विश्व-जनीनायाऽद्भुतदर्धये ।
संसारमरुमार्गैक-च्छायाविटपिने नमः ॥ १

सञ्चितैनस्तमस्विन्याः, प्रभातसमयो मया ।
त्वदीयं दर्शनं दिष्ट्याऽ-धिगतं परमेश्वर ! ॥ २

लोचनान्यपि धन्यानि, यैर्दृष्टोऽसि जगत्पते ! ।
तेभ्योऽपि पाणयो धन्या-स्त्वत्संस्पर्शोऽन्वभावि यैः ॥ ३

विद्याधराणां महर्द्धि-श्चक्रवर्ती कदाऽप्यसि ।
प्रकृष्टोऽस्येकदा देवो, बलदेवोऽसि चैकदा ॥ ४

एकदाऽप्यच्युतेन्द्रोऽसि, ज्ञानी चक्रभृदेकदा ।
एकदा त्वं महेन्द्रोऽसि, ग्रैवेयकविभूषणम् ॥ ५

महासत्त्वोऽवधिज्ञान-धरो राजाऽसि चैकदा ।
सर्वार्थसिद्धाऽलङ्कारो-ऽहमिन्द्रः पुनरेकदा ॥ ६

क्व क्व जन्मनि नाभूस्त्व-मुत्कृष्टः परमेश्वर ! ।
तीर्थकृज्जन्मना त्वऽद्य, पर्याप्ता वर्णना गिरः ॥ ७

नेशोऽस्मि त्वद्गुणान् वक्तुं, स्वमर्थं किं तु वच्म्यहम् ।
भवे भवे भवतु मे, भक्तिस्त्वत्पादपद्मयोः ॥ ८

## १७. श्रीकुन्थुनाथ-जिनस्तवः

(अनुष्टुप्)

अद्य नीराणि क्षीरोद-प्रभृतीनामुदन्वताम् ।
पद्मप्रभृतिहृदानां, पद्मानि च पयांसि च ॥ १

औषध्यः क्षुद्रहिमवत्-प्रभृतीनां महीभृताम् ।
भद्रशालप्रभृतीनां, वनानां कुसुमान्यपि ॥ २

मलयाऽधित्यकादीनां, भूमीनां चन्दनानि च ।
युष्मत्स्नात्रोपयोगेन, कृतार्थानि जगत्पते ! ॥ (त्रिभि.) ३

कृतार्थमिदमैश्वर्य-मखिलानां दिवौकसाम् ।
देव ! त्वज्जन्मकल्याणक-महोत्सवविधानतः ॥ ४

उत्कृष्टो भूभृतामद्य, तीर्थभूतोऽयमद्य च ।
प्रासाद इव बिम्बेन, त्वया मेरुरलङ्कृतः ॥ ५

अद्य चक्षूंषि चक्षूंषि, पाणयश्चाऽद्य पाणयः ।
दर्शनेन स्पर्शनेन, भवतो भुवनेश्वरः ! ॥ ६

अद्य नः सफलं नाथाऽ-वधिज्ञानं निसर्गजम् ।
येन ते जन्म विज्ञाय, जन्मोत्सवमकृष्महि ॥ ७

यथाऽद्य हृदयद्वारे, स्नात्रकाले ममाऽभवः ।
तथैव हृदयस्याऽन्त-रपि भूयाश्चिरं प्रभो ! ॥ ८

## १८. श्रीअरनाथ-जिनस्तव

(अनुष्टुप्)

नष्टाऽष्टादशदोषायाऽ-ष्टादशायाऽर्हते प्रभो ! ।
अष्टादशविधब्रह्म-भृतां ध्येयाय ते नमः ॥ १

ज्ञानत्रयं गर्भतोऽपि, यथैवाऽयतने तव ।
तथैवाऽखिलमप्येतत्, तीर्थनाथ ! जगत्त्रयम् ॥ २

मोहाऽवस्वापिनीं दत्त्वा, रागद्वेषादिदस्युभिः ।
चिरं जगदवस्कन्नं, स्वामिँस्त्रायस्व सम्प्रति ॥ ३

पथि श्रान्तैरिव रथ-स्तृष्णाऽऽक्रान्तैरिवाऽपगा ।
तप्तैरिव तरुच्छाया, निमज्जद्भिरिवोडुपः ॥ ४

रोगिभिरिव भैषज्यं, ध्वान्ताऽन्धैरिव दीपकः ।
हिमार्तैरिव मार्तण्डो,मार्गमूढैरिवाऽग्रगः ॥ ५

व्याघ्रभीतैरिवार्चिष्मान्नैर्नाथ्यविधुरैश्चिरात् ।
तीर्थनाथ ! त्वमस्माभि-र्नाथः प्राप्तोऽसि सम्प्रति ॥ (त्रिभि.)६

भवन्तं नाथमाऽऽसाद्य, सुरासुरनरा अमी ।
स्वस्वस्थानेभ्य आगच्छ-न्त्यमान्त इव हर्षतः ॥ ७

भवतो नाथ ! नाथामि, न खल्वन्यत् किमप्यहम् ।
नाथामि किन्त्विदं मे त्वं, नाथो भूया भवे भवे ॥ ८

## १९. श्रीमल्लिनाथ-जिनस्तवः

(अनुष्टुप्)

ज्ञानत्रयनिधानाय, प्रधानाय जगत्त्रये ।
एकोनविंशतितमाऽ-याऽर्हते ते नमो नमः ॥ १

दिष्ट्या त्वद्दर्शनेनाऽनु-गृहीतोऽस्मि चिरादहम् ।
सामान्यपुण्यैर्न ह्यर्हन्, देवः साक्षान्निरीक्ष्यते ॥ २

देवानामद्य देवत्वं, चरितार्थं चिरादऽभूत् ।
तव देवाधिदेवस्य, जन्मोत्सवनिरीक्षणात् ॥ ३

एकतोऽच्युतनाथस्य, प्राणिमात्रस्य चाऽन्यतः ।
समानुग्रहबुद्धे ! त्वं, पाहि नः पततो भवे ॥ ४

अस्मिन्मेरुगिरिर्धात्र्याः, सुवर्णमुकुटायते ।
इन्द्रनील इव न्यस्त-स्त्वमतीव विराजसे ॥ ५

स्मरणेनाऽपि मोक्षायाऽ-नीहमानस्य जायते ।
दृष्ट्वा स्तुत्वा याच्यसे किं, ततोऽप्यभ्यधिकं फलम् ॥ ६

धर्माण्येकत्र सर्वाणि, तव चैकत्र दर्शनम् ।
फलाऽप्तिसाधकत्वेन, द्वितीयमतिरिच्यते ॥ ७

नेन्द्रत्वे नाऽहमिन्द्रत्वे, मन्ये मोक्षेऽपि नो तथा ।
यथासुखं स्याल्लुठतः, पुरस्त्वत्पादपद्मयोः ॥ ८

## २०. श्रीमुनिसुव्रतस्वामि-जिनस्तवः

(अनुष्टुप्)

अद्याऽवसर्पिणीकाल-सरोवरसरोरुह ! ।
दिष्ट्या प्राप्तोऽसि भगवन्न-स्माभिर्भ्रमरैश्चिरात् ॥ १

अजायत तव स्तोत्रा-द्ध्यानात् पूजादिकादऽपि ।
वाङ् मनोवपुषां श्रेयः, फलमद्यैव देव ! मे ॥ २

यथा यथा नाथ ! भक्ति-र्गुरुर्भवति मे त्वयि ।
लघूभवन्ति कर्माणि, प्राक्तनानि तथा तथा ॥ ३

स्वामिन्नविरतानां नः, स्याज्जन्मैतन्निरर्थकम् ।
यदि त्वद्दर्शनं न स्या-दिदं पुण्यनिबन्धनम् ॥ ४

तवाऽङ्गस्पर्शनस्तोत्र-निर्माल्याऽऽघ्राणदर्शनैः ।
गुणगीताऽऽकर्णनैश्च, कृतार्थानीन्द्रियाणि नः ॥ ५

मेरुमौलिरयं भाति, नीलरत्नत्विषा त्वया ।
प्रावृषेण्याम्बुदेनेव, नयनाऽऽनन्ददायिना ॥ ६

स्थितो भरतवर्षेऽपि, सर्वगः प्रतिभासि नः ।
यत्र तत्र स्थितानां यद्-भवस्यर्तिच्छिदे स्मृतः ॥ ७

अस्तु च्यवनकालेऽपि, त्वत्पादस्मरणं मम ।
यथा प्राग्जन्मसंस्कारा-त्तदेव स्याद्भवान्तरे ॥ ८

## २१. श्री नमिनाथ-जिनस्तवः

(अनुष्टुप्)

व्याहर्ता मोक्षमार्गस्य, संहर्ता सर्वकर्मणाम् ।
प्रहर्ता च कषायाणां, जय त्वं परमेश्वर ! ॥ १

कुमतस्याऽपनेतारं, नेतारं जगतामपि ।
सद्बोधस्य प्रणेतारं, त्वां नमामि जगद्गुरो ! ॥ २

विश्वैश्वर्यस्याऽधिकर्त्रा, न्यक्कर्त्रा विश्वपाप्मनाम् ।
अविकर्त्रोपकर्त्रा च, सनाथं भवता जगत् ॥ ३

धर्मबीजसमुद्धर्त्रे, धर्त्रेऽतिशयसम्पदाम् ।
श्रुतस्कन्धविधात्रे च, भगवन् ! भवते नमः ॥ ४

प्रत्यादेष्टुः कुमार्गाणा-मादेष्टुर्मुक्तिवर्त्मनः ।
धर्मः प्रभविता त्वत्त, उपदेष्टुरतः परम् ॥ ५

नव्यतीर्थप्रतिष्ठातु-रनुष्ठातुस्तपःश्रियाम् ।
प्रभो ! जगदधिष्ठातु-र्भवतः किङ्करा वयम् ॥ ६

आदातर्यपवर्गस्य, विश्वस्याऽभयदातरि ।
त्वयि त्रैलोक्यशरणे, प्रपन्नशरणोऽस्म्यहम् ॥ ७

अस्मिन् भवे यथाभूस्त्वं, प्रभुर्मम जगत्पते ! ।
भवाऽन्तरेष्वपि तथा, भूया नाऽन्यो मनोरथः ॥ ८

## २२. श्रीनेमिनाथ-जिनस्तवः

(अनुष्टुप्)

शिवगामिन् ! शिवाकुक्षि-शुक्तिमुक्तामणे ! प्रभो ! ।
शिवानामेकनिलय ! भगवँस्त्वं शिवङ्करः ॥ १

तुभ्यमभ्यर्णमोक्षाय, समक्षाऽशेषवस्तवे ।
विविधर्द्धिनिधानाय, द्वाविंशायाऽर्हते नमः ॥ २

हरिवंशः पवित्रोऽयं, पवित्रा भारती च भूः ।
यस्मिंश्चरमदेहस्त्व-मवातारीर्जगद्गुरो ! ॥ ३

कृपाया एक आधारो, ब्रह्मणश्चैकमाऽऽस्पदम् ।
ऐश्वर्यस्याऽऽश्रयश्चैक-स्त्वमेव त्रिजगद्गुरो ॥ ४

भवतो दर्शनेनैवाऽ-तिमहिम्ना जगत्पते ! ।
देहिनां मोहविध्वंसा-द्देशनाकर्म सिध्यति ॥ ५

विनैव कारणं त्राता, विना हेतुं च वत्सलः ।
विना निमित्तं भर्ता त्वं, हरिवंशैकमौक्तिकः ॥ ६

अद्याऽपराजितादेतद्-भरतक्षेत्रमुत्तमम् ।
शर्मणे यत्र लोकस्य, बोधिदस्त्वमवातरः ॥ ७

नित्यं भजन्तु त्वत्पादा, मानसे मम हंसताम् ।
चरितार्था भवतु च, त्वद्गुणस्तवनेन गीः ॥ ८

## २३. श्रीपार्श्वनाथ-जिनस्तवः

(अनुष्टुप्)

नमः प्रियङ्गुवर्णाय, जगतः प्रियहेतवे ।
तुभ्यं दुस्तरसंसार-पारावारैकसेतवे ॥ १

ज्ञानरत्नैककोशाय, व्याकोशेन्दीवरत्विषे ।
भव्याऽरविन्दांऽशुमते, तुभ्यं भगवते नमः ॥ २

फणभृल्लक्ष्मणेऽष्टाग्र-सहस्रनरलक्ष्मणे ।
तुभ्यं नमः कर्मतमो-विध्वंसशशलक्ष्मणे ॥ ३

जगत्त्रयपवित्राय, ज्ञानत्रितयधारिणे ।
कर्मस्थलखनित्राय, सुचरित्राय ते नमः ॥ ४

सर्वाऽतिशयपात्रायाऽ-तिमात्रकरुणावते ।
सर्वसम्पदमत्राय, नमस्ते परमात्मने ॥ ५

दूरीभूतकषायाय, मुदितक्षीरवार्धये ।
रागद्वेषविमुक्ताय, नमस्ते मुक्तिगामिने ॥ ६

फलं त्वत्पादसेवाया, यद्यस्ति परमेश्वर ! ।
तदैतदेव मे भूयात्, त्वयि भक्तिर्भवे भवे ॥ ७

## २४. श्रीवर्धमानजिनस्तवः

(अनुष्टुप्)

नमोऽर्हते भगवते, स्वयम्बुद्धाय वेधसे ।
तीर्थङ्करायादिकृते, पुरुषेषूत्तमाय ते ॥ १

नमो लोकप्रदीपाय, लोकप्रद्योतकारिणे ।
लोकोत्तमाय लोकाधीशाय लोकहिताय ते ॥ २

नमस्ते पुरुषवरपुण्डरीकाय शम्भवे ।
पुरुषसिंहाय पुरुषैकगन्धद्विपाय ते ॥ ३

चक्षुर्दायाभयदाय, बोधिदायाध्वदायिने ।
धर्मदाय धर्मदेष्ट्रे, नमः शरणदायिने ॥ ४

धर्मसारथये धर्मनेत्रे धर्मैकचक्रिणे ।
व्यावृत्तच्छद्मने सम्यग्ज्ञानदर्शनधारिणे ॥ ५

जिनाय ते जापकाय, तीर्णाय तारकाय च ।
विमुक्ताय मोचकाय, नमो बुद्धाय बोधिने ॥ ६

सर्वज्ञाय नमस्तुभ्यं,स्वामिने सर्वदर्शिने ।
सर्वातिशयपात्राय, कर्माष्टकनिषूदिने ॥ ७

तुभ्यं क्षेत्राय पात्राय, तीर्थाय परमात्मने ।
स्याद्वादवादिने वीत-रागाय मुनये नमः ॥ ८

पूज्यानामापि पूज्याय, महद्भ्योऽपि महीयसे ।
आचार्याणामाचार्याय, ज्येष्ठानां ज्यायसे नमः ॥ ९

नमो विश्वम्भुवे तुभ्यं, योगिनाथाय योगिने ।
पावनाय पवित्रायानुत्तरायोत्तराय च ॥ १०

संप्रक्षालनाय योगाचार्याय प्रवराय च ।
अग्राय वाचस्पतये, माङ्गल्याय नमोऽस्तु ते ॥ ११

नमः परस्तादुदितायैकवीराय भास्वते ।
ॐभूर्भुवःस्वरितिवाक्–स्तवनीयाय ते नमः ॥ १२

नमः सर्वजनीनाय, सर्वार्थायामृताय च ।
उदितब्रह्मचर्यायाप्ताय पारङ्गताय ते ॥ १३

नमस्ते दक्षिणीयाय, निर्विकाराय तायिने ।
वज्रऋषभनाराचवपुषे तत्त्वदृश्वने ॥ १४

नमः कालत्रयज्ञाय,जिनेन्द्राय स्वयम्भुवे ।
ज्ञानबलवीर्यतेजःशक्त्यैश्वर्यमयाय ते ॥ १५

आदिपुंसे नमस्तुभ्यं, नमस्ते परमेष्ठिने ।
नमस्तुभ्यं महेशाय, ज्योतिस्तत्त्वाय ते नमः ॥ १६

तुभ्यं सिद्धार्थराजेन्द्रकुलक्षीरोदधीन्दवे ।
महावीराय धीराय, त्रिजगत्स्वामिने नमः ॥ १७

पू.आ.श्री समन्तभद्रसूरिविरचितानि

# ४. ॥ चतुर्विंशतिजिनस्तोत्राणि ॥

## १. श्रीवृषभ-जिन-स्तवनम्

(वंशस्थ)

स्वयम्भुवा भूत-हितेन भूतले समञ्जस-ज्ञान-विभूति-चक्षुषा ।
विराजितं येन विधुन्वता तमः क्षपाकरेणेव गुणोत्करैः करैः ॥१

प्रजापतिर्यः प्रथमं जिजीविषूः शशास कृष्यादिषु कर्मसु प्रजाः।
प्रबुद्धतत्त्वः पुनरद्भुतोदयो ममत्वतो निर्विविदे विदांवरः ॥ २

विहाय यः सागर-वारि-वाससं वधूमिवेमां वसुधा-वधूं सतीम्।
मुमुक्षुरिक्ष्वाकु-कुलादिरात्मवान्
प्रभुः प्रवव्राज सहिष्णुरच्युतः ॥ ३

स्व-दोष-मूलं स्व-समाधि-तेजसा
निनाय यो निर्दय-भस्मसात्क्रियाम् ।
जगाद तत्त्वं जगतेऽर्थिनेऽञ्जसा
बभूव च ब्रह्म-पदाऽमृतेश्वरः ॥ ४

स विश्व-चक्षुर्वृषभोऽर्चितः सतां
समग्र-विद्याऽऽत्म-वपुर्निरञ्जनः ।
पुनातु चेतो मम नाभि-नन्दनो
जिनोऽजित-क्षुल्लक-वादि-शासनः ॥ ५

## २. श्रीअजित-जिन-स्तवनम्

(उपजाति)

यस्य प्रभावात् त्रिदिव-च्युतस्य
क्रीडास्वपि क्षीवमुखाऽरविन्दः ।
अजेय-शक्तिर्भुवि बन्धु-वर्गश्चकार-
नामाऽजित इत्यवन्ध्यम् ॥ १

अद्याऽपि यस्याऽजितशासनस्य
सतां प्रणेतुः प्रतिमङ्गलार्थम् ।
प्रगृह्यते नाम परमं पवित्रं
स्वसिद्धि-कामेन जनेन लोके ॥ (उपेन्द्रवज्रा) २

यः प्रादुरासीत्प्रभु-शक्ति-भूम्ना
भव्याऽऽशयालीन-कलङ्क-शान्त्यै ।
महामुनिर्मुक्त-घनोपदेहो
यथाऽरविन्दाऽभ्युदयाय भास्वान् ॥ ३

येन प्रणीतं पृथु धर्म-तीर्थं
ज्येष्ठं जनाः प्राप्य जयन्ति दुःखम् ।
गाङ्गं ह्रदं चन्दन-पङ्क-शीतं
गज-प्रवेका इव घर्म-तप्ताः ॥ ४

स ब्रह्मनिष्ठः सम-मित्र-शत्रु-
र्विद्या-विनिर्वान्त-कषाय-दोषः ।
लब्धात्मलक्ष्मीरजितोऽजितात्मा
जिनः श्रियं मे भगवान् विधत्ताम् ॥ ५

## ३. श्रीशम्भव-जिन-स्तवनम्

त्वं शम्भवः सम्भव-तर्ष-रोगैः
सन्तप्यमानस्य जनस्य लोके ।
आसीरिहाऽऽकस्मिक एव वैद्यो
वैद्यो यथाऽनाथरुजां प्रशान्त्यै ॥ (इन्द्रवज्रा) १

अनित्यमत्राणमहंक्रियाभिः
प्रसक्त-मिथ्याऽध्यवसाय-दोषम् ।
इदं जगज्जन्म-जराऽन्तकार्त्तं
निरञ्जनां शान्तिमजीगमस्त्वम् ॥ (उपेन्द्रवज्रा) २

शतह्रदोन्मेष-चलं हि सौख्यं
तृष्णाऽऽमयाऽप्यायन-मात्र-हेतुः ।
तृष्णाभिवृद्धिश्च तपत्यजस्रं
तापस्तदायासयतीत्यवादीः ॥ (उपजाति) ३

बन्धश्च मोक्षश्च तयोश्च हेतू
बद्धश्च मुक्तश्च फलं च मुक्तेः ।
स्याद्वादिनो नाथ ! तवैव युक्तं
नैकान्तदृष्टेस्त्वमतोऽसि शास्ता ॥ (इन्द्रवज्रा) ४

शक्रोऽप्यशक्तस्तव पुण्यकीर्तेः
स्तुत्यां प्रवृत्तः किमु मादृशोऽज्ञः ।
तथाऽपि भक्त्या स्तुत-पाद-पद्मो
ममार्य ! देयाः शिवतातिमुच्चैः ॥ (उपजाति) ५

## ४. श्रीअभिनन्दन-जिन-स्तवनम्

(वंशस्थ)

गुणाऽभिनन्दादभिनन्दनो भवान्
दया-वधूं क्षान्ति-सखीमशिश्रियत् ।
समाधि-तन्त्रस्तदुपोपपत्तये
द्वयेन नैर्ग्रन्थ्य-गुणेन चाऽयुजत् ॥ १

अचेतने तत्कृत-बन्धजेऽपि च
ममेदमित्याभिनिवेशिक-ग्रहात् ।
प्रभङ्गुरे स्थावर-निश्चयेन च
क्षतं जगत्तत्त्वमजिग्रहद्भवान् ॥ २

क्षुदादि-दुःख-प्रतिकारतः स्थिति-
र्न चेन्द्रियार्थ-प्रभवाऽल्प-सौख्यतः ।
ततो गुणो नास्ति च देह-देहिनो-
रितीदमित्थं भगवान् व्यजिज्ञपत् ॥ ३

जनोऽतिलोलोऽप्यनुबन्धदोषतो
भयादकार्येष्विह न प्रवर्तते ।
इहाऽप्यमुत्राऽप्यनुबन्धदोषवित्
कथं सुखे संसजतीति चाऽब्रवीत् ॥ ४

स चानुबन्धोऽस्य जनस्य तापकृत्
तृषोऽभिवृद्धिः सुखतो न च स्थितिः ।
इति प्रभो ! लोक-हितं यतो मतं
ततो भवानेव गतिः सतां मतः ॥ ५

## ५. श्रीसुमति-जिन-स्तवनम्

(उपजाति)

अन्वर्थसंज्ञः सुमतिर्मुनिस्त्वं
स्वयं मतं येन सुयुक्ति-नीतम् ।
यतश्च शेषेषु मतेषु नास्ति
सर्व-क्रिया-कारक-तत्त्व-सिद्धिः ॥ १

अनेकमेकं च तदेव तत्त्वं
भेदाऽन्वयज्ञानमिदं हि सत्यम् ।
मृषोपचारोऽन्यतरस्य लोपे
तच्छेषलोपोऽपि ततोऽनुपाख्यम् ॥ २

सतः कथञ्चित्तदसत्व-शक्तिः
खे नास्ति पुष्पं तरुषु प्रसिद्धम् ।
सर्व-स्वभाव-च्युतमप्रमाणं
स्व-वाग्विरुद्धं तव दृष्टितोऽन्यत् ॥ ३

न सर्वथा नित्यमुदेत्यपैति
न च क्रिया-कारकमत्र युक्तम् ।
नैवाऽसतो जन्म सतो न नाशो
दीपस्तमःपुद्गलभावतोऽस्ति ॥ ४

विधिर्निषेधश्च कथञ्चिदिष्टौ
विवक्षया मुख्य-गुण-व्यवस्था ।
इति प्रणीतिः सुमतेस्तवेयं
मति-प्रवेकः स्तुवतोऽस्तु नाथ ! ॥ (उपेन्द्रवज्रा) ५

## ६. श्री पद्मप्रभ-जिन-स्तवनम्

(उपजाति)

पद्मप्रभः पद्म-पलाश-लेश्यः
पद्मालयाऽऽलिङ्गितचारुमूर्तिः ।
बभौ भवान् भव्य-पयोरुहाणां
पद्माकराणामिव पद्मबन्धुः ॥ १

बभार पद्मां च सरस्वतीं च
भवान् पुरस्तात्प्रतिमुक्तिलक्ष्म्याः ।
सरस्वतीमेव समग्र-शोभां
सर्वज्ञ-लक्ष्मीं ज्वलितां विमुक्तः ॥ २

शरीर-रश्मि-प्रसरः प्रभोस्ते
बालार्क-रश्मिच्छविराऽऽलिलेप ।
नराऽमराऽऽकीर्ण-सभां प्रभा वा
शैलस्य पद्माभमणेः स्वसानुम् ॥ ३

नभस्तलं पल्लवयन्निव त्वं
सहस्रपत्राऽम्बुज-गर्भचारैः ।
पादाऽम्बुजैः पातित-मार-दर्पो
भूमौ प्रजानां विजहर्थ भूत्यै ॥ ४

गुणाम्बुधेर्विप्रुषमप्यजस्रं
नाऽऽखण्डलः स्तोतुमलं तवर्षेः ।
प्रागेव मादृक्किमुताऽतिभक्ति-
र्मां बालमालापयतीदमित्थम् ॥ ५

## ७. श्री सुपार्श्व-जिन-स्तवनम्

(उपजाति)

स्वास्थ्यं यदात्यन्तिकमेष पुंसां
स्वार्थो न भोगः परिभङ्गुरात्मा ।
तृषोऽनुषङ्गान्न च तापशान्ति-
रितीदमाख्यद्भगवान् सुपार्श्वः ॥ १

अजङ्गमं जङ्गम-नेय-यन्त्रं
यथा तथा जीव-धृतं शरीरम् ।
बीभत्सु पूति क्षयि तापकं च
स्नेहो वृथाऽत्रेति हितं त्वमाख्यः ॥ २

अलङ्घ्यशक्तिर्भवितव्यतेयं
हेतु-द्वयाऽऽविष्कृत-कार्य-लिङ्गा ।
अनीश्वरो जन्तुरहंक्रियार्त्तः
संहत्य कार्येष्विति साध्ववादीः ॥ ३

बिभेति मृत्योर्न ततोऽस्ति मोक्षो
नित्यं शिवं वाञ्छति नाऽस्य लाभः ।
तथाऽपि बालो भय-काम-वश्यो
वृथा स्वयं तप्यत इत्यवादीः ॥ ४

सर्वस्व तत्त्वस्य भवान् प्रमाता
मातेव बालस्य हिताऽनुशास्ता ।
गुणाऽवलोकस्य जनस्य नेता
मयाऽपि भक्त्या परिणूयतेऽद्य ॥ ५

## ८. श्रीचन्द्रप्रभ-जिन-स्तवनम्

(उपजाति)

चन्द्रप्रभं चन्द्र-मरीचि-गौरं
चन्द्रं द्वितीयं जगतीव कान्तम् ।
वन्देऽभिवन्द्यं महतामृषीन्द्रं
जिनं जित-स्वान्त-कषाय-बन्धम् ॥ १

यस्याङ्ग-लक्ष्मी-परिवेश-भिन्नं
तमस्तमोऽरेरिव रश्मिभिन्नम् ।
ननाश बाह्यं बहु मानसं च
ध्यान-प्रदीपाऽतिशयेन भिन्नम् ॥ २

स्व-पक्ष-सौस्थित्य-मदाऽवलिप्ता
वाक्सिंह-नादैर्विमदा बभूवुः ।
प्रवादिनो यस्य मदार्द्रगण्डा
गजा यथा केसरिणो निनादैः ॥ ३

यः सर्व-लोके परमेष्ठितायाः
पदं बभूवाऽद्भुत-कर्मतेजाः ।
अनन्त-धामाऽक्षर-विश्वचक्षुः
समन्तदुःख-क्षय-शासनश्च ॥ ४

स चन्द्रमा भव्य-कुमुद्वतीनां
विपन्न-दोषाऽभ्र-कलङ्क-लेपः ।
व्याकोश-वाङ् -न्याय-मयूख-मालः
पूयात्पवित्रो भगवान्मनो मे ॥ ५

## ९. श्रीसुविधि-जिन-स्तवनम्

(उपजाति)

एकान्तदृष्टि-प्रतिषेधि तत्त्वं
प्रमाण-सिद्धं तदतत्स्वभावम् ।
त्वया प्रणीतं सुविधे ! स्वधाम्ना
नैतत्समालीढ-पदं त्वदन्यैः ॥ १

तदेव च स्यान्न तदेव च स्यात्
तथाप्रतीतेस्तव तत्कथञ्चित् ।
नाऽत्यन्तमन्यत्वमनन्यता च
विधेर्निषेधस्य च शून्य-दोषात् ॥ २

नित्यं तदेवेदमिति प्रतीते-
र्न नित्यमन्य-प्रतिपत्ति-सिद्धेः ।
न तद्विरुद्धं बहिरन्तरङ्ग-
निमित्त-नैमित्तिक-योगतस्ते ॥ ३

अनेकमेकं च पदस्य वाच्यं
वृक्षा इति प्रत्ययवत्प्रकृत्या ।
आकाङ्क्षिणः स्यादिति वै निपातो
गुणाऽनपेक्षे नियमेऽपवादः ॥ ४

गुण-प्रधानार्थमिदं हि वाक्यं
जिनस्य ते तद्द्विषतामपथ्यम् ।
ततोऽभिवन्द्यं जगदीश्वराणां
ममाऽपि साधोस्तव पादपद्मम् ॥ ५

## १०. श्रीशीतल-जिन-स्तवनम्

(वंशस्थ)

न शीतलाश्चन्दनचन्द्ररश्मयो
न गाङ्गमम्भो न च हारयष्टयः ।
यथा मुनेस्तेऽनघ ! वाक्य-रश्मयः
शमाम्बुगर्भाः शिशिरा विपश्चिताम् ॥ १

सुखाऽभिलाषाऽनल-दाह-मूर्च्छितं
मनो निजं ज्ञानमयाऽमृताऽम्बुभिः ।
व्यदिध्यपस्त्वं विष-दाह-मोहितं
यथा भिषग्मन्त्र-गुणैः स्व-विग्रहम् ॥ २

स्व-जीविते काम-सुखे च तृष्णया
दिवा श्रमार्त्ता निशि शेरते प्रजाः ।
त्वमार्य ! नक्तं-दिवमप्रमत्तवा-
न जागरेवाऽऽत्म-विशुद्ध-वर्त्मनि ॥ ३

अपत्य-वित्तोत्तर-लोक-तृष्णया
तपस्विनः केचन कर्म कुर्वते ।
भवान्पुनर्जन्म-जरा-जिहासया
त्रयीं प्रवृत्तिं समधीरवारुणत् ॥ ४

त्वमुत्तम-ज्योतिरजः क्व निर्वृतः
क्व ते परे बुद्धि-लवोद्धव-क्षताः ।
ततः स्वनिःश्रेयस-भावनापरै-
र्बुध-प्रवेकैर्जिन ! शीतलेड्यसे ॥ ५

## ११. श्रीश्रेयांस-जिन-स्तवनम्

श्रेयान् जिनः श्रेयसि वर्त्मनीमाः
श्रेयः प्रजाः शासदजेयवाक्यः ।
भवांश्चकाशे भुवनत्रयेऽस्मि-
न्नेको यथा वीत-घनो विवस्वान् ॥ (उपजाति) १

विधिर्विषक्त-प्रतिषेधरूपः
प्रमाणमत्राऽन्यतरत्प्रधानम् ।
गुणोऽपरो मुख्य-नियामहेतु-
र्नयः स दृष्टान्तसमर्थनस्ते ॥ (उपेन्द्रवज्रा) २

विवक्षितो मुख्य इतीष्यतेऽन्यो
गुणोऽविवक्षो न निरात्मकस्ते ।
तथाऽरिमित्राऽनुभयादिशक्ति-
र्द्वयाऽवधेः कार्यकरं हि वस्तु ॥ (उपेन्द्रवज्रा) ३

दृष्टान्त-सिद्धावुभयोर्विवादे
साध्यं प्रसिद्ध्येन्न तु तादृगस्ति ।
यत्सर्वथैकान्त-नियामि दृष्टं
त्वदीय-दृष्टिर्विभवत्यशेषे ॥ (उपजाति) ४

एकान्त-दृष्टि-प्रतिषेध-सिद्धि-
र्न्यायेषुभिर्मोहरिपुं निरस्य ।
असि स्म कैवल्य-विभूति-सम्राट्
ततस्त्वमर्हन्नसि मे स्तवार्हः ॥ (उपजाति) ५

## १२. श्रीवासुपूज्य-जिन-स्तवनम्

शिवासु पूज्योऽभ्युदय-क्रियासु
त्वं वासुपूज्यस्त्रिदशेन्द्र-पूज्यः ।
मयाऽपि पूज्योऽल्प-धिया मुनीन्द्र !
दीपार्चिषा किं तपनो न पूज्यः ॥ (उपजाति) १

न पूजयाऽर्थस्त्वयि वीतरागे
न निन्दया नाथ ! विवान्त-वैरे ।
तथाऽपि ते पुण्य-गुण-स्मृतिर्नः
पुनाति चित्तं दुरिताञ्जनेभ्यः ॥ (उपेन्द्रवज्रा) २

पूज्यं जिनं त्वाऽर्चयतो जनस्य
सावद्य-लेशो बहु-पुण्य-राशौ ।
दोषाय नाऽलं कणिका विषस्य
न दूषिका शीत-शिवाऽम्बुराशौ ॥ (उपजाति) ३

यद्वस्तु बाह्यं गुण-दोष-सूते-
र्निमित्तमभ्यन्तर-मूलहेतोः ।
अध्यात्म-वृत्तस्य तदङ्गभूत-
मभ्यन्तरं केवलमप्यलं न ॥ (उपजाति) ४

बाह्येतरोपाधि-समग्रतेयं
कार्येषु ते द्रव्यगतः स्वभावः ।
नैवाऽन्यथा मोक्ष-विधिश्च पुंसां
तेनाऽभिवन्द्यस्त्वमृषिर्बुधानाम् ॥ (इन्द्रवज्रा) ५

## १३. श्रीविमल-जिन-स्तवनम्

(वंशस्थ)

य एव नित्य-क्षणिकादयो नया
मिथोऽनपेक्षाः स्व-पर-प्रणाशिनः ।
त एव तत्त्वं विमलस्य ते मुनेः
परस्परेक्षाः स्व-परोपकारिणः ॥ १

यथैकशः कारकमर्थ-सिद्धये
समीक्ष्य शेषं स्व-सहाय-कारकम् ।
तथैव सामान्य-विशेष-मातृका
नयास्तवेष्टा गुण-मुख्य-कल्पतः ॥ २

परस्परेक्षाऽन्वय-भेद-लिङ्गतः
प्रसिद्ध-सामान्य-विशेषयोस्तव ।
समग्रताऽस्ति स्व-पराऽवभासकं
यथा प्रमाणं भुवि बुद्धि-लक्षणम् ॥ ३

विशेष्य-वाच्यस्य विशेषणं वचो
यतो विशेष्यं विनियम्यते च यत् ।
तयोश्च सामान्यमतिप्रसज्यते
विवक्षितात्स्यादिति तेऽन्यवर्जनम् ॥ ४

नयास्तव स्यात्पद-सत्य-लाञ्छिता
रसोपविद्धा इव लोह-धातवः ।
भवन्त्यभिप्रेत-गुणा यतस्ततो
भवन्तमार्याः प्रणता हितैषिणः ॥ ५

## १४. श्रीअनन्त-जिन-स्तवनम्

(वंशस्थ)

अनन्त-दोषाऽऽशय-विग्रहो ग्रहो
विषङ्गवान्मोह-मयश्चिरं हृदि ।
यतो जितस्तत्त्वरुचौ प्रसीदता
त्वया ततोऽभूर्भगवाननन्तजित् ॥ १

कषाय-नाम्नां द्विषतां प्रमाथिना-
मशेषयन्नाम भवानशेषवित् ।
विशोषणं मन्मथ-दुर्मदाऽऽमयं
समाधि-भैषज्य-गुणैर्व्यलीनयत् ॥ २

परिश्रमाऽम्बुर्भय-वीचि-मालिनी
त्वया स्वतृष्णा-सरिदाऽऽर्य ! शोषिता ।
असङ्ग-घर्मार्क-गभस्ति-तेजसा
परं ततो निर्वृति-धाम तावकम् ॥ ३

सुहृत्त्वयि श्री-सुभगत्वमश्नुते
द्विषंस्त्वयि प्रत्ययवत् प्रलीयते ।
भवानुदासीनतमस्तयोरपि
प्रभो ! परं चित्रमिदं तवेहितम् ॥ ४

त्वमीदृशस्तादृश इत्ययं मम
प्रलाप-लेशोऽल्प-मतेर्महामुने ! ।
अशेष-माहात्म्यमनीरयन्नपि
शिवाय संस्पर्श इवाऽमृताम्बुधेः ॥ ५

# १५. श्रीधर्म-जिन-स्तवनम्

(रथोद्धता)

धर्म-तीर्थमनघं प्रवर्तयन्
धर्म इत्यनुमतः सतां भवान् ।
कर्म-कक्षमदहत्तपोऽग्निभिः
शर्म शाश्वतमवाप शङ्करः ॥ १

देव-मानव-निकाय-सत्तमै
रेजिषे परिवृतो वृतो बुधैः ।
तारका-परिवृतोऽतिपुष्कलो
व्योमनीव शश-लाञ्छनोऽमलः ॥ २

प्रातिहार्य-विभवैः परिष्कृतो
देहतोऽपि विरतो भवानभूत् ।
मोक्षमार्गमशिषन्नरामरान्
नाऽपि शासन-फलैषणाऽऽतुरः ॥ ३

काय-वाक्य-मनसां प्रवृत्तयो
नाऽभवंस्तव मुनेश्चिकीर्षया ।
नाऽसमीक्ष्य भवतः प्रवृत्तयो
धीर ! तावकमचिन्त्यमीहितम् ॥ ५

मानुषीं प्रकृतिमभ्यतीतवान्
देवतास्वपि च देवता यतः ।
तेन नाथ ! परमाऽसि देवता
श्रेयसे जिनवृष ! प्रसीद नः ॥ ५

## १६. श्रीशान्ति-जिन-स्तवनम्

(उपजाति)

विधाय रक्षां परतः प्रजानां
राजा चिरं योऽप्रतिम-प्रतापः ।
व्यधात्पुरस्तात्स्वत एव शान्ति-
र्मुनिर्दया-मूर्तिरिवाऽघशान्तिम् ॥ १

चक्रेण यः शत्रु-भयङ्करेण
जित्वा नृपः सर्व-नरेन्द्र-चक्रम् ।
समाधि-चक्रेण पुनर्जिगाय
महोदयो दुर्जय-मोह-चक्रम् ॥ २

राज-श्रिया राजसु राज-सिंहो
रराज यो राज-सुभोग-तन्त्रः ।
आर्हन्त्य-लक्ष्म्या पुनरात्म-तन्त्रो
देवाऽसुरोदार-सभे रराज ॥ ३

यस्मिन्नभूद् राजनि राज-चक्रं
मुनौ दया-दीधिति-धर्म-चक्रम् ।
पूज्ये मुहुः प्राञ्जलि देव-चक्रं
ध्यानोन्मुखे ध्वंसि कृतान्त-चक्रम् ॥ ४

स्वदोष-शान्त्या विहिताऽऽत्मशान्तिः
शान्तेर्विधाता शरणं गतानाम् ।
भूयाद्भव-क्लेश-भयोपशान्त्यै
शान्तिर्जिनो मे भगवान् शरण्यः ॥ ५

## १७. श्रीकुन्थु-जिन-स्तवनम्

(वसन्ततिलका)

कुन्थु-प्रभृत्यखिल-सत्त्व-दयैकतानः
कुन्थुर्जिनो ज्वर-जरा-मरणोपशान्त्यै ।
त्वं धर्म-चक्रमिह वर्तयसि स्म भूत्यै
भूत्वा पुरा क्षितिपतीश्वर-चक्रपाणिः ॥ १

तृष्णाऽर्चिषः परिदहन्ति न शान्तिरासा-
मिष्टेन्द्रियार्थ-विभवैः परिवृद्धिरेव ।
स्थित्यैव काय-परिताप-हरं निमित्त-
मित्यात्मवान् विषय-सौख्य-पराङ्मुखोऽभूत् ॥ २

बाह्यं तपः परम-दुश्चरमाऽऽचरंस्त्व-
माऽऽध्यात्मिकस्य तपसः परिबृंहणार्थम् ।
ध्यानं निरस्य कलुष-द्वयमुत्तरस्मिन्
ध्यान-द्वये ववृतिषेऽतिशयोपपन्ने ॥ ३

हुत्वा स्व-कर्म-कटुक-प्रकृतीश्चतस्रो
रत्नत्रयाऽतिशय-तेजसि जात-वीर्यः ।
बभ्राजिषे सकल-वेद-विधेर्विनेता
व्यभ्रे यथा वियति दीप्त-रुचिर्विवस्वान् ॥ ४

यस्मान्मुनीन्द्र ! तव लोक-पितामहाद्या
विद्या-विभूति-कणिकामपि नाप्नुवन्ति ।
तस्माद्भवन्तमजमप्रतिमेयमाऽऽर्याः
स्तुत्यं स्तुवन्ति सुधियः स्व-हितैकतानाः ॥ ५

## १८. श्रीअर-जिन-स्तवनम्

(अनुष्टुप्)

गुण-स्तोकं सदुल्लङ्घ्य तद्बहुत्व-कथा स्तुतिः ।
आनन्त्यात्ते गुणा वक्तुमशक्यास्त्वयि सा कथम् ॥ १

तथाऽपि ते मुनीन्द्रस्य यतो नामाऽपि कीर्तितम् ।
पुनाति पुण्य-कीर्तेर्नस्ततो ब्रूयाम किञ्चन ॥ २

लक्ष्मी-विभव-सर्वस्वं मुमुक्षोश्चक्र-लाञ्छनम् ।
साम्राज्यं सार्वभौमं ते जरत्तृणमिवाऽभवत् ॥ ३

तव रूपस्य सौन्दर्यं दृष्ट्वा तृप्तिमनापिवान् ।
द्व्यक्षः शक्रः सहस्राक्षो बभूव बहु-विस्मयः ॥ ४

मोहरूपो रिपुः पापः कषाय-भट-साधनः ।
दृष्टि-संविदुपेक्षाऽस्त्रैस्त्वया धीर ! पराजितः ॥ ५

कन्दर्पस्योद्धरो दर्पस्त्रैलोक्य-विजयार्जितः ।
ह्रेपयामास तं धीरे त्वयि प्रतिहतोदयः ॥ ६

आयत्यां च तदात्वे च दुःख-योनिर्दुरुत्तरा ।
तृष्णा-नदी त्वयोत्तीर्णा विद्या-नावा विविक्तया ॥ ७

अन्तकः क्रन्दको नृणां जन्म-ज्वर-सखः सदा ।
त्वामन्तकाऽन्तकं प्राप्य व्यावृत्तः काम-कारतः ॥ ८

भूषा-वेषाऽऽयुध-त्यागि विद्या-दम-दया-परम् ।
रूपमेव तवाऽऽचष्टे धीर ! दोष-विनिग्रहम् ॥ ९

समन्ततोऽङ्गभासां ते परिवेषेण भूयसा ।
तमो बाह्यमपाकीर्णमध्यात्मं ध्यान-तेजसा ॥ १०

सर्वज्ञ-ज्योतिषोद्भूतस्तावको महिमोदयः ।
कं न कुर्यात्प्रणम्रं ते सत्त्वं नाथ ! सचेतनम् ॥ ११

तव वागमृतं श्रीमत्सर्व-भाषा-स्वभावकम् ।
प्रीणयत्यमृतं यद्वत्प्राणिनो व्यापि संसदि ॥ १२

अनेकान्तात्मदृष्टिस्ते सती शून्यो विपर्ययः ।
ततः सर्वं मृषोक्तं स्यात्तदयुक्तं स्वघाततः ॥ १३

ये पर-स्खलितोन्निद्राः स्व-दोषेभ-निमीलनाः ।
तपस्विनस्ते किं कुर्युरपात्रं त्वन्मत-श्रियः ॥ १४

ते तं स्वघातिनं दोषं शमीकर्तुमनीश्वराः ।
त्वद्द्विषः स्वहनो बालास्तत्त्वाऽवक्तव्यतां श्रिताः ॥ १५

सदेक-नित्य-वक्तव्यास्तद्विपक्षाश्च ये नयाः ।
सर्वथेति प्रदुष्यन्ति पुष्यन्ति स्यादितीह ते ॥ १६

सर्वथा-नियम-त्यागी यथादृष्टमपेक्षकः ।
स्याच्छब्दस्तावके न्याये नान्येषामात्मविद्विषाम् ॥ १७

अनेकान्तोऽप्यनेकान्तः प्रमाण-नय-साधनः ।
अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात् ॥ १८

(सुभद्रामालती)

इति निरुपम-युक्त-शासनः
प्रिय-हित-योग-गुणाऽनुशासनः ।
अर-जिन ! दम-तीर्थ-नायक-
स्त्वमिव सतां प्रतिबोधनाय कः ? ॥ १९

मति-गुण-विभवानुरूपत-
स्त्वयि-वरदाऽऽगम-दृष्टिरूपतः ।
गुण-कृशमपि किञ्चनोदितं
मम भवताद् दुरितासनोदितम् ॥ २०

## १९. श्रीमल्लि-जिन-स्तवनम्

(मृगचपला-वनवासिका)

यस्य महर्षेः सकल-पदार्थ-
प्रत्यवबोध-समजनि साक्षात् ।
साऽमर-मर्त्यं जगदपि सर्वं
प्राञ्जलि भूत्वा प्रणिपतति स्म ॥ १

यस्य च मूर्तिः कनकमयीव
स्व-स्फुरदाभा-कृत-परिवेषा ।
वागपि तत्त्वं कथयितुकामा
स्यात्पद-पूर्वा रमयति साधून् ॥ २

यस्य पुरस्ताद्विगलित-माना
न प्रतितीर्थ्या भुवि विवदन्ते ।
भूरपि रम्या प्रतिपदमासी-
ज्जात-विकोशाम्बुज-मृदु-हासा ॥ ३

यस्य समन्ताज्जिन-शिशिरांशोः
शिष्यक-साधु-ग्रह-विभवोऽभूत् ।
तीर्थमपि स्वं जनन-समुद्र-
त्रासित-सत्वोत्तरण-पथोऽग्रम् ॥ ४

यस्य च शुक्लं परमतपोऽग्नि-
र्ध्यानमनन्तं दुरितमधाक्षीत् ।
तं जिन-सिंहं कृतकरणीयं
मल्लिमशल्यं शरणमितोऽस्मि ॥ ५

## २०. श्रीमुनिसुव्रत-जिन-स्तवनम्

(अपरवक्र-वैतालीय)

अधिगत-मुनि-सुव्रत-स्थिति-
र्मुनि-वृषभो मुनिसुव्रतोऽनघः ।
मुनि-परिषदि निर्बभौ भवा-
नुडु-परिषत्परिवीत-सोमवत् ॥ १

परिणत-शिखि-कण्ठ-रागया
कृत-मद-निग्रह-विग्रहाऽऽभया ।
तव जिन ! तपसः प्रसूतया
ग्रह-परिवेष-रुचेव शोभितम् ॥ २

शशि-रुचि-शुचि-शुक्ल-लोहितं
सुरभितरं विरजो निजं वपुः ।
तव शिवमतिविस्मयं यते !
यदपि च वाङ्मनसीयमीहितम् ॥ ३

स्थिति-जनन-निरोध-लक्षणं
चरमचरं च जगत् प्रतिक्षणम् ।
इति जिन ! सकलज्ञ-लाञ्छनं
वचनमिदं वदतांवरस्य ते ॥ ४

दुरित-मल-कलङ्कमष्टकं
निरुपम-योग-बलेन निर्दहन् ।
अभवदभव-सौख्यवान् भवान्
भवतु ममापि भवोपशान्तये ॥ ५

## २१. श्रीनमि-जिन-स्तवनम्

(शिखरिणी)

स्तुतिस्तोतुः साधोः कुशल-परिणामाय स तदा
भवेन्मा वा स्तुत्यः फलमपि ततस्तस्य च सतः ।
किमेवं स्वाधीन्याज्जगति सुलभे श्रेयस-पथे
स्तुयान्न त्वा विद्वान्सततमभिपूज्यं नमि-जिनम् ॥ १

त्वया धीमन् ! ब्रह्म-प्रणिधि-मनसा जन्म-निगलं
समूलं निर्भिन्नं त्वमसि विदुषां मोक्ष-पदवी ।
त्वयि-ज्ञान-ज्योतिर्विभव-किरणैर्भाति भगव-
न्नभूवन् खद्योता इव शुचिरवावन्यमतयः ॥ २

विधेयं वार्यं चाऽनुभयमुभयं मिश्रमपि तद्-
विशेषैः प्रत्येकं नियम-विषयैश्चापरिमितैः ।
सदाऽन्योन्यापेक्षैः सकल-भुवन-ज्येष्ठ-गुरुणा
त्वया गीतं तत्त्वं बहु-नय-विवक्षेतर-वशात् ॥ ३

अहिंसा भूतानां जगति विदितं ब्रह्म परमं
न सा तत्राऽऽरम्भोऽस्त्यणुरपि च यत्राऽऽश्रमविधौ ।
ततस्तत्सिद्ध्यर्थं परम-करुणो ग्रन्थमुभयं
भवानेवाऽत्याक्षीन्न च विकृत-वेषोपधि-रतः ॥ ४

वपुर्भूषा-वेष-व्यवधि-रहितं शान्त-करणं
यतस्ते सञ्चष्टे स्मर-शर-विषाऽऽतङ्क-विजयम् ।
विना भीमैः शस्त्रैरदय-हृदयाऽमर्ष-विलयं
ततस्त्वं निर्मोहः शरणमसि नः शान्ति-निलयः ॥ ५

## २२. श्री अरिष्टनेमि-जिन-स्तवनम्

(उद्गता)

भगवानृषिः परम-योग-दहन-हुत-कल्मषेन्धनः ।
ज्ञान-विपुल-किरणैः सकलं
प्रतिबुध्य बुद्ध-कमलायतेक्षणः ॥ १

हरिवंश-केतुरनवद्य-विनय-दम-तीर्थ-नायकः ।
शील-जलधिरभवो विभव-
स्त्वमरिष्टनेमि-जिनकुञ्जरोऽजरः ॥ २

त्रिदशेन्द्र-मौलि-मणि-रत्न-किरण-विसरोपचुम्बितम् ।
पाद-युगलममलं भवतो विकसत्कुशेशय-दलाऽरुणोदरम् ॥३

नख-चन्द्र-रश्मि-कवचाऽति-रुचिर-शिखराऽङ्गुलि-स्थलम् ।
स्वार्थ-नियत-मनसः सुधियः
प्रणमन्ति मन्त्र-मुखरा महर्षयः ॥ ४

द्युतिमद्रथाङ्ग-रवि-बिम्ब-किरण-जटिलांशुमण्डलः ।
नील-जलद-जल-राशि-वपुः सह-बन्धुभिर्गरुडकेतुरीश्वरः ॥५

हलभृच्च ते स्वजनभक्ति-मुदित-हृदयौ जनेश्वरौ ।
धर्म-विनय-रसिकौ सुतरां चरणाऽरविन्द-युगलं प्रणेमतुः ॥६

ककुदं भुवः खचरयोषि-दुषित-शिखरैरलङ्कृतः ।
मेघ-पटल-परिवीत-तट-
स्तव लक्षणानि लिखितानि वज्रिणा ॥ ७

वहतीति तीर्थमृषिभिश्च सततमभिगम्यतेऽद्य च ।
प्रीति-वितत-हृदयैः परितो
भृशमूर्जयन्त इति विश्रुतोऽचलः ॥ ८

बहिरन्तरप्युभयथा च करणमविघाति नाऽर्थकृत् ।
नाथ ! युगपदखिलं च सदा
त्वमिदं तलाऽऽमलकवद्विवेदिथ ॥ ९

अत एव ते बुध-नुतस्य चरित-गुणमद्भुतोदयम् ।
न्याय-विहितमवधार्य जिने
त्वयि सुप्रसन्न-मनसः स्थिता वयम् ॥ १०

## २३. श्रीपार्श्व-जिन-स्तवनम्

(वंशस्थ)

तमाल-नीलैः सधनुस्तडिद्गुणैः
प्रकीर्ण-भीमाऽशनि-वायु-वृष्टिभिः ।
बलाहकैर्वैरि-वशैरुपद्रुतो
महामना यो न चचाल योगतः ॥ १

बृहत्फणा मण्डल मण्डपेन यं
स्फुरत्तडित्पिङ्ग-रुचोपसर्गिणम् ।
जुगूह नागो धरणो धराधरं
विराग-सन्ध्या-तडिदम्बुदो यथा ॥ २

स्व-योग-निस्त्रिंश-निशात-धारया
निशात्य यो दुर्जय-मोह-विद्विषम् ।
अवापदाऽऽर्हन्त्यमचिन्त्यमद्भुतं
त्रि-लोक पूजाऽतिशयाऽऽस्पदं पदम् ॥ ३

यमीश्वरं वीक्ष्य विधूत-कल्मषं
तपोधनास्तेऽपि तथा बुभूषवः ।
वनौकसः स्व-श्रम-वन्ध्य-बुद्धयः
शमोपदेशं शरणं प्रपेदिरे ॥ ४

स सत्य-विद्या-तपसां प्रणायकः
समग्रधीरुग्रकुलाऽम्बरांशुमान् ।
मया सदा पार्श्वजिनः प्रणम्यते
विलीन-मिथ्यापथ-दृष्टि-विभ्रमः ॥ ५

## २४. श्रीवीर-जिन-स्तवनम्

(आर्यागीति)

कीर्त्या भुवि भासि तया वीर !
त्वं गुण-समुत्थया भासितया ।
भासोडुसभाऽसितया सोम
इव व्योम्नि कुन्द-शोभाऽऽसितया ॥ १

तव जिन ! शासन-विभवो जयति
कलावपि गुणाऽनुशासन-विभवः ।
दोष-कशाऽसनविभवः स्तुवन्ति
चैनं प्रभा-कृशाऽऽसनविभवः ॥ २

अनवद्यः स्याद्वादस्तव दृष्टेष्टाऽविरोधतः स्याद्वादः ।
इतरो न स्याद्वादो सद्वितयविरोधान्मुनीश्वराऽस्याद्वादः ॥ ३

त्वमसि सुराऽसुर-महितो ग्रन्थिक
सत्त्वाऽऽशयप्रणामाऽमहितः ।
लोक-त्रय-परमहितोऽनावरण-
ज्योतिरुज्ज्वलद्धाम-हितः ॥ ४

सभ्यानामभिरुचितं दधासि
गुण-भूषणं श्रिया चारु-चितम् ।
मग्नं स्वस्यां रुचितं
जयसि च मृग-लाञ्छनं स्व-कान्त्या रुचितम् ॥ ५

त्वं जिन ! गत-मद-माय-
स्तव भावानां मुमुक्षु-कामद ! मायः ।
श्रेयान् श्रीमदमाय-
स्त्वया समादेशि सप्रयाम-दमाऽयः ॥ ६

गिरिभित्त्यवदानवतः श्रीमत इव दन्तिनः स्रवद्दानवतः ।
तव शम-वादानवतो गतमूर्जितमपगत-प्रमादानवतः ॥ ७

बहुगुण-सम्पदसकलं
परमतमपि मधुर-वचन-विन्यास-कलम् ।
नय-भक्त्यवतंस-कलं
तव देव ! मतं समन्तभद्रं सकलम् ॥ ८

मुनिप्रवर श्री विनयहंसगणिविरचितानि

# ५. ॥ चतुर्विंशतिजिनस्तोत्राणि ॥

## १. श्रीयुगादिदेवस्तवनम्

(तोटक)

जयदोदयसंयमधूर्धरणादिव यो वृषभाह्वयमाप परम् ।
प्रथितावितथव्यवहारपथं प्रणयामि नुतिं वृषभैकविभुम् ॥ १

ऋषभ प्रभुताद्भुततेह नवा तव कापि चकास्ति यतः सततम् ।
मनसाऽपि विभावितभूतगुणः स्वपदप्रद एव भवान् भविनाम्॥२

वदनं वदनं सदनन्तपदप्रथितार्थगिरां नतदृक्पथगम् ।
भवभीतिभिदे तव भद्रभरोद्भवनाय च सम्भवति प्रसभम् ॥३

तव मूर्तिरियर्त्ति नतार्त्तिशमं चरणं करणं करणं शरणम् ।
समशिश्रियदाश्रमविश्रमणं जिनपादयुगेऽकलयत् कमला ॥४

इति हर्षविनयसूरिस्तुतिनुतपदपङ्कजः स्तुतस्त्वं मे ।
तव ऋषभदेव सेवां विरचय गुरुधर्महंसरसाम् ॥ ५

## २. श्रीअजितनाथजिनस्तोत्रम्

(दोधक)

श्रीपदशासनभासनभावोद्भासनदेशनयोदितधर्मम् ।
आश्रितकामितकल्पसधर्मं नौम्यजितं जितरागरुषं तम् ॥ १

योजनगामिगिरं तव पीत्वा कर्णपुटैरिव लोहजधातुः ।
सिद्धरसं स्वसुवर्णतया स्यादिष्टफलो भविकः सकलोऽपि ॥२

त्यक्तरसोऽपि च सत्यरसश्रीः शालिकला सकलो विकलोऽपि ।
कामितदोऽपि परिग्रहमुक्तः
श्रीअजितो विजयी जयदः स्तात् ॥ ३

श्रीजितशत्रुभवोऽपि कथं स्यास्त्वं जितशत्रुरसौ स्वयमाशु ।
श्रीविजयाङ्गभवोऽपि सुजातः सर्वसदोभयथा विजयात्मा ॥४

इति हर्षविनयगुरुहृद्भक्तिव्यक्त्या नुतोऽजितो विजयी ।
यच्छतु मे जयलक्ष्मीं सलीलगुरुधर्महंसरतिम् ॥ ५

## ३. श्रीशम्भवनाथजिनस्तोत्रम्

(प्रबोधिता)

भुवि शं भवतां दधत्स्वयं परशम्भूत्युचितं पदं हि यः ।
विजितारिजितारिवंशजो जयदः स्ताद्भविनां स शम्भवः ॥ १

सहजातिशयाश्चतुर्मिता भुवने यस्य सुखाकराः स्मृताः ।
सुपवित्रचरित्रसम्भवा भविकं नस्तनुतां स शम्भवः ॥ २

विततातिशयाः श्रिये सतां नवकैकादशकर्मघातजाः ।
भुवनोपकृतैकसत्फलाः प्रणुताश्चित्रपदानि शम्भवः ॥ ३

विशदातिशयाः सुरादिता जिनपैकोनकविंशतिस्तव ।
प्रभुतातिशयातिभाविनः प्रणुताः सौख्यविशेषपोषकाः ॥ ४

एवं शम्भवदेवः स्तुतः स्वरसतस्तनोतु जयराज्यम् ।
गुरुहर्षविनयसूरिह भविनां वरधर्महंसरसः ॥ ५

## ४. श्रीअभिनन्दनदेवस्तोत्रम्

(तोटक)

नृप संवर संवर सारकुलप्रकटीकृतमुक्तिपथप्रसरम् ।
अभिनन्दन सार्वमखर्वमुदा नुतिगोचरमाकलयामि कलौ ॥ १

सदशोकतरुस्त्वदुपर्यचकान्तशोकहृतादिव देवरतः ।
हतमारशरा इव ते त्रिदशाः कुसुमानि किरन्त्युपदेशभुवि ॥ २

जिनयोजनगामि गिरः प्रसरन्त्युचितं जनताररता इव ते ।
चमराण्युभपार्श्वगतानिव भूर्वदनाब्जरतेव मरालततिः ॥ ३

नृपलक्ष्मकलत्रिकमीशजगत्त्रयपूज्यपदं प्रवदत् किमु ते ।
मणिहेममयासन भाति भवानिव मेरुसुरद्रुरभीष्टनिधिः ॥ ४

तव दीधितिमण्डलमीश बभौ जितभानुरिवास्ति भजन् प्रसभम्।
शरणाय जनेष्विव किं हवकृद्दिवि दुन्दुभिरुच्चरवैः प्रसरेत् ॥५

श्रीहर्षविनयसूरिपूज्यः श्रीअभिनन्दनः ।
इति स्तुतस्तनोतु श्रीधर्महंसमहः श्रियम् ॥ ६

## ५. श्रीसुमतिजिननाथस्तोत्रम्

(द्रुतविलम्बित)

क्षितिपुरन्दरमेघनृपान्वयोज्ज्वलकुवेलविलासकलाधरम् ।
कमलकोमललोचनशालिनं सुमतितीर्थपतिं सुमतिं स्तुवे ॥ १

वचनमुच्चमिदं मम यत्तव स्तुतिकरं करणं करणं श्रियाम् ।
यदिह सेवि मुदा तव मानसं शुचि तदीश यदंह्रिविभावनम् ॥२

षडसुमत्तनुवेषपरापरप्रकटनैर्नटनानि भवत्पुरः ।
अतनवं यदि मामथ वारय श्रमभृतं सुमते ! श्रितवत्सलः ॥३

भवपरम्परयाऽमितपुद्गलग्रहणपूरणजैर्भ्रमणश्रमैः ।
अतिविषण्णमथावतथात्र मां जिन ! यथा शिवसम्पदमाश्रये ॥४

इह हर्षविनयसुगुरुश्रीसूरिति संस्तुतः सुमतिदेवः ।
जयलक्ष्मीसुविलासं कलयतु मे धर्महंसकलाम् ॥ ५

## ६. श्रीपद्मप्रभजिनस्तोत्रम्

(प्रहर्षिणी)

विश्वश्रीनयविधिशेवधिरश्रीभूभर्त्तुः
सुकुलकृतावतारतारम् ।
भव्योरःसरसिजचञ्चरीककम्रं
श्रीपद्मप्रभविभुमाश्रये मुदाहम् ॥ १

स्वार्थानामभिगमकं प्रमाणमात्थ-
ज्ञानं त्वं परसमया वृथाऽन्यथाऽऽहुः ।
विज्ञानं तव सकलार्थगोचरं
यद्देवान्ये कुमतधियोंऽशवादिनः स्युः ॥ २

यत्पूर्वापरनिहतार्थतावकाशं त्वद्-
वाक्यं क्वचिदपि नास्ति साम्प्रतं तत् ।
सापेक्षं सकलनयावलम्बिभावाद्-
यन्नेतःपरसमया मिथो विपक्षाः ॥ ३

स्याद्वादाधिगतमशेषवस्तुजातं
सार्व ! त्वं वदसि वरं प्रमाणवाक्यैः ।

एकांशोपगतगिरः परेऽर्थसार्थे
दुर्नीत्या तदिह बुधा भवद्वचःस्थाः ॥ ४

श्रितहर्षविनयसूरितविनुतगुणस्त्वं जयप्रदो भव मे ।
श्रीपद्मप्रभचिन्तामणिरेव च धर्महंसजयः ॥ ५

## ७. श्रीसुपार्श्वनाथजिनस्तोत्रम्

(स्त्रग्विणी)

सुप्रतिष्ठ प्रतिष्ठ क्षितीश प्रतिष्ठा-
पिताऽभीष्टसाश्चर्यजन्मोत्सवम् ।
सम्पदानन्दसम्पन्नदेहोदयं
श्रीसुपार्श्वं सुपार्श्वं जिनं संस्तुवे ॥ १

चारुसारूप्यमानोऽपि नो दुर्नयी
सौगतोऽपि स्थिरद्रव्यरूपार्थवित् ।
सत्यतासन्निकर्षप्रमाणोऽप्यहो
सन्मती श्रीसुपार्श्वेश्वरस्त्वं जय ॥ २

देहकर्मादिशून्यः शिवः सर्वदा
सोपदेशत्वमङ्गप्रयोगाद्भवेत् ।
कण्टकेष्वेवमन्योन्यविध्वंसिषु
ध्येयतेऽधृष्यमुद्दीप्यते शासनम् ॥ ३

पक्षपातं विनैवं द्वयस्य द्वयं
चित्रकारि प्रतीमः परीक्षापदे ।
सत्यतार्थप्रधानं तवानुत्तरं
विद्यते स्थाननिर्बन्धितावादिनाम् ॥ ४

एवं सुपार्श्वदेवः स्तोत्रपथं प्रापितस्तनोतु मतिम् ।
श्रीहर्षविनयसूरितरूपो मे धर्महंसरुचिम् ॥ ५

## ८. श्रीचन्द्रप्रभजिनस्तोत्रम्

(प्रबोधिता)

सततं महसे नतोल्लसन्महसे नान्वयपावनस्थितिम् ।
विशदोदितसम्पदास्पदं प्रभुचन्द्रप्रभमानमाम्यहम् ॥ १

सकलज्ञकृतेर्हितार्थनाप्रथनात् साधुपरिग्रहाग्रहात् ।
अविरोधिदयोदयात् प्रमा भवदुक्तागम एव धीमताम् ॥ २

असिमज्ञनरोपदेशतः कुपथात् घातमयाद्विरोधितः ।
कुनृशंसपरिग्रहाद् बुधा भवदन्यागममाहुरप्रमाम् ॥ ३

कुवादैरुदितं यदार्जवादमृतार्थं हि तदन्यथा परैः ।
विहितं तव गीर्षु विप्लवोऽजनि नायं तव शासनं महत् ॥ ४

ततहर्षविनयसूरिभिराश्रितसुवचाः स्तुतस्त्वमेवमिनव ।
तनु धर्महंस महसां मम विजयश्रीमहारूपम् ॥ ५

## ९. श्रीसुविधिनाथजिनस्तोत्रम्

(शालिनी)

श्रीसुग्रीवक्षोणिपस्फारवंशा
शास्याहार्यैश्वर्यद स्वावतारम् ।
धर्माधर्मारोपलोपैकवाक्यं
शान्तं दान्तं पुष्पदन्तं तमीडे ॥ १

शक्त्याऽशक्त्याऽधीश ! दोषानशेषान्
यानेव त्वं बाधसे स्म प्रपञ्चैः ।
त्वय्युद्यातासूययेवाश्रितास्ते
चित्रं सर्वे तीर्थनाथैः परैस्तैः ॥ २

वस्तुस्तोमं त्वं यथार्थं प्रमाणैः
साध्यं बाधातीतमीशादिशन् स्राक् ।
येषां द्वेष्योऽस्यश्वशृङ्गाणि तेभ्यः
शश्वज्जल्पद्भ्यः परेभ्यो नमोऽस्तु ॥ ३

नित्यानित्यं स्यात् सनानं विरूपं
वाच्यावाच्यं सत्तथाऽसत्तदेव ।
वस्तु ज्ञात्वाविष्कृतं सत्यतास्थं
देवाबाधं सत्त्वयैवापरैर्न ॥ ४

सुखहर्षविनयसूरितविज्ञानः सुविधिदेवविधिसुनिधिः ।
स्तुत इति शुचितां चिनु मे त्वं शश्वद्धर्महंस विभो ॥ ५

## १०. श्रीशीतलदेवस्तोत्रम्

(मालिनी)

दृढरथनरनाथश्रीपृथूत्तंसवंश-
प्रसृमरजनिशोभाभासुरश्लोककान्तम् ।
सकलकलकलाभिः श्लाघ्यलीलाविहारं
नमत भविकलोकाः! शीतलं मङ्गलार्थम् ॥ १

परसमयनयेभ्योऽनन्तधर्मात्मकस्य
प्रमितिविषयिणस्ते शासनस्यांशकेभ्यः ।

यदयमतिकदाशा हेलिबिम्बस्य सेहे
गणशिशुघृणिमालाऽऽडम्बरेभ्योऽवहेला ॥ २

परसमयकुनाथा दुःपथस्थाः स्वयं ये
कुपथमपरलोकान् प्रापयन्ति स्वबुद्ध्या ।
सकलनयमयं स्याद्वादमात्थ त्वमर्हं,-
स्तदपि नमति नस्ते मानिनोऽसूययाऽन्धाः ॥ ३

परमतपतयोऽमी सर्जिनो भेदिनो वा
कथमपि भुवनानां वादिनामात्मबुद्ध्या ।
तदपि भवति निष्ठे शिष्टधर्मोपदेशे
भवभयभिदि शून्यास्तेन तुभ्यं नमोऽस्तु ॥ ४

श्रीशीतलविमलफलां कलय
कलामीडितस्त्वमिति हि मुदा ।
श्रितहर्षविनयसूरितगुणस्य मे धर्महंसवसो ॥ ५

## ११. श्रीश्रेयांसदेवस्तोत्रम्

(शिखरिणी)

जगज्जिष्णूद्दामानुपमभुजधाम स्ववशिता-
खिलश्रीश्रीविष्णुक्षितिपतिकुलालङ्कृतिमणिम् ।
जगद्ध्येया देयानणुगुणमणीरोहणगिरिं,
स्तुमः श्रीश्रेयांसं भविकभविका लोककुशलम् ॥ १

शरण्येऽलं पुण्ये नयगममये सत्प्रमितिभिः,
प्रतिष्ठानिष्ठे ते पटुशिवपदे शासनपथे ।

विभो यः सन्देग्धि प्रतिहरति वा दुर्नयधिया,
सपथ्ये तथ्ये स्याद्धितकृतिकुधीः स्वादु सरसे ॥ २

कुतीर्थ्या निष्णाताः सुखशयनपञ्चाक्षविषय-
प्रभोगास्वादाद्यैः शिवपदसुखं मुग्धसुलभम् ।
सदाहुर्लीलाभिस्त्वमिति न जिनाख्यासि विबुधा,-
स्तथापि त्वन्मार्गं शिवपदधिया शिश्रियुरहो ॥ ३

परेशानां शिष्याः कुनयमतिभिर्दुस्तपतप,-
स्तुतिर्योगानन्यानपि विदधतां हायनशतम् ।
तथाऽप्येतेनाप्या वितथपथमप्राप्य न मनाक् ,
त्वदुक्तं तत्त्वार्थं शिवपथगमा मोक्तुमनसः ॥ ४

श्रीश्रेयांसजिनेशः स्तुत इति विजयप्रदोऽस्तु मे भगवान् ।
जय हर्षविनयसूरितपदकमलो धर्महंसशशिः ॥ ५

## १२. श्रीवासुपूज्यजिनस्तोत्रम्

(रथोद्धता)

श्रीनरेशवसुपूज्यपूज्यसद्वंशभूषणमणिं कलालयम् ।
सर्वदैव जयसम्पदोदितं वासुपूज्यजिनमानमाम्यहम् ॥ १

स्यादनेकमपि वाच्यमेककं वाचकद्वयमयं तथा दिशन् ।
विश्ववस्तुषु यथार्थवादितां सर्वदेश ! लभसे त्वमेव हि ॥ २

यस्य दर्शनबलाद्भवादृशां सम्प्रतीम उदिताप्तभावताम् ।
अन्यतीर्थिककुवासनाभिदे शासनाय भगवन्नमोऽस्तु ते ॥ ३

ज्ञानमुज्ज्वलमनन्तधर्मतां स्यात् पदेन सकलेषु वस्तुषु ।
नाथ ते प्रकटयन् कुवादिनामागमस्य वितथत्वमादिशेत् ॥ ४

श्रीवासुपूज्य सार्वः स्तुत इति विजयप्रदोऽस्तु मे भगवान् ।
महहर्षविनयसूरितपदपद्मो धर्महंसमहः ॥ ५

## १३. श्रीविमलनाथस्तोत्रम्

(स्वागता)

पुण्यपुण्य सगुणानणुवंशाशास्यमानकृतवर्म नृपोत्थम् ।
केवलोज्ज्वलकलाकलितार्थं वर्णयामि विमलं विमलेशम् ॥१

अन्यतीर्थिककृतागमबाधं स्वप्रमाणवचनोक्तनयोक्तिम् ।
दुर्नयोत्थकुपथस्थितिभङ्गं तीर्थनाथ ! भवदागममीडे ॥ २

ब्रह्मशून्यसकलक्षणनाशित्वादिवादिकुनयोन्नतिभङ्गैः ।
द्रव्यषट्कमवदस्त्वमधीश ! स्याद् विपत्तिभवनस्थितिरूपम् ॥३

दुर्नयस्थहयभङ्गविभङ्गैः सत्प्रमाणनयसम्भवभावैः ।
सप्तभङ्गविभवं हि तथाऽच्छाशेषवस्तु लभते स्वपदास्थाम्॥४

सुविमलकेवलकमलः श्रीविमलः स्तुत इति श्रियं जगताम् ।
मतिहर्षविनयसूरितविज्ञानो धर्महंसकलाम् ॥ ५

## १४. श्रीअनन्तजिनस्तोत्रम्

(मालिनी)

सुकृतसुकृतभोगाभोगवत् सिंहसेन,-
क्षितिपतिततवंशख्यातिवल्लीतवाब्दम् ।

सकलनयविशुद्धाचारचञ्चच्चरित्रं,
सहृदयनुतिपात्रं श्रीअनन्तं स्तुमस्तात् ॥ १

परसमयनयज्ञास्त्वय्यसूयां दधानाः,
प्रलपनपरतन्त्राः कण्ठपीठे किरन्तु ।
सितकठिनकुठारं किन्तु मेधाविनोऽमी,
त्वयि सुजिन न रक्ता रागमात्रेण किञ्चित् ॥ २

मदमदनविगीतक्रोधलोभादिदोषै,-
रपहतमनसां स्यादन्यदेवावलीनाम् ।
त्वयि सति सुपते सन्मार्गदर्शिन्यवश्यं,
वितथपथजुषां साम्राज्यरोगो वृथैव ॥ ३

वितथपथवदान्या दोषदुष्टाः सुरास्ते,
क्वचिदपि न हि मान्याः सत्परीक्षाधिकारे ।
न हि सगुणसुरत्नस्थानमानं लभन्ते,
निपुणमतिसदस्सूच्चावचाः काचखण्डाः ॥ ४

श्रीमाननन्तनाथोऽनन्तचतुष्टयरमारतः सततम् ।
व्रतहर्षविनयसूरितनुतः श्रिये धर्महंससरः ॥ ५

## १५. श्रीधर्मनाथस्तोत्रम्

(उपजाति+वंशस्थं)

भानुप्रभाभासुरभानुभूधवाऽवदातवंशप्रभुता प्रभाविनम् ।
सद्दर्शनं सर्वजनीनदर्शनं धर्मं जिनं धर्मविदं मुदा श्रये ॥ १

स्वलक्षणस्थं सकलं जगत्त्रयं वदन् प्रमाभिश्चतुरार्य सत्यवित् ।
बुधः स्वयं यो न कदापि दुर्नयी
श्रीधर्ममर्मज्ञमिनं सदा स्तुमः ॥ २

पर्यङ्ककम्रासनसङ्गि सद्वपुः श्लथं च नासा नियते स्थिरे दृशौ।
न शिक्षितेयं परतीर्थदैवतैर्मुद्रापि ते देव किमन्यदुच्यते ॥ ३

मुक्त्वात्मवैरव्यसनानुबन्धितां यां नित्यवैरा अपि संश्रयन्त्यहो ।
परैरगम्यां सुलभां सुपुण्यैभिस्त्वद्देशनाभूमिमुपास्महे हि ताम्॥ ४

धर्माधर्मपथज्ञः स्तुत इति धर्मप्रदोऽस्तु धर्मजिनः ।
महहर्षविनयसूरितरूपश्रीर्धर्महंसमहाः ॥ ५

## १६. श्रीशान्तिनाथस्तोत्रम्

(वसन्ततिलका)

विश्वातिशायिमहिमा महिमाननीया
श्रीविश्वसेननृपवंशसमृद्धिसिद्धिम् ।
सद्बुद्धिवृद्धिनिधिधर्मपथप्रकाशं
शान्तिं श्रये श्रितसुशान्तिपदं मुदेशम् ॥ १

अर्हत्पदप्रथितचक्रिविभुत्वसत्त्व,-
सङ्केतसद्मसरसागमसन्नयश्रीः ।
स्याद्वादविद्वदनपद्मभवाविरोधि-
सद्देशनागतनयः शिवदोऽस्तु सार्वः ॥ २

सद्देशनाश्रितभवद्वचसां प्रभावः
कोऽप्यद्भुतोऽस्ति युगपत्सहसा समेषाम् ।

सर्वेऽपि संशयपथाः सदसि स्थितानां
नश्यन्ति यद्भुवि भियेव सहार्त्तिपूर्त्या ॥ ३

विश्वातिशायिविभुता तव यज्जिनेश
त्वद्देशनास्थितिरियं मनसा स्मृताऽपि ।
भव्यात्मनां सुखकरी भवभीहरी तत्
किं किं करोति न मुदा नयनेक्षिताऽसौ ॥ ४

श्रितशान्तिस्तव शान्तिस्तनोतु
शान्तिं स्तुत इति जिनशान्तिः ।
जिनहर्षविनयसूरिततत्त्वार्थो धर्महंसपदम् ॥ ५

## १७. श्रीकुन्थुनाथस्तोत्रम्

(प्रमिताक्षरा)

स्वमहःप्रभावजितसूररमा-करसूरभूपकुलवृद्धिकरम् ।
सरसोदितानणुगुणप्रगुणं मुदितः स्तवीमि जिनकुन्थुमहम् ॥ १

प्रभुताद्भुतेह तव कापि तवा-त्रिपदी मिताक्षरमिताऽपि विभो ।
अमितार्थवाचकतया गणभृद्-हृदये ततान नयकोटितटा ॥ २

उचितं व्यमुञ्चदयि चक्रिरमां तृणवत् क्षणेन भुवि यः स विभुः।
सदनन्तसम्पदतिरम्यचतुष्टय-लुब्धहृत्सततमस्ति यतः ॥ ३

उचितं वसेत्यनुदिनं कमला
जिनपादपद्मनिलये विमले ।
कथमन्यथा श्रितवतां पुरतो
लुठतीह सम्पदखिलाऽप्यमला ॥ ४

श्रीकुन्थो पृथुशिवपथदर्शीति नुतः सनातनं चिनु मे ।
वरहर्षविनयसूरितमहिमं बोधिधर्महंसगुरुः ॥ ५

## १८. श्रीअरनाथस्तोत्रम्

(प्रहर्षिणी)

सम्यक्त्वोचितचितसान्वयार्थनाम-
प्रख्यातिप्रथितसुदर्शनान्वयस्थम् ।
श्रीअर्हत्प्रसृमरचक्रिरमारमण्योः
क्रीडाङ्गं तमरमरं जिनेशमीडे ॥ १

त्वत्पादाम्बुरुहि जिनाभिषेकसेकः
सद्गन्धोदकनिकरैः क्रियेत भव्यैः ।
कर्त्तॄणां मलविगमो भवेत्तु चित्रं
लोकानां तिमिरहतिर्यथोदितेऽर्के ॥ २

यैः प्राप्ताः परसमयाऽभिमाननीया-
वेवास्ते समहिमतां गुणैरगण्यैः ।
सर्वे ते तव गुणसङ्कथासु हेत्वा-
भासौघा इव हसनीयतां जिनाऽगुः ॥ ३

ध्यायन्ते गुणनिवहास्तवात्मचित्ते
सद्द्रव्यैः प्रकटयतीह दर्शनादि ।
त्रैलोक्याभ्युदयतयाऽथ दृश्यसे त्वं
ब्रह्मश्रीस्त्वरिततयैव सम्मुखा स्यात् ॥ ४

श्रीअरजिनेश कृतनतविजयः
स्तुत इति विधेहि मे जयदम् ।
मतिहर्षविनयसूरितभवभयतरोर्द्धर्महंसरसम् ॥ ५

## १९. श्रीमल्लिनाथस्तोत्रम्

(प्रबोधिता)

जगतीजनमानसेप्सितप्रदकुम्भक्षितिपान्वयोद्भवम् ।
निजमित्रनृपप्रबोधिनं प्रणुमो मल्लिजिनं प्रमोदतः ॥ १

परशासनभासनैर्नयैर्वितथार्थं कुपथं प्रसृत्वरम् ।
अपनीय सदर्थदेशिनीं जिन ! ते शासनसम्पदं श्रये ॥ २

कुसुरैः कुगुरूक्तिसेवनैः श्रितमिथ्यात्वविकारहारिणीम् ।
जगदद्भुतधर्मशेवधिं जिन ! ते शासनसम्पदं श्रये ॥ ३

भवभाविभवाङ्कुरच्छिदं विकटादृष्टनिकृष्टिपाटिनीम् ।
त्रिजगज्जनताप्रियङ्करीं जिन ! ते शासनसम्पदं श्रये ॥ ४

श्रीमल्लिदेवनुत इति भविकानां भविकसम्पदं चिनु मे ।
जयहर्षविनयसूरितभवततियोद्धर्महंसततम् ॥ ५

## २०. श्रीमुनिसुव्रतनाथस्तोत्रम्

(द्रुतविलम्बितम्)

भुवनजन्तुसुमित्र-सुमित्र-सत्क्षितिपवंशविशेषविभूषणम् ।
बहुलकान्तिकलालय संवरं नमत भो भविका मुनिसुव्रतम् ॥१

गतरुषाऽपि हि कर्मचमूस्त्वया हतवती सहसैव सुदुःसहा ।
द्रुमचयः सकलेऽपि न दह्यते सहजशीतलशीलहिमेन किम् ॥२

क्वचन तुष्यसि नैव न रुष्यसि त्वमसि सौख्यपदप्रद ईश ! यत्।
इह नुतोऽपि धृतो मनसीक्षितः सुविभुता तव कापि तदद्भुता॥३

त्वदुचितं तव पूजनतत्परस्त्वमिव भाति जगत्त्रयसेवनैः ।
त्वदुपरीश सुभक्तिसञ्जुषस्त्वमिह यत्समपूज्यपदप्रदः ॥ ४

श्रीमुनिसुव्रतनाथो योगक्षेमाकरः करोतु वरम् ।
श्रुतहर्षविनयसूरिभिराशास्यो धर्महंस वसुम् ॥ ५

## २१. श्रीनमिनाथस्तोत्रम्

(वैतालीय)

जगतीविजयार्जिताह्वयक्षितिपश्रीविजयान्वयश्रियाम् ।
करुणाकरसारशासनं नमिमेनं शरणं श्रये जिनम् ॥ १

परशासनजागमस्थितिं ह्यपशब्दा इव नार्थसङ्गतिम् ।
श्रयते यशसेऽर्थसंविदे न तथा शासनमद्भुतं तव ॥ २

त्रिजगत्युपकारसारताऽस्त्यत एवेव जिनाङ्गिसम्पदे ।
श्रुतरूपमुपेत्य निर्मलं तव कैवल्यरमा प्रवर्त्तते ॥ ३

तव केवलसंविदंशतां मतिमुख्याश्चतुरार्यसंविदः ।
दधते कथमन्यथा यथातथरूपास्त्वमिवेह ताः प्रभोः ॥ ४

श्रीनमिनेतस्त्वं तनु यथार्थवित्तामिति स्तुतो भविनाम् ।
श्रीहर्षविनयसूरितगुणोदयो धर्महंस विभो ! ॥ ५

## २२. श्रीनेमिनाथस्तोत्रम्

(स्वागता)

आसमुद्रविजयाप्तनिजाह्वश्रीसमुद्रविजयान्वयलक्ष्मीम् ।
श्रीमुकुन्दहृदयाम्बुजभृङ्गं संस्तवीमि जिननेमिमहं तम् ॥ १

त्वद्वचःसुपथसन्त्यजनस्था अध्वगा इव महाटविभूषु ।
अन्यतीर्थिकपथेषु सुसक्ताः प्राप्नुवन्ति मनुजा अतिदुःखम् ॥२

शासनं सुनयभासनसर्वैरागमोक्तविविधोक्तिगमस्थैः ।
तीर्थनाथ ! शरणं भववाद्धौ यानपात्रमिव ते भविकानाम् ॥३

नेमिदेव ! तव दर्शनसम्पत् कल्पवल्लिरिव कामितकर्त्री ।
सेवनं तव चरित्ररमेव ब्रह्मसम्भवसुखोद्भवबीजम् ॥ ४

श्रीनेमिः स्याद्वादी सकलादेशस्थगीः स्तुत इतीशः ।
ततहर्षविनयसूरितजयदः स्ताद्धर्महंसततिः ॥ ५

## २३. श्रीपार्श्वनाथस्तोत्रम्

(भुजङ्गप्रयात)

सदा विश्ववन्द्यानवद्याश्वसेना-
वनीशप्रशस्यैकवंशप्रकाशम् ।
लसत्केवलालोकलीलाविलासा-
लयं स्तौमि पार्श्वं सुपार्श्वं सपार्श्वम् ॥ १

त्वयि ध्यानलीलात्मनां पार्श्व विश्वे-
श्वरैश्वर्यवर्याः श्रियः स्युः प्रशस्याः ।
न तत्कौतुकं यत्त्वमेव प्रतिज्ञा-
परो विश्वसिद्धिप्रदातेति विश्वे ॥ २

भवन्नाम्नि माहात्म्यसीम्नि त्रिलोक्यां
समेष्टश्रियोऽमूर्वसन्तीति मुष्टिः ।
अधीशान्यथा तज्जपैकव्रतानां
पुरो नित्यमृद्धिः कथं स्यादशेषा ॥ ३

तवाह्वैव मन्त्रः पवित्रः सुसिद्धः
सुयन्त्रं सुतन्त्रं प्रभो मात्ररूपम् ।
यतस्तज्जपासक्तचित्ताः समस्तं
प्रभुत्वं लभन्तेऽत्र भव्याः सुभव्यम् ॥ ४

श्रीपार्श्व ! विश्वनाथ ! त्वमिति नुतः सन्तनु श्रियं सततम् ।
गुरुहर्षविनयसूरितरूपो मे धर्महंसरसाम् ॥ ५

## २४. श्रीवर्द्धमानस्वामिस्तोत्रम्

(स्रग्धरा)

हर्षोत्कर्षातिपोषागतिगतिनिरतानां धरायां सुराणाम्,
अङ्गज्योतिःप्रदीपैस्तिमिरभरहरैर्विश्वमानन्दपूर्णम् ।
यश्चक्रे दीप्रदीपोत्सव इव महिमा मानमान्यः स जीयात्,
श्रीमन्निर्वाणकल्याणकदिवसरसः श्रीमहावीरभर्तुः ॥ १

या ग्लान्या देशनाढ्या भविकशुभसभा भाव्यमानप्रभावा,
बाध्यावस्थास्थसभ्या परसमयमता पाति वप्रप्रकाशा ।
दृष्टाप्युद्बोधदा स्यात् शिवसुखसुकरज्ञानदृष्ट्यादिसृष्टेः,
सेवे श्रीवीरतां ते समवसृतिमहीं पुण्यसम्भारलभ्याम् ॥ २

या नासीत् कस्य शस्या श्रवणमुपगता संशयापोहवृत्त्या,
पञ्चत्रिंशद्गुणाली सुकलनविमला मङ्गलोल्लासिलीला ।

सर्वांहस्तान्तिशान्तिः सकलनयमयस्यात्पदानन्तधर्मा,-
देशाऽसौ वीरवाणी तव दिशतु वरं श्रेयसामेकबीजम् ॥ ३

येषु स्वर्गादिसौख्यं तृणमिव विरसं मन्यमानाः सुरेन्द्रा,
वैयावृत्त्यादिकृत्यान्यनुपमसुषमानन्दसन्दोहकन्दान् ।
प्रीत्याऽमन्यन्त सर्वे त्रिभुवनसुखदान् षष्ठगर्भापहारान्,
सद्भक्त्या पञ्चकल्याणकमहिममहाँस्तान् स्तुमस्तेऽत्र वीर ! ॥४

तत्त्वातत्त्वविवेकहर्षविनयश्रीसूरिताज्ञोदयः,
श्रीमद्गौतममुख्यसेवितपदः श्रीवर्द्धमानप्रभुः ।
नीतः स्तोत्रपथं मुदेति तनुतां सद्बोधिबीजं सतां,
धीशुद्ध्याश्रयधर्महंसमहिमं प्रष्ठप्रतिष्ठापदम् ॥ (शा.वि.)५

पू.मु.श्री पुण्यशीलगणिविरचिताः

# ६. ॥ श्रीमच्चतुर्विंशतिजिनस्तवाः ॥

## १. श्रीयुगादिजिनेन्द्रस्तवः

ऋषभयोगीश्वरं भजत जगदीश्वरं,
जन्तुगणशंकरं गतविकारम् ।
सकलभवभयहरं वृषभलाञ्छनधरं,
प्रथमतीर्थङ्करं विजयकारम् ॥ ऋषभ० १

विमलगिरि पूर्व-गिरिराजवासरकरं,
सुमरुदेवोदराकरजहीरम् ।
जगति गति-विततर-कुमतिमत-घनघना,
घनघटा विघटनोत्कटसमीरम् ॥ ऋषभ० २

मदन मद कन्द निःकन्दनामन्दतर,
धार तरवारि-ममरगिरिधीरम् ।
कुशलहरिचन्दनप्रकरनन्दनवनं,
कुनयघनरेणुसंहरणनीरम् ॥ ऋषभ० ३

प्रणतविबुधेन्द्रदनुजेन्द्रमनुजेन्द्रगण-,
विहितवन्दनमिनं जैनचन्द्रम् ।
त्रिजगदानन्दनं नाभिनृपनन्दनं,
पापसंतापचन्दनमनिद्रम् ॥ ऋषभ० ४

विगतसकलापदं सम्पदां कारणं,
कठिनममतामहीभेदसीरम् ।
अखिलमकराकरप्रकरवर-रुचिरतर,
गरिमधरचरमसागरगभीरम् ॥ ऋषभ० ५

भक्तगोवदनचक्रेश्वरीविहितपद-
कजयुगोपासनं शमितशान्तिम् ।
सुविमलेक्ष्वाकुवरवंशभूषणमणिं,
तप्ततपनीयकमनीयकान्तिम् ॥ ऋषभ० ६

निहतकुमतौघकाकारिमदवदनरवि-
मोदितक्रमविनतभव्यकोकम् ।
विशदभगणेन्द्रशिवचन्द्रपरचन्द्रिका-
मलयशः संधवलित त्रिलोकम् ॥ ऋषभ० ७

(शार्दूलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमौघजलदोऽयं श्रीयुगादीश्वरः ।
इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरिविभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ८

## २. श्रीअजितजिनेन्द्रस्तवः

अजितजिनेश्वर ! विजितमदोद्भटमोहकटक ! हतकुमतेय ! ।
भवभयदारुणकारणवारणदारणहरिणाधिपते ! ।
विजयाङ्गज ! महाराज ! जय जय भुवनाधिपते ! ॥ १

घनकर्माचलज्वलनज्वालामालाकुलशतकोटे ! ।
अशरणशरण ! चरणसंप्रणता-गणितसुरासुरकोटे ! ।
विजयाङ्गज महाराज जय जय भुवनाधिपते ॥ २

व्यसनतरङ्गाकुलगतिजलभवजलनिधितारण ! तरणे ! ।
विततदुरितसुदुरन्ततिमिरभर-हरणतरुणतरतरणे ! ।
विजयाङ्गज महाराज जय जय भुवनाधिपते ॥ ३

अनलधौतकलधौततनुप्रभ ! भवजलधौ विनिमग्नम् ।
करुणां कृत्वा करुणाकर ! मां, तारय पातकलग्नम् ।
विजयाङ्गज महाराज जय जय भुवनाधिपते ॥ ४

केवलकमलानिलय ! दलयताद् गुरुचिरसंचित दुरितम् ।
त्रिजगदधीश्वरतापद्माधिप ! तां मम चाशु कलयतात् ।
विजयाङ्गज महाराज जय जय भुवनाधिपते ॥ ५

विजितशत्रु जितशत्रु नृपान्वयमौलिमणे ! शिवभृत ! हे ।
यक्षदक्षमायक्षान्वितया-ऽजितबलयाऽभिष्टुत ! हे ।
विजयाङ्गज महाराज जय जय भुवनाधिपते ॥ ६

शरदुद्भवशिवचन्द्रकिरणगण, विमलसुगुणमणिजलधे ! ।
द्विरदाङ्कितपदपद्म ! निरुपमा-नन्तशक्तिसुधननिधे ! ।
विजयाङ्गज महाराज जय जय भुवनाधिपते ॥ ७

(कलशः) (हरिगीतसम)

कल-सकल-लोकालोक-लोकन-विमलकेवललोचन-,
आनन्दघन-पदकन्द-जलदोयमहितवनविरोचनः ।
श्रीअजित इत्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्तमहोयुतः ॥ ८

### ३. श्रीसंभवजिनेन्द्रस्तवः

क्रियते सुतरां मित्रता रे जीवा, मुक्तिकमलया साकं रे ।
केवलमाल्याद्वारतो रे जीवा-स्तर्हि वरं चास्माकं रे ॥ १

यदि भवतां हृदि वर्त्तते रे जीवा, अभिरामोऽयं विमर्शो रे ।
परमाध्यात्मनिबन्धनं रे जीवा, विनिहतकुगतिस्पर्शो रे ॥ २

विहितजितारिसेनामुदो रे जीवाः, कनकसमानाङ्गरुचो रे ।
तुरगाङ्कितपदजलरुहो रे जीवाः, कुशलफलदवारिमुचो रे ॥३

वशविधये तस्याः पुरा रे जीवा-स्तर्हि सदा सत्स्मरणं रे ।
अस्य संभवतीर्थेशितू रे जीवा, उररीकुरुत सुखकरणं रे ॥ ४

सुवशीकरणे त्रिजगतां रे जीवा, निरुपममन्त्र समानं रे ।
अकुशलजलरुह(म?)हिमसमं रे जीवा, अगणितमहिमनिधानं रे ॥

परमौषधसाधारणे रे जीवाः, कर्म्म रुजां संहरणे रे ।
अस्य जिनाधिपतेः सदारे जीवा, वशतु ममात्मा शरणे रे ॥६

(कलशः) (शार्दूलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमौघजलदोऽयं संभवेशो जिनः ।
इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरि विभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ७

## ४. श्रीअभिनन्दनजिनेन्द्रस्तवः

श्रीअभिनन्दन ! जगदभिनन्दन ! संवरनृपनन्दन ! वर हे ।
भव्याम्भोजविबोधनकिरण-विसरभासुरवासरकर ! हे ।
जय जय विश्वजनेश्वर हे ॥ १

विततकुमतकुयश-स्तारागण-परिभवपूर्णनिशाकर ! हे ।
सकलसुरासुरनरवरमधुकर-सेवितपदकज ! गतदर ! हे ।
जय जय विश्वजनेश्वर हे ॥ २

मधुरिमरञ्जितसकलभुवनजन !, विसरायाश्चानीश्वर हे ।
हृदयामृत जलनिधि जनिताया, मदतरुभञ्जन सिन्धुर हे ।
जय जय विश्वजनेश्वर हे ॥ ३

प्रवचनरुचिरसुधायाः पानं, श्रवणपुटाभ्यां गुणधर ! हे ।
विदधुर्विदधति सुविधास्यन्ति च, ये भव्यास्तव जिनवर ! हे ।
जय जय विश्वजनेश्वर हे ॥ ४

अखिलनिजात्माऽवयवपरिणतं, हृत्वा कर्म रसंस्वर ! हे ।
अजरामरतां ते प्रययु-र्यान्ति, च यास्यन्ति महेश्वर ! हे ।
जय जय विश्वजनेश्वर हे ॥ ५

मम निशमय विज्ञप्तिं त्वरितं, दुःखितदीनदयापर ! हे ।
भवसंभ्रमणभयातुरमनसः, कनकसमानकान्तिभर ! हे ।
जय जय विश्वजनेश्वर हे ॥ ६

वनितातनुवनपरिवृतकुचगिरि, विहित वसतिना चामर हे ।
धृततरुणी भ्रूवापोषरितन्, नयनशरेण नृशेखर ! हे ।
जय जय विश्व जनेश्वर ! हे ॥ ७

जनिता गणितातङ्क मकर-ध्वज भिल्लेन हत स्मर हे ।
जननजरामरणोद्भटहरिकरि-किरिभयदुर्गां भयहर ! हे ।
जय जय विश्वजनेश्वर ! हे ॥ ८

अनिशमटाटाश्चक्रे भव विक-टाटविकामुत्कटकर ! हे ।
विगतनयनजनवच्चा ज्ञानां-धतया प्लवग लक्ष्मधर हे ।
जय जय विश्व जनेश्वर ! हे ॥ ९

परमात्मभिरधिपतिभिरनन्तै-रानन्दितमभयदवर ! हे ।
अपुर्नभवनगरं प्रजिगमिषो-रधुना जिन ! वैद्येश्वर ! हे ।
जय जय विश्वजनेश्वर हे ! ॥ १०

सिद्धार्थाशुभकुक्षि-शुक्ति-मुक्ताफल ! मुनिजनसुन्दर हे ।
गगनप्रदेशान्तरसमयान्तर-स्वस्पर्शायनममलतर ! हे ।
जय जय विश्वजनेश्वर हे ॥ ११

मिथ्यात्वादि कुपथविधाना-दनिशमुत्तमाग्रेसर ! हे ।
वर्द्धितघनघनघातिकर्मगण-तिमिररुजावरणेतर ! हे
जय जय विश्वजनेश्वर हे ॥ १२

लोकालोकविलोकनकेवल-चिद्दर्शननयनेवर ! हे ।
मम करुणौषधिपरमरसाञ्जन, विधिनोद्घाटय काकर हे ।
जय जय विश्वजनेश्वर हे ॥ १३
सप्तभिःसम्बन्धः

विशदवदनशिवचन्द्रानन्दित-भक्तचकोर ! विमत्सर ! हे ।
प्रशमितदुरिततापविजितामृत-मधुरिमशमरससागर ! हे ।
जय जय विश्वजनेश्वर हे ॥ १४

(कलशः) (हरिगीतसम)

कल-सकल-लोकालोक-लोकन-विमल केवललोचन-,
आनन्दघनपद कन्दजलदोयमहितवनविरोचनः ।
संवरज इत्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्तमहोयुतः ॥ १५

## ५. श्रीसुमतिजिनेन्द्रस्तवः

(तर्जः सुण दयानिधि !)

मम सुमङ्गलातनयो यतिपतिरस्तु सुमङ्गलकरः सदा ।
कलकेवलकमलायाभर्त्ता, सकलामङ्गलमालाहर्त्ता ।
व्यसनोदधिपतित जनोद्धर्त्ता ॥ मम सुमङ्गला० ॥ १

अविनश्वरसत्यचिदानन्दी, पद्मानन्दनमदनिःकन्दी ।
सद्गुणगणनिखिलभुवनचन्दी ॥ मम सुमङ्गला० ॥ २

शरणागतसमजनतातायी, पुनरनुपमवाञ्छितसुखदायी ।
ह्यनिशं प्रशमामृतरसपायी ॥ मम सुमङ्गला० ॥ ३

मुनिमानसमानसवरहंसः, क्षोणीपतिमेघकुलोत्तंसः ।
कृतदर्शनरतदुरितध्वंसः ॥ मम सुमङ्गला० ॥ ४

शुभमुक्ति दरीसारङ्गारि–हितविजितविश्वसमकर्मारिः ।
अपरागमरेणुहरणवारि ॥ मम सुमङ्गला० ॥ ५

क्रौञ्चाङ्कितचरणः श्रीसुमतिः, प्रणतामरपतिततिविहितनुतिः ।
करुणाधिकृतिश्च जिनाधिपतिः ॥ मम सुमङ्गला० ॥ ६

वरचन्द्रविशदसुयशोधारी, जितकनककान्तितनुरुचिभारी ।
धृतचरणकरणजनहितकारी ॥ मम सुमङ्गला० ॥ ७

(कलशः) (शार्दूलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो ।
मन्दानन्दघन द्रुमौघ जलदोऽयं श्रीसुमत्याह्वयः
इत्थं वाचकपुण्यशीलगणिना भक्त्यामुदाभिष्टुतो,
भूयाद् भूरि विभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ८

## ६. श्रीपद्मप्रभजिनेन्द्रस्तवः

स्थाणुर्य्यस्य घनोदधि मुखवलयानि च सर्व्व–,
लोकाकारस्तदुपरि यष्टिर्यस्य विगर्व्व ।
गिर्य्याधारेषत्प्राग्भारातैलाधार–
पात्रं तदुपरि यस्य सकल जनता हितकार ॥ १

तीव्रशुभाध्यवसाययन्त्रनिपीडितदुष्ट-
घनमिथ्यात्वितिलव्रजनिःसृतविमलविशिष्ट ! ।
चिद-साधारण कारण परम क्षायिकभाव,
सतताक्षय वर तैलभृतः कृत भावा-भाव ! ॥ २

वरतरया परमात्मदशादशया-व्ययभाव-,
मनिशमुपागतया सहितो दुरितद्रुमदाव ! ।
लोकितलोकालोकसकलवसुगुणपर्य्याय !
केवलदीपककलिकाकलितो गुणपर्याय ! ॥ ३

विजितानन्तानन्ततिमिरहरकिरणाधार !,
वासरमणिगणतरुणप्रकाशो विगताकार ! ।
उद्धतचार्वाकादिकुदर्शनकुमतिपतङ्ग-,
विततिर्भस्मीभवनं प्रययौ यत्र चिदङ्ग ! ॥ ४

स्मरणासक्तसुमनसां भव्यानां तव कर्म,
निकरतिमिरभरहरणं विधाय निहित निजधर्म्म ।
प्रकटितनिजसमतेजश्चिन्मयगृहमणिचक्र !,
आत्मविमलनिलयेषु पदप्रणताखिलशक्र ! ॥ ५

परमयोगिनामपि मानसवचनाङ्गागम्य,
रूपो दीपस्त्वमसि स चैष जिनेश्वररम्य !॥
कोऽपि जगत्त्रयजनताविस्मयकर्त्ता साद्य-,
पर्य्यवसानतया समवस्थित ईडनवद्य ॥ (ष. सं.) ६

किञ्च जनश्रुतिरेषा विदिता जगति जगत्र,
शास्त्रेप्येवमियं च विलिखिता गुणतरुसत्र ! ।

सूर्या-चन्द्रमसावा-नन्दयतो ह्यरविन्द-,
विपिनचकोरगणौ नहि चित्र मुनिजनचन्द ॥ ७

एनौ तव मुखकमलं नयनचकोरौ चात्र,
पूर्वं प्रवरानन्दं गमयाञ्चक्रुरकात्र ।
प्रत्युत रुचिरसुसीमोदरमानसनृपहंस,
धरधरिणीधरसिततरबन्धुरवंशवतंस ! ॥ ८

पद्माङ्कितपदपङ्कजपरमानन्दसुसद्म !
पद्मप्रभ ! विजितोदयदरुण प्रभ ! च विपद्म ! ।
तद्युक्तं हि विनिर्जितसकलकमललावण्य-,
मभवत्तव वदनकमलजं कृतकारुण्य ! ॥ ९

चन्द्रसुधवलेक्ष्वाकुसुकुलजलनिधिसंजात-,
सुतनुलतानालोपरिघङ्कृत कुगति निपात ।
परितोलङ्कृतममल दशन दल तव्यासार,
रसनाकम्रकर्णिका कलितं विनिहत मार ॥ १०
निखिल जगत्त्रय विस्तृत विमलतर गुणापार !
गन्धान्वितमतिविशदमहनि निशि चाभयकार ! ।
कुमतकुवचनानलवनिता-विष्कृतदुर्ज्जेय-
करण विलास हि माहन्तव्य-मखिलमुनिगेय ! ॥ ११

यत्रोद्भूततिरस्कृत मधुरामृतरसधर्म-,
सदुपदेशमकरन्दं पीय दलितदुर्धर्म ! ।
समजङ्गमिषत भव्य मधुव्रत ततयो वन्द्य,
भगवद-गद्य-मचलपद परमानन्द-मनिन्द्य ! ॥ १२

(कलशः) (हरिगीतसम)

कलसकललोकालोकलोकनविमलकेवललोचन,
आनन्दघन पद कन्द जलदोयमहितवन विरोचनः ।
पद्माभ इत्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्तमहोयुतः ॥ १३

## ७. श्रीसुपार्श्वजिनेन्द्रस्तवः

निवस सदा मदुरोम्बुजे, पुरुषोत्तम ! सुपार्श्व हे ! ।
कुमतिलतोच्छेदनविधा-वतिनिशितसुपार्श्व हे ! ॥ निवस० १

सुचिदानन्दघनात्मता, कर्णय मम महाराज हे ! ।
बोभूयेत यतः स्फुटं, सुषमाकर ! जिनराज हे ! ॥ निवस० २

सुपरिवृतात्मचन्दन ! दुरन्त-दुरितभुजगविनाथ हे ! ।
निरुपम विश्वैश्वर्य कमल-योज्ज्वलया सनाथ हे ! ॥निवस०३

संकटविकटदवज्वल-ज्वलनजलधराकार हे ! ।
विगताकारतया सदा, भूषितभुवनाधार हे ! ॥ निवस० ४

पृथ्वीविशिष्टप्रतिष्ठसद्-वसुधापतितनुजात हे ! ।
स्वस्तिक लाञ्छित क्रम कनकाभज-गति तात हे ॥निवस० ५

यैर्दृष्टं तव दर्शनं, विशदसुदर्शन दाय हे ! ।
तैर्जननं सफलीकृतं, चरणकजागत पाय हे ! ॥ निवस० ६

वृष्टेद्यामृत-जलधरस्तव दर्शनत उदार हे ! ।
अद्य विबुधतरुरुद्गतो, मदजिरके सुखकार हे ! ॥निवस० ७

(कलशः) (शार्दूलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमौघजलदोऽयं श्रीसुपार्श्वेश्वरः ।

इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरि विभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ८

## ८. श्रीचन्द्रप्रभजिनेन्द्रस्तवः

सत्स्याद्वादविहित निज-विजयो,
गुणवसतिलक्ष्मणा तनयो रे । निशमयत सुभव्याः ।
चञ्चदमलनिजसिंहननाभो-,
ज्झितकुन्दधवलकमल रे । निशमयत सुभव्याः ॥ १

श्रीमहसेनकुलविलसदुदयो-
र्वीधर ! लब्धसदुदयो रे । निशमयत सुभव्याः ।
वाचंयमतारागणभर्त्ता,
जनचित्तचमत्कृतिकर्ता रे । निशमयत सुभव्याः ॥ २

केवलचन्द्रिकया प्रतिहतया,
साद्यपर्यवसानतान्वितया रे । निशमयत सुभव्याः ।
प्रकटीकृतसमलोकालोकोऽ-
विकलङ्को विनिहतशोको रे । निशमयत सुभव्याः ॥ ३

बोधितभव्यकुमुद बहु कक्षो,
विमलीकृततदुभयपक्षो रे । निशमयत सुभव्याः ।
विदलितविततकुमतिमततिमिरो,
स्खलितामलतेजोनिकरो रे । निशमयत सुभव्याः ॥ ४

निर्ज्जितसकलतरणिगणचन्द्रो,
विभुचन्द्रप्रभजिनचन्द्रो रे । निशमयत सुभव्याः ।
सांप्रतमुदितो नतविबुधेन्द्रो,
विधुक्षण एष वितन्द्रो रे । निशमयत सुभव्याः ॥ ५

चिरमनादिकालतः प्रसृतया,
मिथ्यात्वतिमिरतया मितयो रे । निशमयत सुभव्याः ।
अनुपागतशिवनगरसरणयो,
धातप तप्तगत घृणयो रे । निशमयत सुभव्याः ॥ ६

भवभयकारणकाननपतिता,
विषयकविषतरुतलशयिता रे । निशमयत सुभव्याः ।
त्यक्त्वा मोह-मयीं घननिद्रां,
प्रोत्तिष्ठध्वमशुभमुद्रां रे । निशमयत सुभव्याः ॥ ७

अविचलपदमधिगन्तुं स्वच्छा,
भवतां वरीवर्त्ति यदीच्छा रे । निशमयत सुभव्याः ।
तर्हि पुरा जिनचन्द्रं समया,
व्रजतैनं श्रितबहुविनया रे । निशमयत सुभव्याः ॥ ८

अविचलकेवलचन्द्रातपतो,
गतिसंभ्रमणं विक्षिपतो रे । निशमयत सुभव्याः ।
विमलानन्तप्रकाशसुशक्तेः,
कृतसंवरणं गुणपङ्क्ते रे । निशमयत सुभव्याः ॥ ९

गत्वा तत्र जनितभवयोगं,
संहत कर्मक्षयरोगं रे । निशमयत सुभव्याः ।
अस्य मुखद्वारा निसृतायाः,
पानाद्वचनामृततायाः रे । निशमयत सुभव्याः ॥ १०
प्रकटितकेवलचन्द्रातपतो,
द्युति तेन पथात्मसुहिततो रे । निशमयत सुभव्याः ।
ससुखं व्रजततरां शिवनगरं,
घनसुचिदानन्दं विदरं रे । निशमयत सुभव्याः ॥ ११

(कलशः) (हरिगीतसम)

कल-सकल-लोकालोक लोकन-विमल-केवल-लोचन,
आनन्दघन पद कन्दजलदोयमहितवनविरोचनः ।
चन्द्राभ इत्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्त महोयुतः ॥ १२

## ९. श्रीसुविधिजिनेन्द्रस्तवः

जिनवर ! जगदाधार ! तारय मां त्वरितं,
सकलजन्तुहितकार ! तारय मां त्वरितम् ।
तारकसुविरुदधार ! तारय मां त्वरितम् ॥ १

पतितं व्यसननिधौ भवजलधौ,
दीनतरं विजितार ! तारय मां त्वरितम् ॥ २

भ्रमिभयभीतं शरणमुपगतम् ।
शरणागतसुखकार ! तारय मां त्वरितम् ॥ ३

तारितदुरिततरङ्गाकुलभव- ।
जलधिपतितजनवार ! तारय मां त्वरितम् ॥ ४

आत्मविपिनततदुरितदवानल- ।
जलधरधारासार ! तारय मां त्वरितम् ॥ ५

अगणितजनतोद्धारणकारण- ।
करुणापारावार तारय मां त्वरितम् ॥ ६

सकल पुरन्दर गीतयशोभर- ।
मुक्तिरमोदरहार ! तारय मां त्वरितम् ॥ ७

भृतमकरध्वजरूपविनिर्ज्जित- ।
मकरध्वजभटसार ! तारय मां त्वरितम् ॥ ८

धवलकमलदलविमलकरणरुचि- ।
धरसंगतभवपार ! तारय मां त्वरितम् ॥ ९

सुविधि समाधिधनाधिपरामां-
गज कलिकुज गजसार ! तारय मां त्वरितम् । १०
श्रीसुग्रीव विशद कुलसागर-
निरुपमचन्द्राकार ! तारय मां त्वरितम् ॥ ११

(कलशः) (शार्दूलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमौघजलदोऽयं श्रीसुविध्याह्वयः ।
इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरिविभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ १२

## १०. श्री शीतलजिनेन्द्रस्तवः

तीर्थाधिपते ! शीतलजिनेन्द्र ! निशमय गुणनम्रीकृतसुरेन्द्र ! ॥१

दृढरथनरपतिकुलगगनहंस ! रुचिराखिलसुरपतिततिवतंस ! ॥२

नितरामभिनन्दितनिखिललोक ! जिन ! नन्दानन्दनविगतशोक ! ॥३

श्रीवत्साङ्कितपद ! गुणनिधान ! जिततनुरुचिगैरिकगिरिवितान ! ॥४

सदधौ जगदाकृतिरचलकन्द ऋषिरज्जुप्रमिता यस्य चन्द ॥५

उपरितनलोकाकृतिरमलनालमृषिरज्जुप्रमिता यस्य भाल ॥ ६

यस्याधिकरणमगणितधुनीन वलयानि च निखिलभुवनजनीन ॥७

अतिधवला मुक्तिशिला विकार यस्याद्भुतकुसुमं सितमुदार ॥८

पुनरतिविमलानि दलानि यत्र परितो हरितोष्ट शरणगतत्र ॥९

गन्धसुरभीकृत जगदनन्तगुणनिकरो यत्र कृत कुचिदन्त ॥१०

यत्राव्याबाधित परमसौख्यमक्षयमकरन्दः श्रवणमुख्य ॥ ११

यदनन्तैःपरिपेपीय्यमान-मुरु सिद्ध मधुकरैर्विजितमान ॥१२

अधुना दधते रणरणकभाव-,
मलिरात्मा मम कृतकुमतिलाव ! ॥ १३

तस्यामृतसितजलरुह आनन्द मकरन्दरसं रसितुं सभन्द ॥१४

तदमृत कज सुख मकरन्दसार रसमापाययमदलिङ्कार ॥१५

(कलशः) (हरिगीतसम)

कल-सकल लोकालोक लोकन-विमलकेवललोचन,
आनन्दघनपदकन्दजलदोयमहितवन विरोचनः ।
शीतलक इत्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्तमहोयुतः ॥ १६

## ११. श्रीश्रेयांसजिनेन्द्रस्तवः

त्वं जिन ! जयकर्त्ता जयकर्त्ता, अयि जिन ! पापपटलमलहर्त्ता।
विमल सुयशधर्त्ता यशधर्त्ता, अयि जिन ! पापपटलमलहर्त्ता ।

यस्तव चरणकमलबलिहारी,
स भवेत् कुगतिततेरधिकारी ॥ त्वं० १

यस्त्वकदेकवचोहुतकारी,
स पुनर्भयदापार संसारी ॥ त्वं० २

यस्ते चरणजलजबलिकर्त्ता,
स भवेत् केवलकमलाभर्त्ता ॥ त्वं० ३

यस्तव शासनरञ्जितचेताः,
सहि भुवनत्रयजनतानेता ॥ त्वं० ४

त्वं मम नाशय समङ्गलमालां,
अयि बहु कुगतियुवतिगलमालाम् ॥ त्वं० ५

अयि मयि वितनु सुमङ्गलमालां,
किल घनपरमानन्दथुशालाम् ॥ त्वं० ६

अयि त्वं शान्तसुधारसधायी,
अयि निरुपमवाञ्छितवरदायी ॥ त्वं० ७

अयि त्वं विष्णुनृपतिकुलदीपः,
अयि त्वं भवजलनिधिसद्द्वीपः ॥ त्वं० ८

अयि त्वं विष्णुमातृतनुजातः,
अयिखड्ग्यङ्कित ! कृतमदघातः ॥ त्वं० ९

अयि त्वं चन्द्रविशदगुणधारी,
अयि कल्याणकान्ततनुभारी ॥ त्वं० १०

अयि श्रेयांस ! तपोधनराजः,
अयि त्वं मोहकमलगजराजः ॥ त्वं० ११

(कलशः) (शार्दूलविक्रीडितम्)

लोकालोक-विलोकनैकसविधौ विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमौघजलदः श्रेयांसनामा जिनः ।
इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरिविभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ १२

## १२. श्रीवासुपूज्यजिनेन्द्रस्तवः

मदुपरि कुरु करुणां, अहो ! अगणितकरुणाधार ! ।
दीनदयालो ! वाञ्छितवितरण-वरनिरुपममन्दार !
हतममतोद्धततरगरलशमता-मृतरसपारावार ! ॥ मदु० १

श्रीवसुपूज्यामलकुलसुतिलक ! वासुपूज्यजिनराज ! ।
उदयदरुणकिरणारुणकरण ! सकलभुवनमहाराज ! ॥मदु० २

अखिलसुवासवपूज्य ! कृतरिपुविजयजयातनुजात ! ।
महिषोपाश्रितचरण ! दुरितफल-परसमयद्रुमवात ! ॥मदु० ३

कुगतिचतुःशालाकुले भव-सद्मनि शुभगाकार ! ।
सुविशाले व्यसनामृतचित्रे, ऽपरिमितमहिमाधार ! ॥ मदु० ४

त्वदधिप परम प्रीतये तव, पुर उत्कलिकिनानाथ ।
अतिपटुना शैलालिना शृणु, कुमतिवनितया सहाथ ॥मदु० ५

कर्मनटाधिपतेः सदारे, प्रेरणतो हतमाज ।
विरचयता विविधं किल नाट्यं, निर्ज्जितकुनयसमाज ! ॥मदु०६
विधृतानि मयानन्तशो, बहु चतुरशीतिलक्षाणि ।
वेषान्तरवृन्दानि चेतो-विस्मयकृति-दक्षाणि ॥ मदु० ७

चिरमानादि मकालतोद्या-वधिनिशय हे महेश ।
मामकनटनं लोकितं भू-योशेषं विमते श(?) ॥ मदु० ८

अधुना श्रान्तो नाटकं सं-विदधानो धृतिवाम ।
वदतो विज्ञपयामि भगवन्- नवधारय तदकाम ॥ मदु० ९

जिनपतितुल्यो जगत्त्रयेऽन्यो-दानी कोऽपि न चात्र ।
त्वां समया समुपागतोऽहं श्रुत्वेति यशोकात्र ॥ मदु० १०

तदवलोक्य यदि रञ्जितो मे, वितरतरां दीनाय ।
जिन ! भुवनत्रयवन्द्यतां स्वां, गणधरवन्द्य ! विमाय ! ॥मदु०११

काप्यनन्तगुणरत्नजलनिधे-रेक सुगुणदानेत्र ।
गुणरत ! क्षतिस्तेऽत्र भवतो, न भवेत् त्रिभुवननेत्र ! ॥मदु०१२

त्वरितं नोचेन्निगदतरामि-त्यधुना हे निरवद्य ! ।
मम चुर ईदृक् पुनरपि मानय, नट जन नट नमवद्य ॥मदु०१३

यदि जनतेतर सदभिमताला-भा हि नास्तितोच्येत ।
परमौदार्यगुणो मम विदितो, जगति तदा मुच्येत ॥ मदु० १४

इति न विचार्यमिते हि क्षतिता-मेक गुणेक विदार ।
यदनन्त सुगुणधारिणस्ते, कापि न हानि-रुदार ! ॥ मदु० १५

उचितं यद्भवतस्तदेवोरी-कुरु सुतरां विचार्य ।
मदभिलषितनिष्पत्तिरुभयतः, प्रभविष्यति वर्य्यार्य ! ॥मदु०१६

(कलशः) (हरिगीतसम)

कल-सकललोकालोकलोकन-विमल केवल-लोचन,
आनन्दघन पद कन्दजलदोऽयमहित वनविरोचनः ।
वासुपूज्य इत्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्तमहोयुतः ॥ १७

## १३. श्रीविमलजिनेन्द्रस्तवः

अरे अरे मयि रमस्वोपवनसमे परमे रे । (आं०)
सह कल केवलकमलाललनया, विमल ! विमलजिनवर ! रे ।
विमलयशोधवलीकृतजगती-पटलकनकरुचिधर ! रे ॥ १

तव दर्शनसुवसन्तागमने-नघनानन्दथुभर रे ।
प्रजनितपरमानन्दविकसिता--म्र मुखतरौ रतिकर ! रे ॥ २

चेतनहंसविराजितमानस-मानससरसीश्वर ! रे ।
पुनरगणितविकसितविमलाशय, कमले पदशूकर ! रे ॥ ३

सुमतिकोकिलारवभररुचिरे, मुक्तिवर्णिनी वर ! रे ।
अमितामलगुणगणरत्नाकर, रोहणवसुधाधर ! रे ॥ ४

विहित क्षायिक भावारगजोतम लेपन गतदर रे ! ।
कृतवर्मक्षितिपतिकुलकेतन ! श्यामाङ्गज ! शिवकर ! रे ॥ ५

विजितामृतसुविमलसमतारस-सलिलधारया कदर ! रे ।
वर दर्शन कर धृत करुणापिच-रकनिःसृतयोत्तर रे ॥ ६

विविधतरं चेतन सदनेरं, चिरमुपचितमघ शर ! रे ।
उड्डायय मम कर्मगुलालं, सकलं सदनुत्तर ! रे ॥ ७

(कलशः) (शादुलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमौघजलदोऽयं कार्त्तवर्मिः प्रभुः ।
इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरि विभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ८

## १४. श्रीअनन्तजिनेन्द्रस्तवः

वाणी तेरी दुरितविदारिणी, अहो त्रिभुवनमहाराज ! ।
भवसिन्धुनिपतिततारिणी, विनिपातितकमलाज ! ॥वाणी० १

विलसत्कुमतकमलाकरो-त्कटकरटिसमाज ! ।
यदुदारमधुरिमरञ्जित-दशनयनसमाज ॥ वाणी० २

सदनन्तगुणगणधारिणी, श्रीअनन्तजिनराज ! ।
शिवघातिकुमतिनिवारिणी, नुतनतसुरराज ! ॥ वाणी० ३

संदेहतिमिरसंहारिणी, सनुदमृत सुखाज ! ।
सिंहसेनकुलसलिलाशय-जलरुह ! सुयशाज ! ॥ वाणी० ४

भवतापितसुधासारिणी, कृतसकल शुभाय ! ।
श्येनाङ्कचरण विराजित-काञ्चनसमकाय ! ॥ वाणी० ५

(कलशः) (हरिगीतसम)

कल-सकल-लोकालोक-लोकन-विमल-केवल-लोचन,
आनन्दघनपद कन्दजलदोयमहितवन-विरोचनः ।
श्रीअनन्त इत्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्तमहोयुतः ॥ ६

## १५. श्रीधर्मजिनेन्द्रस्तवः

वन्दे धर्मजिनाधिपं, काञ्चनसमवरणम् ।
भानुनृपान्वयसुरमणिं, विबुधातिचरणम् ॥ १

व्रतिजिनचन्द्रं सुव्रता-तनयं भगवन्तम् ।
अपुनर्भवसुखसंपदा-करमतिशयवन्तम् ॥ २

रूपतिरस्कृत विष्टप-त्रयसमलावण्यम् ।
धृतवज्रध्वजमुपविद्या-यिजनाग्रेगण्यम् ॥ ३

त्रिभुवनजनमस्तकधृतो-त्तमशासनमालम् ।
कलिकालकलङ्कपङ्कनाशनं जलधरशालम् ॥ ४

अपनीयानादिममलं, द्रुतमखिलमधर्म्मम् ।
भविकमनो जलयोनिषु, विनिवेशितधर्म्मम् ॥ ५

(कलशः) (शार्दूलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमौघजलदोऽयं सौव्रतेयो जिनः ।
इत्थं वाचक पुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरि विभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ६

## १६. श्रीशान्तिजिनेन्द्रस्तवः

शान्तिजिनेश ! चरणकजशरणं, तव सुखकरणमुदारम् ।
विश्वसेनकुलकमलदिवाकर !, मृगलक्षणहितकारम् ।
करणकान्तिजितगैरिकगिरिवर !, सकलमङ्गलाधारम् ॥शान्ति० १

गतपारा सुख जलनिधि, निपतित तरणि समानाकारम् ।
अनुभवरसवरपद्माभरणं भयहरणं गुणधारम् ॥ शान्ति० २

अपुनर्भव सुरसद्मामन्दा-नन्दथुललनागारम् ।
भ्रमरीभूतसुरासुरनरपति-यतिततिगीताचारम् ॥ शान्ति० ३

धवलितजगतीमण्डलकीर्त्ति वि-तानाहरणमपारम् ।
विगलितसकलजन्तुवाञ्छितहित-समगलमालादारम् ॥शान्ति० ४

अचिराम्बात्मज ! कृतभूमण्डल-शान्तिविधेनन्तसारम् ।
अद्भुतनिरुपमशान्ति सुधारस-नदवरसुगतिद्वारम् ॥शान्ति० ५

(कलशः) (हरिगीतसम)

कलसकललोकालोकलोकनविमलकेवललोचन,
आनन्दघनपद कन्दजलदोऽयमहितवनविरोचनः ।

श्रीशान्तिरित्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्त महोयुतः ॥ ६

## १७. श्रीकुन्थुजिनेन्द्रस्तवः

कुन्थु सुरोत्तम सत्तम, श्रीसुत दित गतिजाल । जिनेश्वर ।
शूर नरेश्वर कुलकज, नन्दन चन्दन शाल । जिनेश्वर. कु. ॥१

स्वर्ण सुवर्ण तनुद्युते, छागाङ्कित विविषाद । जिनेश्वर ।
अति सुदृढी कृत निजमता-नुपमोत्सर्गापवाद । जि. कु. ॥ २

स्पर्श सुयोगमितं यथा, गिरिसारं परित्यज्य । जिनेश्वर ।
निजभावं समियादलं, चामीकरताभिज्य । जि. कु. ॥ ३

यस्तावकचरणाम्बुज-स्पर्श सुयोग मनीश । जिनेश्वर ।
भविकलोहधातुस्तथा, समुपगतो जगदीश । जि. कु. ॥ ४

प्रविहाय सबहिरात्मतां, यस्त्वं निविड मनीह । जिनेश्वर ।
सं यायात् परमात्मता, काञ्चनता जगतीह । जि. कु. ॥ ५

(कलशः) (शार्दूलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमोघजलदोऽयं कुन्थुतीर्थेश्वरः ।
इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरि विभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ६

## १८. श्रीअरजिनेन्द्रस्तवः

अल्पगत मम मनोऽरपतौ । आंकणी
रणरणकतां दधदनिशं निरौ-पम्यं धरति तथा । अल्प. ।
राजमराल मनोविधु विमले, मानससरसि यथा ॥ अल्प. ॥१

उषसि यथा सम मधुकर मानस-मतिविकसितकमले । अल्प.।
महति ययाखिल मीन मनोनिश-
मभिमततरसलिले । अल्प. ॥ २

लसति यथातिघने गजचेतो, गिरिवरविन्ध्यवने । अल्प. ।
यथा जननगतघनजनहृदयं, मानसहरण धने ॥ अल्प. ॥ ३

धृतशुभदर्शनभूपसुदर्शन-कुल जलनिधि सुमणौ । अल्प.
जातरूप तनु रूप रुचाव-पुनर्भव पुरसरणौ ॥ अल्प. ॥ ४

संशयतिमिरविदारिणीदेवी-सदुदरकल्पफले । अल्प.
नन्द्यावर्त्तलाञ्छनश्रितचरण-तिरस्कृतकर्मखले ॥ अल्प. ॥ ५

(कलशः) (हरिगीतसम)

कलसकललोकालोकलोकनविमलकेवललोचन,
आनन्दघनपदकन्दजलदोयमहितवनविरोचनः ।
अरनाथ इत्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्तमहोयुतः ॥ ६

## १९. श्रीमल्लिजिनेन्द्रस्तवः

मुक्तिनलिनीविकसनस्वरकिरणम् । आं.
मल्लिजिनेशितुरशरण शरणं, चरणकजं मे भवतु शरणम् ।
जननजरामरणासाधारण-कारणदुरितकरणहरणम् ॥ १

कुम्भनृपति तनयस्य च कलशाङ्कित चरणस्य कुशलकरणम् ।
अशुभाध्यवसायोद्भवभवभय-भीतजन्तुविहितस्मरणम् ॥ २

नीलकमलदलविमलरुचिरतर-करणरुचेः करणाधरणम् ।
प्रभावतीतनुलब्धजन्मन-श्चिरसंचितजडतावारणम् ॥ ३

स्वसमीपागतपूर्वजननसवयो-रसनृपतिकृतोद्धरणम् ।
चारुमहोदयविबुधालयस-मुख्यसौख्यकमलाभरणम् ॥ ४

प्रविगतपारावारदुराधि-व्याधिभयदजलनिधितरणम् ।
वासववृन्दावाच्यगुणगणं, सकलभक्तजनगुणभरणम् ॥ ५

(कलशः) (शार्दूलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो,
मन्दानन्दनघनद्रुमौघ जलदोऽयं मल्लिनाथो विभूः ।
इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरिविभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ६

## २०. श्रीमुनिसुव्रत-जिनेन्द्रस्तवः

सदा सविजयतां हतवैरी जय, मुनिसुव्रतजिनस्वामी ।
शम्भुर्विजयतां विभुः प्रविजयतां, प्रविजयतां हितकामी ।
विजितामित्रसुमित्रतनूजः, शरणागतविश्रामी ॥ सदा. ॥ १

त्रिभुवनजनतामौलिषु विमलं, दीनदयारसगामी ।
योऽस्थापयदतुलं निजशासन-महितविधौ चाकामी ॥ २

परमानन्दसुकन्दघनाघन-वृन्दपरमपदरामी ।
भूषितभृगुकच्छाह्व तीर्थो-नन्तवर गुणग्रामी ॥ ३

पद्माङ्गोद्भवजननः प्रियाप्रिय-गुणपरिणमनविरामी ।
कूर्मध्वजसंरजितचलनो-ऽपरिमितगुरुतायामी ॥ ४

कालतमालसुकज्जलविलसद्-भूघनकान्तिरनामी ।
पदकजलीननयनमधुकरहरि-विसरमौलिगणनामी ॥ ५

(कलशः) (हरिगीतसम)

कलसकललोकालोकलोकनविमलकेवललोचन,
आनन्दघनपदकन्द जलदोऽयमहितवनविरोचनः ।
श्रीसुव्रत इत्थं मुदा वाचकपुण्यशीलगणि स्तुतः,
संभवतु भूरि विभूतये भवतामनन्त महोयुतः ॥ ६

## २१. श्रीनमिजिनेन्द्रस्तवः

तुभ्यं नाथ ! नमो ऽमितमतये, नमो नमो भयहरनमिजिनपतये।
उपगतविजयनृपकुलमौलये, धृतमङ्गलकृत्यभिरतये ॥ १

नीलकजाञ्चितपदजलजनये, वप्रोदरकन्दरमृगपतये ।
ज्वलनज्वालोज्ज्वलितसुवर्णसुवर्णसुवर्णसुकरणद्युतये ॥ २

सत्स्याद्वादविनिहतकुमतये, प्रविजितमन्दरगिरिवरधृतये ।
अपकृतरतिजनविहितोद्धतये, भक्तिरक्तकृतदुष्टकृतहृतये ॥ ३

चरणनम्रगणधरविबुधेश्वर-रुचिरविसरविरचितसंनुतये ।
निखिलविश्वमण्डलसंस्थापित-
विमलधर्मशुभनिगमस्थितये ॥ ४

जनकजनन्योश्चरणाब्जेषु वि-नमितसुरासुरपतिसंहतये ।
कृतसुकृतार्जिततीर्थङ्करतो-पगतभुवनजनविहितोन्नतये ॥ ५

(कलशः) (शार्दूकविक्रीडितम्)

लोकालोकविलोकनैकसुविधो विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमौघजलदोऽयं श्रीनमीशो जिनः ।
इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरिविभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ६

## २२. श्रीअरिष्टनेमि-जिनेन्द्रस्तवः

नेमिजिनवर जलधर आसारी । आं. ।
समुद्रविजयघनसमयागमना-दवैरतापपरिहारि ।
रुचिरशिवाम्बोदरगगनाङ्गण-समितजनन उपकारी रे ॥ १

असितकरणरुचिसजलघनाघन-घोरघटाद्यनुकारी ।
निर्जरदुन्दुभिनिनदविनिर्ज्जित-घनघनगर्जितहारी रे ॥ २

समवसरणवप्रत्रयवासव-धनुरमलच्छविभारी ।
शिवसुखफलसंयमतरुकारण-बोधिबीजजिनकारी रे ॥ ३

निजवचनामृतबिन्दुवितरणा-मोदित लसदनगारी ।
जिनप्रवचनसलिलपिपासित-गणधरचातकपारी रे ॥ ४

मुखचन्द्रामृतरसपानाहत-क्षणभङ्गुरतया पारी ।
जितरविमण्डलवसुभामण्डल-तडिता सुषमा धारी रे ॥ ५

उपदेशामृतरसजलधारा-वर्षणसुमनोहारी ।
भव्यजनात्मधरासु च सकला-शुभदुर्भिक्षविदारी रे ॥ ६

परगुणगुरुगिरिनारसुगिरवर-शिखरोपरि संचारी रे ।
अधुनागत आनन्दितसममर-सुरनर भुजगाहारी रे ॥ ७

षड्भिः संबन्धः ।

प्रतिरस्कृत भुवनत्रयधामा, जलजबकाभावारी ।
यदुकुलजलनिधिजगदानन्दथु, सलिल वृद्धिविस्तारी रे ॥ ८

(कलशः) (हरिगीतसम)

कलसकललोकालोकलोकनविमलकेवललोचन,
आनन्दघनपद कन्दजलदोयमहितवनविरोचनः ।

श्रीनेमिरित्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरि विभूतये भवतामनन्तमहोयुतः ॥ ९

## २३. श्री पार्श्वजिनेन्द्रस्तवः

अहो रे अश्वसेननरेश्वरवरतनयो वरदायी । आं. ।
वज्रकठिनशठतामठकमठा–सुरमददलनविधायी ।
प्रज्वलिताङ्गसरीसृपभुजगा–धीश्वरपरपदरायी । अहो. ॥ १

कोमलसुसलिलजलधरमाला–विमलदीप्तिभरधायी ।
वामोदरमकराकरशशधर–उरगाञ्चितपदपायी ॥ २

प्रकटितलोकालोकसकलवसु–विशदचिदानन्दायी ।
निखिलसुरासुरनरवरविसरा–धीश्वरतापदतायी ॥ ३

त्रिभुवनभवनाव्ययविमलप्रभ–मन्दिरमणिरत्नपायी ।
भक्तिरक्तजनताहितवितरण–दनुजारिमणिरमायी ॥ ४

त्रिभुवनविस्तृतकीर्त्तिरमानन–भालतिलकतायायी ।
लोकाकारसुमन्दिरशिखरे, कनककलशसंस्थायी ॥ ५

(कलशः)(शार्दूलविक्रीडितम्)

लोकालोकविलोकनैकसुविधौ विज्ञानसल्लोचनो,
मन्दानन्दघनद्रुमौघजलदोऽयं पार्श्वनाथः प्रभुः ।
इत्थं वाचकपुण्यशीलगणिना भक्त्या मुदाभिष्टुतो,
भूयाद् भूरिविभूतये च भवतां भव्यात्मनां प्राणिनाम् ॥ ६

## २४. श्रीवर्द्धमान-जिनेन्द्र-स्तवः

अचलतानन्त्यपरिभाजं, व्यवीचलितकनकगिरिराजम् ।
अतुलितानन्तबलकलितः, प्रथमवयसापि संवलितः ॥अच०१

जननसवनोत्सवसुसमये, यः सुरानन्दपटलमये ।
सुरेश्वरसंशयच्छितये, वर्द्धितोत्साहितनिमतये ॥ अच० २

चरणमिभपथिकध्वजितं, दधतमुत्तममनुद्रुजितम् ।
नृपतिसिद्धार्थकुलशक्रं, विघ्नरिपुहननविधिचक्रम् ॥अच०३

चरमतीर्थद्युसवितारं, दुष्टदुरितोद्दलयितारम् ।
दीप्रकाञ्चनरुचकान्तं, सकलयोगीश्वरं शान्तम् ॥ अच० ४

यदि च वो वीरमैयितुमिच्छा, कर्मगणवीरवर वर्च्छा ।
तर्हि तं संभजत भव्या, वीर जिनचन्द्रमयि भव्याः ॥अच० ५

(कलशः) (हरिगीतसम)

कल-सकल-लोकालोक-लोकन-विमल केवल-लोचन,
आनन्दघनपद कन्दजलदोयमहितवनविरोचनः ।
श्रीवीर इत्थं मुदा वाचकपुण्यशीलगणिस्तुतः,
संभवतु भूरिविभूतये भवतामनन्तमहोयुतः ॥ अच० ६

## २५. श्रीसमस्तजिनेन्द्रस्तवः

ऋषभजिनेन्द्रोऽजित-जिननामा- नुपमा परिमितधामा रे ।
संभवमुनिपोऽभिनन्दनदेवो, विविधविबुधकृतसेवो रे ॥ १

सुमतिपतिः पद्मप्रभस्वामी, केवलकमलारामी रे ।
कुमतिलताछितिपार्श्वसुपाश्र्वो, विदलितदुर्गतिपाश्र्वो रे ॥ २
श्रीचन्द्रप्रभसुविधि-रगर्वो, शुभहृच्छीतल सार्वो रे ।
श्रीश्रेयांस उद्धतकुमतेशो, वासुपूज्यतीर्थेशो रे ॥ ३

विमलो भूषितभुवनोऽमानी, श्रीमदनन्तो ज्ञानी रे ।
श्रीधर्मो धर्मोदयकर्त्ता, श्रीशान्तिः शान्तिधर्त्ता रे ॥ ४

कुन्थुररो मल्लीशो विजयी, श्रीमुनिसुव्रत उदयी रे ।
एकविंशतितमः नमिनाथो, देवदेवतासनाथो रे ॥ ५

यदुकुलभर्त्तृनेमि-जिनराजोऽभयदः पार्श्वाधिराजो रे ।
त्रिशलोदरधाराधरनीरो-त्तमतरको महावीरो रे ॥ ६

सन्तु सदैते जगति जिनेन्द्रा, मङ्गलदाः प्रणतेन्द्रा रे ।
जन्मजलधितारकताप्रयुता, दत्तजगत्त्रयविभुता रे ॥ ७

पाठकरामविजयजिद्गणयो, दर्शितसुगति सरणयो रे ।
करणोन्मत्तमतङ्गजसृणयो, निखिलविबुधशिरमणयो रे ॥ ८

अभवंस्तच्चरणानुग्रहतो, गुणशुभगन्धजलरुहतो रे ।
पुण्यशीलगणिना सद्विभुता, स्तवनैरित्थं प्रणुता रे ॥ ९

(प्रशस्तिः ।)

वर्षे नन्दशरद्विपक्षितिमिते (१८५९) मेघागमर्त्तौ तथा,
मासे भाद्रपदे घनाघनपदे पक्षे वलक्षे तिथौ ।
पञ्चम्यां गुरुवासरे पुरवरे श्रीपल्लिकापत्तने,
ह्यानन्दद्रुवनैर्जिनेन्द्रभवनैर्भूर्युत्सवैर्भूषिते ॥ (शार्दुल०) १

श्रीखरतर-गण-गगनाङ्गण-तरणौ सकलसूरिमौलिमणौ ।
श्रीजिनहर्ष-मुनीन्द्रे, शासति सद्धर्मराज्यरमाम् ॥ २

गच्छे स्वच्छतरे बृहत्खरतरे क्षेमादिकीर्त्त्यन्वये,
श्रीमद्वाचक्रशान्तिहर्षगणयोऽभूवन् महीमण्डले ।
तच्छिष्या जिनहर्षनामगणयो वैरङ्गिकानुत्तराः,
प्राप्तागाधजिनागमार्णवतटाः संजज्ञिरे सत्तमाः ॥(शार्दुल०) ३

तत्पादाम्बुज-पर्युपास्ति-निपुणा विद्याचणाः सद्गुणाः,
जाताः श्रीसुखवर्द्धनाः शमधनाः श्रीवाचकाग्रेसराः ।
तत्पादाम्बुजरेणुरञ्जित वरेण्याङ्गा बभूवुः सदा,
दीनोद्धार दयापरा गणिदयासिंहाह्वया वाचकाः ॥(शा.वि.) ४

तत्पादाब्जमधुव्रता वरमहोपाध्यायतां बिभ्रतो,
लब्धोद्दामकुवादिवृन्दविजयाः संप्राप्तपुण्योदयाः ।
ज्ञाताशेषनयाश्च रामविजयाः षट्शास्त्रसारप्रदाः,
संजाग्रत्प्रतिभोद्भटाः पुनरबोभूयन्त भूविश्रुताः ॥(शा.वि.) ५

तेषामाद्यविनेयतां च दधता श्रीसद्गुरूणां यशो-
भ्राजां वाचकपुण्यशीलगणिना ज्ञानांसदानन्ददा ।
नव्यानां परमेष्ठिनां स्तुतिरियं वर्य्या चतुर्विंशते-
र्नानारागरसान्विता विरचिता सास्तात्सतां श्रेयसे ॥(शा.वि.)६

भगवानदासकस्या-ग्रहेण सच्छ्रेष्ठिनो विनीतस्य ।
जिनभक्तिरक्तमनसः, सदुद्यमोऽयं सफल आसीत् ॥(आर्या)७

पू.आ.श्री विजयदेवसूरिप्रशिष्यविरचितः

# ७. ॥ श्रीचतुर्विंशतिजिनस्तोत्रकोशः ॥

## १. श्रीसाधारणजिनस्तोत्रम्

सर्वाणि अनुष्टुब्मयानि

अहो प्रभो ! प्रभावस्ते, दृष्टे यत्त्वयि सम्प्रति ।
परमानन्दनिःस्यन्दी, भवोऽप्येष ममाभवत् ॥ १

यासौ चिन्तापि सन्तापहेतुत्वेनैव निर्मिता ।
त्वदालम्बनतः सापि प्राप सन्तापहारिताम् ॥ २

श्रद्धाविहङ्गिकाशिक्यतुल्ययोश्चित्तनेत्रयोः ।
एकैकस्मिन् धृतोऽसि त्वं पूर्वमद्यैव तु द्वयोः ॥ ३

सेयं जीयाज्जिनाधीश ! त्वद्भक्तेः शक्तिरद्भुता ।
यया लोकाग्रसंस्थोऽपि हृदि त्वं मे निवेशितः ॥ ४

भक्तितस्तव नामापि येनेदं जगदे जिन ! ।
तेनान्तःशत्रवः सत्यं जिग्यिरे जगदेजिनः ॥ ५

यद्वैश्वानरचन्द्रार्कज्योतिषामपि जीवितम् ।
तदुदेतु स्तवादस्मान्महानन्दमयं महः ॥ ६

## २. श्रीऋषभदेवस्तोत्रम्

जय प्रथमतीर्थेश ! जय प्रथमनिर्मम ! ।
जय प्रथमनीतिज्ञ ! जय प्रथमपार्थिव ! ॥ १

त्वन्मुखेन्दुमयूखेषु प्रेषितेषु पुरः प्रभो ! ।
सद्यो नाभिकुलक्षीरनीरधिर्ववृधेतराम् ॥ २

मरुदेवीं जगतोऽपि मन्ये महिमहीयसीम् ।
यत्कुक्षिकुहरक्रोडात्प्रसूतस्त्वं जगद्गुरुः ॥ ३

क्षिप्रमप्रहतः पन्था मुक्तेर्दुःसञ्चरश्चिरात् ।
नाथ ! प्रथमपान्थेन त्वया घण्टापथः कृतः ॥ ४

यदि जानासि चेतांसि गतामय ! कृपामय ! ।
विश्वनाथकृते नाथ ! प्रार्थनेन कृतं मम ॥ ५

## ३. श्रीअजितनाथस्तोत्रम्

जयत्यजितनाथस्य नाममन्त्राक्षरावलिः ।
भूर्भुवःस्वस्त्रयश्रीणां वशीकरणकारणम् ॥ १

जितशत्रुसमुद्भूत ! विजयाङ्गभव ! प्रभो ! ।
त्वमन्तर्वैरिणो जिष्णुरजितः सत्यमुच्यसे ॥ २

त्वं देव ! कर्ममर्माणि निर्मूलयसि मूलतः ।
सत्कर्मवल्लयः किन्तु भवन्ति भवतः प्रभोः ॥ ३

जैत्रे धरित्र्यामेतस्मिन् त्वद्यशोजयडिण्डिमे ।
मग्नो मोहमहीभर्तुर्विक्रमोपक्रमध्वनिः ॥ ४

यं वीक्ष्य मन्मथेनापि कोदण्डमपरोचितम् ।
शक्रोऽतिविक्रमं कर्तुं त्वत्तः किमपरोचितम् ॥ ५

## ४. श्रीसंभवनाथस्तोत्रम्

श्रीशं(सं)भवजिनाधीशमुखं पूर्णेन्दुसुन्दरम् ।
वाणी निर्गच्छदत्यच्छज्योत्स्नासब्रह्मचारिणी ॥ १

नयने नूतनोन्मीलन्नीलनीलोत्पलश्रिणी ।
ललद्व्यालोलसेलम्बडम्बराचिहुरावलिम् ॥ २

उद्गच्छद् ग्रहनक्षत्र-श्रेणिलक्ष्मीसखानखाः ।
वपुर्लवणिमाक्षुब्ध-दुग्धाम्बुनिधिबन्धुरः ॥ ३

इति स्वामिन् ! भवन्मूर्त्तिः सदा शारदकौमुदी ।
समस्तजनताचक्षुश्चकोरीपारणोत्सवः ॥ ४

जितारिहृदयानन्दसेनाशं(सं)भव शं भव ।
प्रणतानां मनः स्वामिन्नसमोदय ! मोदय ॥ ५

## ५. श्रीअभिनन्दनजिनस्तोत्रम्

तवाभिनन्दन ! स्वामिन् ! संवरक्षितिपात्मजः ।
भूयात्क्रमनखज्योत्स्ना सन्तापप्रशमाय मे ॥ १

शश्वद्दीपोत्सवं चक्रे देव ! त्वत्पूतभूतले ।
क्रमाम्बुजनखाप्रेङ्खन्मयूखमुकुलावलिः ॥ २

ध्रुवं जाज्वल्यते ज्योतिस्त्वदन्तर्देव ! केवलम् ।
यदङ्गनखलक्षेण स्फुलिङ्गैः स्फुरितं बहिः ॥ ३

दुरितं दूरतो याति जनात्त्वत्पादसेविनः ।
नीराजना विधिर्यस्य प्रांशुभिस्ख(स?)न्नखांशुभिः ॥ ४

जगदानन्दनं पापतापप्रशमनन्दनम् ।
सिद्धार्थानन्दनं वन्दे त्रिसन्ध्यमभिनन्दनम् ॥ ५

## ६. श्रीसुमतिनाथस्तोत्रम्

त्वया श्रीसुमते ! प्राज्यं शमसाम्राज्यमर्जितम् ।
मूलादुन्मूलिताः स्वामिन्कुटिलाः कुन्तलाः पुरः ॥ १

दुष्टोऽयमिन्द्रियग्रामो निगृहीतस्ततः परम् ।
निषिद्धा स्वयमुन्मार्गप्रवृत्तिर्विषयेष्वपि ॥ २

अत्यासन्नमपि स्वैरि गुप्तौ विनिहितं मनः ।
भयभङ्गुरितं क्वापि जीवनाशं च नाशितम् ॥ ३

लोकोत्तरं ततः किञ्चित्तत्तावन्मीलितं महः ।
यस्मिन् मग्नः समग्रोऽपि सहसा महसां च यः ॥ ४

मेघजन्म तु सन्तापे प्रभवन्ति तवारयः ।
तन्ममाप्यान्तरानेतान् मङ्गलासुत ! वारय ॥ ॥ ५

## ७. श्रीपद्मप्रभजिनस्तोत्रम्

पद्मप्रभ ! प्रभो ! दृश्यस्त्वं च बन्धूकबन्धुरः ।
वीतरागेषु रेखा च प्रथमा प्रथते तव ॥ १

देव ! त्वच्चरणाम्भोजपरागैः पिङ्गतां गताः ।
भवन्ति भविनः काममपरागास्तदद्भुतम् ॥ २

वाणी नवसुधासारसारणिर्भुवनप्रभो ! ।
महामोहप्ररोहस्य परं दाहाय जायते ॥ ३

सुसीमासम्भवस्यापि लुप्तसीमा गुणास्तव ।
स्वामिन् ! धरप्रसूतस्य धरोल्लङ्घि यशः पुनः ॥ ४

सान्निध्यं दधते तेषां पीयूषरसभोजिनः ।
येषां हृदि वसत्येव नम्रामरसभो जिनः ॥ ५

## ८. श्रीसुपार्श्वनाथस्तोत्रम्

श्रीसुपार्श्वजिनाधीश विश्वत्रितयवारिदः ।
तवापि वदने कोऽयं लोकः सद्देशनामृतम् ॥ १

पृथ्वीप्रतिष्ट(ष्ठ)सम्भूत ! सन्तु दूरे गुणास्तव ।
स्वामिन् ! किं नाम नामापि स्तोतुमस्तोकपाप्मभिः ॥ २

नवक्षो लक्षतां नेतुं नेतस्तव मनो भवः ।
प्रेङ्खदिज्यासदत्तस्य नातः सयशसः पदम् ॥ ३

निस्तीर्य दुस्तरं देव ! कमलारागसागरम् ।
अहो महोदयं सर्वाशूनां सर्वज्ञ ! सर्वथा ॥ ४

प्राभवं भवतो जातं मदीयं मानसं प्रति ।
जिनेश ! ते महामोहक्रोधकामानसम्प्रति ॥ ५

## ९. श्री चन्द्रप्रभस्वामिस्तोत्रम्

चन्द्रप्रभो(भ) प्रभोर्मूर्त्यां येषामध्यासितं मनः ।
तेषां मतिः सितध्यानमकृताभ्यासमासदत् ॥ १

चेतश्चेत्तन्मयीभूतं भविनां भवता सह ।
ध्यानोपनिषदभ्यासक्रमः श्रमफलस्ततः ॥ २

षट्चक्रावर्त्तगर्तेभ्यो निर्गत्य सहजोदयात् ।
भवन्तमुपतिष्ठन्ते सन्तः पारे भवार्ण्णवम् ॥ ३

तदेकन्यस्तरङ्गेण निस्तरङ्गेण चेतसा ।
त्वां महान्तो महीयन्ते महासेननृपात्मजम् ॥ ४

विश्वे नान्यस्य नैर्मल्यं लक्ष्मणासुतराजिते ।
इति प्रतिज्ञा शीतांशो लक्ष्मणासुतराजिते ॥ ५

## १०. श्रीसुविधिनाथस्तोत्रम्

विधेहि सुविधे शुद्धं तत्त्वं तत्त्वं ममान्तरम् ।
येन प्रत्यक्षमीक्षेऽहं निस्सन्देहं महस्तव ॥ १

सूक्ष्मादप्यतिसूक्ष्मत्वं शुद्धसिद्धान्तवेदिनाम् ।
तथापि भुवनव्यापिवैभवं भवतः प्रभो ! ॥ २

त्वामद्वैतं कलातीतमामनन्ति मनीषिणः ।
तव स्मरणतः किन्तु सकलः सकलो जिनः ॥ ३

त्वां मेनिरे निरालम्बमम्बरान्तरगोचरम् ।
निमज्जतां भवाम्भोधौ किन्तु त्वमवलम्बनम् ॥ ४

सुग्रीवहृदयानन्दे रामाकुक्षिसमुद्भवे ।
त्वयि स्मृतिपथं नीते नेतश्चेतः समुद्भवेत् ॥ ५

## ११. श्रीशीतलनाथस्तोत्रम्

श्रितं शीतलतीर्थेशः क्लेशत्रितयतापितैः ।
वचस्तव भवारण्यपथिकैर्विश्रमद्रुमः ॥ १

अक्षरैरमृतैः पूर्णाः स्फुरत्प्रवरसञ्चराः ।
हरन्ति त्वद्गिरस्तृष्णा पुष्णन्त्यः सरसां श्रियम् ॥ २

पुरस्फुरति चेद्देव ! भवद्वचनवीचयः ।
तत्किं मुधा सुधास्यन्दचन्दनेन्दुमुखी मुखैः ॥ ३

सति त्वद्वचसि स्वामिन् ! निर्मलीकारकारिणे ।
किमङ्गमङ्गलं लोकैर्गङ्गासङ्गाय गीयते ॥ ४

नन्दादृढरथक्ष्माभृत् तनयं यः समानतः ।
सन्तापैः पात्यते जन्तुः कदापि न समानतः ॥ ५

## १२. श्रीश्रेयांसनाथस्तोत्रम्

श्रेयः श्रेयांसनाथस्य स्मरणेनापि देहिनाम् ।
पर्जन्यगर्जितेनापि कथं न शिखिनां सुखम् ॥ १

अतिव्यवहितोऽपि त्वं मत्यासन्ने न संहतिः ? ।
(त्वमत्यासन्नो न संशयः)
प्रमाणमीदृशे ह्यर्थे मिथुनानि वियोगिनाम् ॥ २

नास्त्येवान्यो रसः कश्चित्त्वय्येकरसचेतसाम् ।
यदि न प्रत्ययस्तस्मिन्नाक्षिकास्तर्हि साक्षिकाः ॥ ३

विष्णुरित्याख्यया साम्ये पित्रोस्त्वं समतामयः ।
मुक्ताघनरसस्वात्यो नैर्मल्ये निर्मला न किम् ॥ ४

जगदानन्दनिन्दायै ते निरेते निरेतसः ।
कृपाणे चरणन्यासं निशिते निशिते व्यधुः ॥ ५

## १३. श्रीवासुपूज्यस्वामिस्तोत्रम्

वासुपूज्य ! जगत्पूज्य ! लोकोत्तरपदास्पदः ।
किं तेन युक्तं भक्तेषु संविभक्तं निजश्रियः ॥ १

भवानभ्युदयं बिभ्रदात्मन्येवोदयाचले ।
प्रीतिरालोक्यते लोकैः कोकैरिव दिवाकरः ॥ २

भक्ताभक्तेषु दृष्टेस्ते निर्विशेषमुपेयुषी ।
तथापि प्राथ्र्यसे विश्वनाथ ! स्वार्थपरैः नरैः ॥ ३

वसुपूज्यात्मज ! स्वामिन् ! जडाङ्गज ! जगत्पते ! ।
श्रितोऽस्मि सर्वथैव त्वां कल्पनाकल्पपादप ! ॥ ४

तनुतेऽतनुते किञ्चित्पुरः पितुरिव प्रभोः ।
मन्मनो मन्मनोल्लापचापलं क्षम्यतामतः ॥ ५

## १४. श्रीविमलनाथस्तोत्रम्

समलं विमलं स्वामिन् ! निजं वाक्ब्रह्मवैभवम् ।
पुनीमः किञ्चिदप्येतत्तव स्तवनकर्मणा ॥ १

कुस्वामिदोषप्लोषेण ग्लपिताकचिता लता ।
भवद्गुणसुधासारात्पल्लवैरुल्लसत्यसौ ॥ २

विश्वालङ्कार ! हित्वा त्वां कल्याणैकमयं मया ।
काव्यरत्नं हहान्येषु कुरीतिषु नियोजितम् ॥ ३

कृतवर्म्मनृपश्यामानन्दन ! स्तवनात्तव ।
आजन्मकविताभ्यासकष्टं नष्टं ममाधुना ॥ ४

यदन्यवदनौपम्यान्मालिन्यमिदमार्जयत् ।
त्वन्मुखौपम्यमागम्य सुधांशुस्तदमार्जयत् ॥ ५

## १५. श्री अनन्तनाथस्तोत्रम्

अनन्तनाथ ! ज्ञानस्य तवानन्तस्य मङ्गलम् ।
स्थितं जगत्त्रयं यस्मिन्नरविन्दे मरन्दवत् ॥ १

सुयशासिंहसेनस्य नन्ददर्शनलालसौ ।
अनन्तदर्शनेनोच्चैर्भवता मुखिभीकृतौ ॥ २

सत्यं वीर्यन्तवानेतं यदन्तर्वैरिणां गणः ।
त्रिजगज्जिष्णुरप्येष न प्रभूष्णुः स्मृते त्वयि ॥ ३

सदानन्दमयोऽसि त्वमित्येवं को न मन्यते ।
त्वत्सन्निधानतो जातं यदानन्दमयं मनः ॥ ४

वैभवाद्भुतमित्येतत्तवानन्तचतुष्टये ।
विश्वप्रभो ! न लोभाय बभूव न च तुष्टये ॥ ५

## १६. श्रीधर्मनाथस्तोत्रम्

धर्म ! त्वदाज्ञया भालस्थलं तिलकयन्ति ये ।
सुभगंभावुकीभूय भजन्ते ते शिवश्रियः ॥ १

प्रभविष्णुः प्रभो ! तेषां नापत्तापत्रयोद्भवा ।
यैः स्वकीयै(ये)हृदि न्यस्तस्त्वदाज्ञाचन्दनद्रवः ॥ २

जिनेश ! क्लेशमेवैकं वितनोति जपस्तपः ।
तरी तरितुमाज्ञैव भवतो भवतोयधिम् ॥ ३

सुव्रताभानुसम्भूत ! भवदाज्ञा रसायते ।
सत्येव किं वृथोपायै जरामरणजिष्णुभिः ॥ ४

मूर्ध्नि मेऽस्तु त्वदाज्ञैव कुसुमस्तव कोमलः ।
तं नाथ ! प्रार्थ्यतां कोऽन्यः प्रसादस्तव को मलः ॥ ५

## १७. श्रीशान्तिनाथस्तोत्रम्

श्रीशान्तिनाथ ! नामापि स्मृतं तव जनैर्यदि ।
सद्यः सम्पन्न एवायं तदुपद्रवचिद्रवम् ॥ १

महिम्न[स्ता?]वकीनस्य स्फूर्त्तिमज्ञातपूर्विणः ।
मणिमन्त्रौषधादीनामुपयान्ति महार्घ(र्थ)ताम् ॥ २

महिमानममानं ते कथं जानन्तु जन्तवः ।
स्वल्पैः कल्पद्रुमप्रायैर्यन्मतेऽस्खलिता गतिः ॥ ३

पूज्यता त्वयि पुत्रेऽभूदचिराविश्वसेनयोः ।
दत्ते त्वन्महिमा स्वामिन् ! गुरूणामपि गौरवम् ॥ ४

स्तुतस्ते स्तोकतां नौति महिमानी च बुद्धिभिः ।
स्वामिन् ! हारः कथङ्कार महिमानाबिलेऽपि सन् ॥ ५

## १८. श्रीकुन्थुनाथस्तोत्रम्

कुन्थुनाथ ! कथायां ते सत्यामपि सुधानिधौ ।
विकथाविषकण्डूषैः प्लोषयन्ति कथं मुखम् ॥ १

विहाय त्वं जगन्नेत्र ! कैरवैकनिशाकरम् ।
सेव्यन्ते किममी लक्ष्मीललितैरुष्मलाः खलाः ॥ २

अयमात्मा तवालोकाल्लोकाग्रमपि गच्छति ।
पात्यते तत्किमन्यान्यचिन्तागम्भीरवारिधौ ॥ ३

श्रीसूरिजनितानन्दमुखपद्मे सति त्वयि ।
अन्यत्रापि मनोभृङ्गः सम्भ्रमी बम्भ्रमीति किम् ॥ ४

यस्त्वां ध्यायत्यनिर्धौतनिर्मलीमसमानसः ।
त्वदेकमयतामेति कल्पद्रुमसमानसः ॥ ५

## १९. श्रीअरनाथस्तोत्रम्

श्रीमन्नरजिनाधीश ! श्रीसुदर्शननन्दन ! ।
तत्तवानन्यसामान्यमौदासीन्यमुपास्महे ॥ १

एकतस्तीर्थकृल्लक्ष्मीरन्यतश्चक्रवर्तिता ।
जीयाद् द्वयेऽपि ते धन्यमौदासीन्यमयं मनः ॥ २

आक्रोशेषु च रूक्षेषु स्निग्धेषु स्तवनेषु च ।
तव श्रवणयोर्भूयाद्भद्रं ताटस्थ्यसुस्थयोः ॥ ३

देवीकुक्षिसरोहंसस्वरूपं तत्तवेदृशम् ।
यत्ततोऽयमिति ज्ञानेऽप्यौदासीन्येन वर्त्तसे ॥ ४

न चामरौ न वा मेरौ पुरतः प्रगुणीकृते ।
न वाभोगे न वा भोगे भवतोऽभिदुरं मनः ॥ ५

## २०. श्रीमल्लिनाथस्तोत्रम्

श्रीमन्मल्लिजिन ! स्वामिन् ! रूपं लोकोत्तरं परम् ।
मनसापि कथं नाथ ! मादृशैर्दृश्यतां तव ॥ १

स्त्रीपुन्नपुंसकातीतमपनीतगुणत्रयम् ।
रूप्यन्ते व्यक्तिबन्ध्यन्त त्रिसन्ध्यं ध्यायतां कथम् ॥ २

गन्धरूपरसस्पर्शशब्दादिभिरपाकृतम् ।
स्वामिन् ! केन स्वरूपेण भवन्तं मनुजां मनः ॥ ३

प्रभो ! प्रभावतीकुम्भसम्भवस्त्वं निगद्यसे ।
तथापि त्वामजन्मानं मन्यन्ते तत्त्ववेदिनः ॥ ४

स्वरूपं वास्तवं तत्ते पश्यन्तु किमतादृशम् ।
बाह्य एवं परं दृश्येज्झे(त्ते?)षामनुमता दृशः ॥ ५

## २१. श्रीमुनिसुव्रतस्वामिस्तोत्रम्

तव श्रीसुव्रतस्वामिन् ! द्वयमप्येतदद्भुतम् ।
निर्मलं निर्ममत्वञ्च मैत्री च निखिले जने ॥ १

चित्रमिच्छा समुच्छेद्यच्छेकता च विजित्वरी ।
व्यसनार्त्तेषु सत्त्वेषु तरुण्या करुणा च ते ॥ २

सर्वथा सर्वभावेषु सम्मता समता च सा ।
लोकंपृणगुणामोदैर्मोदते च मन(मनः) स्तवः ॥ ३

परोपकारिकारित्वव्रतमव्याहतं च तत् ।
इतश्चेतस्तवोपेक्षा निषन्नं चाद्भुतं प्रभो ! ॥ ४

पद्मासुमित्रयोः पुत्र ! मैत्र्यादिरुचिराजितम् ।
भेजे भवन्तं मुक्तिश्रीस्त्वे(स्ते)नैव रुचिराजितम् ॥ ५

## २२. श्रीनमिनाथस्तोत्रम्

श्रीमन्नमे ! न मे चेतश्चञ्चलत्वं विमुञ्चति ।
करोमि संयतं तात ! तदिदं तावकैर्गुणैः ॥ १

मनो मनोभववृष्टैः सौष्ट(ष्ठ)वादपहस्तितम् ।
त्वत्प्रसादादवष्टम्भसंरम्भं ल[भ]ते यदि ॥ २

यद्यसौ त्वद्गुणैः स्वामिन् ! सिद्धः सिद्धौषधेरिव ।
तज्जरामृत्युदौर्गत्यं जित्वरः स्यान्मनोरसः (मः) ॥ ३

निश्शेषविषयभ्रान्ते श्रान्तस्य मनसो यदि ।
विश्रामस्त्वद्गुणारामे वप्राविजयनन्दनः ॥ ४

त्वद्गुणाश्च दमैर्दान्तं स्वान्तं नवतुरङ्गवत् ।
मोक्षाध्वगामिनः काममस्मान्नवतु रंहसा ॥ ५

## २३. श्रीनेमिनाथस्तोत्रम्

श्रीनेमिनाथ ! भगवन् ! भवता च कृतं पदम् ।
समुद्रविजयावासे तया च शिवसम्पदा ॥ १

स्थानान्न चलितुं नाथ ! तदा त्वयि धनुर्धरे ।
विपक्षक्षोणिपालैश्च राजलक्ष्म्या च चक्रिणः ॥ २

त्वया च चालितः पाणिग्रहणप्रवणो रथः ।
उग्रसेननरेन्द्रस्य सुतया च मनोरथः ॥ ३

भवांश्च भेजे निर्व्याजमुज्जयन्तगिरेः शिरः ।
कीर्त्तिश्च तव लोकाग्रं निर्ममस्येन्दुनिर्मला ॥ ४

शिवानन्दन ! लोकस्त्वामसमाश्रयमाश्रयत् ।
एनं स्मरर्ष्टिव्रातपातै रक्षत रक्ष तत् (रत त्वम्) ॥ ५

## २४. श्रीपार्श्वनाथस्तोत्रम्

पार्श्वनाथ ! जगन्नाथ ! त्वयि सम्प्रति संस्मृते ।
मामकीनं मनो मेने स्वात्मनः कृतकृत्यताम् ॥ १

नमो मूर्च्छालतात्पामाज्जगन्मित्र ! तवोदये ।
इदानीं नेत्रराजीवमुज्जीवितमिदं मम ॥ २

आसंसारं ममात्मायं तप्तः पातकपातकैः ।
अद्य त्वद्दर्शनानन्दसुधासारैरसिच्यत ॥ ३

अश्वसेनात्मज ! स्वामिन् ! गतस्तन्मयतां त्वया ।
अद्य स्वहस्तविन्यस्तमहं मन्ये महोदयम् ॥ ४

वामेय ! त्वयि दृष्टेऽद्य क्षीणः (णोऽ)पी(पि) वामनो भवः ।
जातः श्वा(स्वा)नन्त्यदीर्घोऽपि ममायं वा मनो भवः ॥ ५

## २५. श्रीमहावीरस्वामिस्तोत्रम्

श्रीसिद्धार्थकुलोत्तंस ! श्रीवीर ! त्रिशलाङ्गज ! ।
मनसाप्यतिदुर्ल्लम्भ सम्भावय दृशापि माम् ॥ १

तथैकः कथमप्यस्तु प्रसादः सादरं मयि ।
यथेयं त्वत्प्रसादेन वाञ्छा विच्छिद्यते मम ॥ २

तथैकमपि निष्कम्पदर्शनं देव ! देहि मे ।
यथा त्वद्दर्शनायापि न पुनः स्पृहयाम्यहम् ॥ ३

नान्यदभ्यर्थये किञ्चित् किन्तु नाथ ! तथा कुरु ।
न च त्वयि न चान्यस्मिन् प्रार्थनं प्रार्थये यथा ॥ ४

विहाय भुवनाभोग-रविकल्पविकल्पनाम् ।
भास्वरं कुरु मे चेतः स्फीतमोहतमोहरम् ॥ ५

पू. मु. श्री हेमविजयविरचितानि

षोडशदलकमलबन्धबन्धुराणि

# ८. ॥ चतुर्विंशतिजिनस्तोत्राणि ॥

(उपेन्द्रवज्रा)

## १. श्रीयुगादिजिनस्तवनम्

पयोजपाणिं वृषभं वृषाङ्कं रमातनूजन्मभिदावृषाङ्कम् ।
महोदयश्रीरजनीमृगाङ्कं गुरुं स्तुवे कीर्तिनिरस्तराकम् ॥ १

रुचिं दधानं परमामिताकं श्रीर्मङ्गलैस्तं समुपैति साकम् ।
हीलाप्रहीणं श्रितपुण्यपाकं ररक्ष यस्त्वां हृदि बुद्धलोकम् ॥ २

विद्याऽनवद्या तमुपैत्यशोकं जलेशयश्रीजितशाल्यशोकम् ।
यस्त्वां स्मरेत् पीडितकामघूकं सूरप्रभं हर्षितसाधुकोकम् ॥ ३

रिपुव्रजाक्रान्तममुं वराकं पुन्नाग ! पुन्नागनुतिष्वमूकम् ।
गर्भारसंसारजलैकभेकं वाग्वर्य ! नाभेय ! पुनीह्यशोकम् ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## २. श्रीअजितजिनस्तवनम्

(उपजाति)

मुखश्रिया तर्जितरात्रिकान्तं निरन्तरायं जिनराजिकान्तम् ।
नाथे जिनं मुक्तिरमामकान्तं यमाश्रयं मुक्तसमस्तकान्तम् ॥ १

कम्राकृतिं नाथमहं महान्तं श्रीमन्तमीडे जितशत्रुजातम् ।
विज्ञैः परीतं जितशत्रुजातं जयन्तमप्युद्धतचित्तजातम् ॥ २

यस्य क्रमद्वन्द्वमिभो नृनूतं सेव्यं सुरैराश्रयति स्म शान्तम् ।
नत्वा तमानन्दरमानिशान्तं सूपात्तसौख्यं विदधे निशान्तम् ॥३

(इन्द्रवज्रा)

रिरंसया मुक्तमिमं वहन्तं प्रभुत्वमत्यद्भूतमर्तिवान्तम् ।
वशाभिरक्षुब्धमुपैति दान्तं
राः स्वत्विषा येन जितो नितान्तम् ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## ३. श्रीसम्भवजिनस्तवनम्

(उपजाति)

श्रीसम्भवः सम्भवतीर्थनेता विराजतेऽसौ मदनैकजेता ।
जयावहं शस्तमसूत माता यकं जितारिक्षितिकान्तकान्ता ॥ १

दामार्चितः स्वर्णधनप्रदाता नयैरभाद् यः समताविधाता ।
गतिं स शैवीं भुवनैकपाताऽच्छायास्पदं यच्छतु धीजनेता ॥ २

धिनोतु युष्मान् गुणवृक्षजातारामः स सत्पूर्वपथानुयाता ।
जगन्मता नीतिसुताऽतिपूता पापापहा येन जने प्रसूता ॥ ३

दौर्जन्यपर्जन्यसमीरपाता भवन्मतिः कस्य समस्तसाता ।
जाता न सैनेय ! सदाऽभिभूताऽमितारिरुद्धु(द्धू?)तवसन्तसूता४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।

कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## ४. श्रीअभिनन्दनजिनस्तवनम्

(उपजाति)

श्रीसंवरक्षोणिपतेः सुताय मताय लोकप्रकरैर्नताय ।
दारेष्वसक्ताय नमोऽस्त्वकाय नन्दाहराय क्षितकोपकाय ॥ १

दमिव्रजाम्भोजरवे ! स्वकायविभाजितस्वर्ण ! निरस्तमाय ! ।
महाम्यहं त्वां प्रमदं विधाय लसन्मतिं सत्पथभागुपाय ॥ २

गरीयसे पापनिवारणाय च्छलैकभूजन्मनिवारणाय ।
राज्ञे मुनीनां धुतिकारणाय जन्युप्रियाय प्रणतोऽस्मयाय ॥ ३

क्रतुव्रतव्रातनत ! त्रिसायमानन्दिनं त्वां कपटं विहाय ।
वीतारिमञ्चामि मनोहराय हेलाब्जहेले ! जिनराट् सदाय ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## ५. श्रीसुमतिजिनस्तवनम्

(उपजाति)

नमन्नराधीशनिषेव्यपादं मोहैकपाथोरुहशीतपादम् ।
स्तुवे कलाकोककठोरपादं धीरं जिनं त्यक्तपरापवादम् ॥ १

मदैर्विमुक्तं जलवाहनादं तेजस्विनं मेघसुतं रमादम् ।
हेमच्छविं क्लृप्तजगत्प्रसादं मनोजदर्पोद्दलनैकपादम् ॥ २

विमुच्य यो दत्तमहाविषादं मतं भजेत् तीर्थपतिं सुसादम् ।
लभेदसौ नष्टसमस्तखेदं यशो विधूतान्तरवैरिभेदम् ॥(उ.व.)३

तिरस्कृतोन्मादमसादकन्दं राजास्यमीडे सुकृतेष्वमन्दम् ।
जात्युल्लसद्दन्तमशेषम(भ?)न्दं य आप्तवानादृतमुक्तिनन्दम् ॥४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## ६. श्रीपद्मप्रभजिनस्तवनम्

नवीमि सत्स्वान्तसरोमरालं मोक्षप्रदं कोपरसादरालम् ।
यत्नेन लावण्यगुणाकरालं मिथ्यामतोत्तुङ्गतरावरालम् ॥ १

पुरोगमानन्दसुखेन्दिरालं रम्भाभरैर्गीतमिमं धरालम् ।
दधौ सुखं वीक्ष्य गतस्मरालं रतिर्न भेत्तुं यमभूदरालम् ॥ २

सुरेश्वरन्यस्तसरोजमालं महेज्जिनं यः प्रणताङ्घ्रिमालम् ।
तिरोदधुस्तद्विपदोऽनुकालं सातं पुनः प्रादुरभूदकालम् ॥ ३

धुन्वन् भयं शर्मविधावबालं सूते स्म यत्स्वान्तमयैकजालम् ।
रसैर्नता देवमिमं शुभालं ये कायरुङ्नुन्ननवप्रवालम् ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## ७. श्रीसुपार्श्वजिनस्तवनम्

(उपजाति)

सेतुं भवाब्धौ गुणरत्नधाम ! वाचंयमाम्भोजसहस्रधाम ! ।
मनस्यहं त्वां प्रवहामि वामहेलं सुपार्श्व ! क्षितकोपकाम ! ॥१

लब्धोदयाङ्गीकृतमुक्तिपद्मक्ष्मीद्धक्षमापालनताङ्घ्रिपद्म ! ।
साधुप्रभो ! पाहि शमाभिराम ! गर्वैककोकामृतधामधाम ! ॥२

(इन्द्रवज्रा)

रतीशसारङ्गमृगेन्द्रभीमं गुर्वर्तिसंसारमखैकभीमम् ।
रुचिं दधानं वरभावमामभिषक् ! शुभं मां कुरु देव ! नाम ॥३

क्षुद्रेतरस्वान्त ! निरस्तभाम ! कुन्दाभकीर्ते ! भवभूतिराम ! ।
जयाय नो देव ! विमुक्तराम ! रङ्गद्गुणग्राम ! मनोज्ञयाम ! ॥४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## ८. श्रीचन्द्रप्रभजिनस्तवनम्

भक्त्या शशाङ्कध्वज ! वैरिवारजेतः ! शशाङ्कोपमकीर्तिभार ! ।
हंसेन्दुकुन्दद्युतिनेमिमारश्रीकण्ठ ! चन्द्रप्रभ ! निर्जितार ! ॥ १
(इन्द्रवज्रा)

मन्देतरप्रज्ञ ! रुषाविकारतन्द्रानिहन्तः ! शममग्न ! तार !।
रसेन्द्रविस्फूर्तिकृतावतार ! नमाम्यहं त्वां कृतरुङ्‌निकार ! ॥२
(उपजाति)

शेषाहिमूर्तेर्विजयं सुसारखनेः सितं यस्य यशश्चकार ।
रमाभिरन्यः किमु तेऽर्तिपूरसूतात्मजैन्द्रेऽत्र तुलां बभार ॥ ३
(उपजाति)

रीतिस्थितिः संसृतिमाधिनीरशक्तिं स सौख्येन नरस्ततार ।
पाथोजपाणेस्तव योऽतिसारदन्तस्य नुत्यां प्रमदं दधार ॥ ४
(इन्द्रवज्रा)

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्‌ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## ९. श्रीसुविधिजिनस्तवनम्

(उपजाति)

भयत्रियामादिनकृत्समान ! जातोदय ! श्रीसुविधे ! समान ! ।
महोभरैर्निर्जितचन्द्रमान ! हेतुः श्रियां नो भव निर्निदान ! ॥१

भवत्यरं यो मनुजोऽभिमानगजे गजारे ! प्रणतिं ततान ।
वन्द्यो नरैर्दुःखतरुं विगानतन्द्रोज्झितः किं न स उच्चखान ? ॥२

श्रीमन्नशेषव्रतिषु प्रधान ! मुक्तिप्रियाकान्त ! गुणासमान ! ।
निष्काम ! सेवामि सुपर्णयानसुन्दर्यपत्योद्दलनोक्षयान ! ॥ ३
(इन्द्रवज्रा)

दस्यूनशेषानभयप्रदानरतिः स किं नैव जनो जघान ? ।
गुर्वीं त्वदाज्ञां करुणानिदानरुचिं सदा यः प्रणयान्ममान ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## १०. श्रीशीतलजिनस्तवनम्

(उपजाति)

सोऽपास्तमोहप्रमदाप्रमादमदोऽत्र नान्देय ! शमासाद ।
सुन्दर्यसक्तस्य तवाऽस्तसाददरस्य यो नाथ ! नुतिं जगाद ॥१

रदत्विषा तर्जितचारुकुन्दमुदीक्ष्य यस्त्वां मनुजो मुमोद ।
निर्लोठितारिः सकलां मुकुन्दरामामवाप्याऽपि स नो ममाद ॥२

जाग्रन्मतिः सोऽत्र रमाविनोदयत्नो न किं वैरिगणं नुनोद ? ।
नत्यर्हमर्हन्तमुरुप्रमोदमानं मुदा त्वां जिन ! यो विवेद ॥ ३
(इन्द्रवज्रा)

मिथ्यामतानि प्रगलन्मरन्दसुमार्चिताङ्गः स न किं तुतोद ? ।
मुमुक्षुराट् ते स्थितिमङ्गिवृन्ददाहाम्बु यः सत्यतमामुवाद ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।

कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## ११. श्रीश्रेयांसजिनस्तवनम्

भूयिष्ठतुष्टिं प्रगुणप्रभावग्रामं मुदा त्वां जिन ! यो नुनाव ।
दक्षेषु मुख्यः सरलस्वभाव !
सौभाग्यवान् सोऽघवनं लुलाव ॥ (इन्द्रवज्रा) १

(उपजाति)

श्रेयांस ! तीर्थाधिपते ! सुभाव !
यशोनिधे ! मां विलसद्विभाव ! ।
सेवां विधातुं तव सर्वदेवकुलं द्रुतं देवगृहाद् दधाव ॥ २

लब्धोदयं संसृतिसिन्धुनावमङ्गी विभो ! त्वां खलु यश्चुकाव ।
डरम्यतुण्डः शिवभीरुहावनद्धः स कर्माणि न किं जुहाव ? ॥३

सादैकदन्तावलसिंहशाव ! धुतासुहृद्वृन्द ! गभीरराव ! ।
परद्युते ! पालितसर्वजीव ! तिरोहितांहो जिनराज ! जीव ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## १२. श्रीवासुपूज्यजिनस्तवनम्

(उपजाति)

ज्ञानोदकन्दोद्‍गमवारिवाहं नमाम्यहं मुक्तजनप्रवाहम् ।
साराशयं मुक्तिपथैकवाहं गदान्धकारोत्करसप्तवाहम् ॥ १

रक्षामि रोगाम्बुदगन्धवाहं संक्लृप्तमुक्तिस्मितदृग्विवाहम् ।
यमाप्य सद्यस्कगभस्तिदेहं मिषं जहू रुद्धगुणालिगेहम् ॥ २

विश्वं तमुत्तालकलासमूहं भुग्नेतरं रम्यमवन्तमूहम् ।
पदं श्रियामञ्चति राजदीहं ददर्श यस्त्वान्दितमोहदाहम् ॥ ३

मतं भवन्तं त्रिजगत्तमोहं हंसाभकीर्ते ! गतमानमोहम् ।
स्तुवे स्मराम्भोरुहशुभ्रवाहं वेगेन चिद्धीधवधुर्यवाहम् ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## १३. श्रीविमलजिनस्तवनम्

श्रीमल्लसज्ज्ञान कलाकुनाभे देहि श्रियं देव ! गभीरनाभे ।
वक्त्राननिद्‍र्धूतकुरङ्गनाभे सुमत्पितः स्वीकृतधर्मनाभे ॥ १

(उपजाति)

दद्याः सुखं मे विमलाप्तनाभे रम्यस्ववंशद्युतिमत्सनाभे ।
गुप्तेन्द्रिये दुःखमहावनेभे रुपाऽन्तमाप्ते त्वयि नाथ ! लेभे ॥२

(इन्द्रवज्रा)

नाथाऽङ्गभातर्जितशातकुम्भे
मदीयहृत् स्तात् त्वयि शातकुम्भे ।
मन्दोऽभवस्त्वं कृतभूरिदम्भे त्रस्तैणनेत्रानिकरे सरम्भे ॥ ३
(उपजाति)

राजेत जङ्घायुगनुन्नरम्भे जन्योस्त्वयि प्रेम शिवैकलम्भे ।
मीनध्वजाभे किमिताः सलाभे
हेलाः श्रियां तत्र न मञ्जुलाभे ॥ (इन्द्रवज्रा) ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## १४. श्रीअनन्तजिनस्तवनम्

स्मयोद्धुरक्ष्माधरवज्रपाणे ! रामाकटाक्षक्रतुशूलपाणे ! ।
मिथ्यादृगालीबलिचक्रपाणे ! सोपायमत्यै भव पद्मपाणे ! ॥१
(इन्द्रवज्रा)

(उपजाति)

मदासुहृत्संहृतिदण्डपाणे ! ऽतिशायिपद्मोदधिपाशपाणे ! ।
लक्ष्मीं प्रयच्छाऽन्वयपद्मपाणे !
कर्मव्यथातारकशक्तिपाणे ! ॥ २

मुमुक्षुमार्गद्रुमसेकपाणे ! निःसंशयानन्तसुधाभवाणे ! ।
महान् कुरु प्रीणितरम्यवाणे ! हे नेतरङ्गीकृतमानवाणे ॥ ३

शस्ते त्वयि क्लेशलताकृपाणे वर्तेत हृद्यस्य लसत्प्रमाणे ।
दधौ स्थितिं श्रीजितपञ्चबाणे नन्दात्र शीलोत्तमवारबाणे ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## १५. श्रीधर्मजिनस्तवनम्

(उपजाति)

भव्याशयो यः खलु शस्ततोषजनिः स्तवैस्त्वां पुरुषस्तुतोष ।
तमिन्दिरा विश्वकुवेलपोषसोमं स्वदृग्विभ्रमकैः पुपोष ॥ १

मतं त्वदीयं घनपापदोषप्रभुः प्रभो ! यः पुरुषो दुदोष ।
भद्राणि तस्याऽऽशु शमाप्तिमोषमुखः स्मरस्तेनवरो मुमोष ॥२

नीरागराजे खलु दुष्टदोषशक्तस्त्वयीशे जिन ! यो रुरोष ।
वर्याऽपि हि प्रोज्झितपापशोषमुखा द्रुतं तस्य मतिः शुशोष ॥३

महाशयं चित्कुमुदप्रदोष ! तीर्थेश ! यस्त्वां मनुजो जुजोष ।
राजाननं तं कलकण्ठघोष-जम्भारिपत्नी तरसा जुघोष ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## १६. श्रीशान्तिजिनस्तवनम्

विधेहि शान्ते ! श्रितरम्यरङ्गनरैर्नताङ्घ्रे ! कृतपापभङ्ग ! ।
महान्ति शर्माणि रुजान्तरङ्गततौ भवाब्धौ ततनौ सदङ्ग ! ॥ १
(उपेन्द्रवज्रा)

(उपजाति)

धत्से विभो ! त्वं महतामनङ्गमतङ्गजेभारिरपास्तसङ्ग ! ।
गोरेतरस्वान्तकजेषु चङ्गषडङ्घ्रितां कोपकुमुत्पतङ्ग ! ॥ २

सानन्दमूर्ते ! त्वयि सत्कुरङ्ग ध्वजे विभो ! यस्य मनो ररङ्ग ।
वसन्तसूतैकमरुद्धुजङ्ग ! तं मोक्षलक्ष्मीर्वृणुतेऽरमङ्ग ॥ ३

समस्तसौभाग्यरमानिषङ्ग ! चक्रित्वशक्त्या कृतवैरिभङ्ग ! ।
लब्धोऽसि येन श्रितपुण्यलिङ्ग
नन्दाङ्गना तं न किमालिलिङ्ग ? ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## १७. श्रीकुन्थुनाथजिनस्तवनम्

(उपजाति)

देहत्विषा निर्जितसत्सुवर्ण ! वेणुक्वणैः किन्नरगीतवर्ण ! ।
द्रवाश्रयं त्वां प्रणमाम्यवर्ण मुस्तैकभूदार मुदारवर्ण ! ॥ १

निःशेषपापानिलभुक्सुपर्ण ! पुनीहि दृग्नुन्नपयोजपर्ण ! ।
रङ्केतरान्नो दुरितालिकर्ण दल्मि प्रजप्रीणितविश्वकर्ण ! ॥ २

रक्षैकदक्षं भुवनासवर्णमुन्मार्गघूकद्युतिमत्सवर्ण ! ।
खरेतरं कुन्थुविभो ! सुवर्णमहं स्तुवे प्रीतसमस्तवर्ण ! ॥ ३

नुताङ्घ्रिरार्यैरमनोभवर्ण स्मयः कषायशुगनेत्रकर्ण ! ।
राजेव विश्वान्यव देव ! तूर्णमिताघतापाद् गुणरत्नपूर्ण ॥ ४

इति मुदितमनस्कोमूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## १८. श्रीअरजिनस्तवनम्

(उपजाति)

स्तुवे विभो ! त्वां जगदेकभानो !
तथ्याध्वपाथोनिधिशीतभानो ! ।
श्रियां पदं रुक्शयनैकभानो !
तनुत्विषा नुन्नहिरण्यभानो ! ॥ १

तनोति यस्ते जिन ! शस्तमानोपास्तिं स्थिरत्वैकसुमेरुसानो ! ।
विभो ! त्वदीये हृदि दत्तदानोऽ-
रुचस्त्वमब्जेऽलिरिवाप्तधेनो ॥ २

दद्याः सुरीभिः कृतकीर्तिगानो जनस्य देवीमहिषीसुसूनो ! ।
गर्वोज्झितः सर्वगुणैरनूनोच्चस्थानमागाढनिगूढजानो ! ॥ ३

द्रव्यप्रकाशं सुखकामधेनो ! सूषे स्म यः कर्मसमित्कृशानो ! ।
रीतिं स दिश्याज्जगदर्च्यमानो
शङ्कां स्म यानो वसुदेवसूनो ! ॥ (इन्द्रवज्रा) ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## १९. श्रीमल्लिजिनस्तवनम्

(उपजाति)

श्रीकुम्भभूपालकुलावतंसं धन्याशयं विश्वकृतप्रशंसम् ।
महामुनिस्वान्तसरोजहंसं सानन्दमीडे जिनमिद्धशंसम् ॥ १

गच्छेज्जिन ! त्वामलिनीलभासं
रसेन यो हृत्कजघर्मभासम् ।
वाग्भिर्जगुस्तं मरुतां पुमांसं चलेक्षणाः शस्तयशोनिवासम् ॥२

कर्मापहं स्वे हृदि राजहंसं चकार यस्त्वां भुवनैकहंसम् ।
क्रमस्थितं धर्मरमारिरंसं शिवावली तं समुपैत्यहिंसम् ॥ ३

रोचिष्णवस्तावकपन्निनंसं
लाभाः स्ववाग्विष्णुहताघकंसम् ।
कार्यज्ञमायान्ति तमाप्तशंसं रामं जगौ त्वां नतमर्त्यहंसम् ॥ ४

(इन्द्रवज्रा)

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## २०. श्रीमुनिसुव्रतजिनस्तवनम्

(उपजाति)

श्रीसुव्रत ! भ्राजिगुणालिभाजमहं स्तुवे त्वां नतदेवराज ! ।
दयानिधिं रक्षितदेहभाजमनङ्गसारङ्गकुरङ्गराजम् ॥ १

रक्तो भवेद् यः सुरमर्त्यराजविद्याधरैर्वीक्ष्य मुखास्तराज ! ।
जनः क्रमे ते प्रणमन्नृराज !
यतीश ! नैवाऽत्र स किं रराज ? ॥ २

विधेहि सद्वस्त्ववबोधबीजबुद्धिं नताशेषमरुत्समाज ! ।
धन्याङ्गनामुक्तमनोज्ञलाज परम्परः सुव्रत निर्मलाज ! ॥ ३

दम्भाभिमानस्मरभीमुराज ! नवीनपाथोधरमन्द्रवाज ! ।
मान्यं स्तुवे त्वां भवतापलाजमितामयं निर्जितधर्मराज ! ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## २१. श्रीनमिजिनस्तवनम्

(उपजाति)

शालिव्रताम्भोरुहवासरेशं सर्वाङ्गिचेतःकुवशर्वरीशम् ।
नवीमि देवं प्रणमत्सुरेशं नाथं भवोर्वीरुहकुञ्जरेशम् ॥ १

यस्त्वां स्मरेत् पापमुरेन्दिरेशं करोति चित्ते प्रणमन्नरेशम् ।
श्रीरेति शीघ्रं स्थितिबन्धुरेशं मनोज्ञमेधामणिपुष्करेशम् ॥ २

हार्यङ्घ्रिणा पावितसर्वदेशं वीतस्मयं सद्गुणसन्निवेशम् ।
रम्यं स्तुवे त्वां जिन ! सन्निदेशं
स्वाधीनतानीतसुखप्रवेशम् ॥ (इन्द्रवज्रा) ३

मिश्रेषु मुख्यं भयजीवितेशं नेतः ! शिवश्रीवरजीवितेशम् ।
नमे ! स्मरेद् यो गुणवत्सदेशं
मही महेत् तं गुणराजिवेशम् ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## २२. श्रीअरिष्टनेमिजिनस्तवनम्

(उपजाति)

पङ्क्तिर्नराणां त्वयि पञ्चरोपचर्चापहे या स्वदृशं रुरोप ।
महीतले कोऽपि परास्तकोप !
गतौ न तस्यां पुरुषश्चुकोप ॥ १

छलैकदृग् मन्मथकंशगोपपते ! जगत् गोनिकरैकगोप ! ।
तिरस्कृतारिर्नतसर्वगोप ! श्रीमन् भवानेव यदून् जुगोप ॥ २

सुरावलीसेव्य ! दिताघरोप ! धन्यं जिनं त्वां कृतपापलोप ! ।
महेन्महान्तं दुरितं न कोपपत्तिस्थितिर्नेमिविभो ! लुलोप ॥ ३

रन्ता स एव प्रणयीह गोपपत्तिप्रियायां स्वमघं जुगोप ।
रागात् त्वया प्रैक्षि पुमानरोपसौभाग्यसौजन्यनिधानगोप ! ॥४
(इन्द्रवज्रा)

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## २३. श्रीपार्श्वजिनस्तवनम्

(उपजाति)

पङ्केरुहास्याय गुणालिधारिणेडिताय कन्दर्पमदापहारिणे ।
तनूकृताखर्वसगर्ववैरिणे श्रीसूनुरूपोपमरूपधारिणे ॥ १

कलाकलापक्षितिजन्मवारिणे मत्तद्विपाधीश्वरचारुचारिणे ।
लक्ष्मस्मयारातिबलैकदारिणे विज्ञातविज्ञाशयहर्षकारिणे ॥ २

जगत्तनूमन्त्रिकरोपकारिणे यशस्विने पूतपथानुसारिणे ।
गुणाभिरामव्रतिवृन्दहारिणे रसेशवन्द्याय लसद्विचारिणे ॥ ३

(उपेन्द्रवज्रा)

वेग्यक्षवाहालिमहानुहारिणे नमामि पार्श्वाय कुवादिवारिणे ।
मोहक्षमापालकुलप्रहारिणे
स्तुताय लोकैः सतता विकारिणे ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

## २४. श्रीशासनाधीशवर्द्धमानजिनस्तवनम्

श्रीत्रैशलेय ! श्रितशुद्धजापकलो भवन्तं जिन ! यो जजाप ।
महामर्तिं रोपितसर्वपापलतो न वङ्क्तोऽपि नरः शशाप ॥ १
(उपजाति)

विलासकृद् यस्य मनस्यपापजनिर्भवान् स्वीयवचांस्युवाप ।
यतिप्रियः स क्षितविश्वतापशिलं वचः शीततमं ललाप ॥ २
(उपेन्द्रवज्रा)

शुभा भवद्दृष्टिरितानुतापहेला जनं यं भगवन्नवाप ।
मत्ताशयः कोऽपि न हि प्रलापविपत्तिपत्तिस्तमरिस्तताप ॥ ३

जज्ञे भवान् वीर ! लसत्कलाप ! यस्याशये प्रीणितसत्कलाप ।
कृत्येष्वनैषीद् भवदीयलापतिग्मद्युतिस्तं प्रणताचलाप ॥ ४

इति मुदितमनस्को मूर्धगाचार्यनामा-
ऽक्षरकमलनिबन्धैर्बन्धुरैः संस्तुतो यः ।
कमलविजयसङ्ख्यावद्विनेयाणुरेणौ
स भवतु मयि देवो दत्तदृष्टिः सतुष्टिः ॥ (मालिनी) ५

पू. मुनिश्री कीर्तिमेरुविजयविरचितानि

# १. ॥ चतुर्विंशतिजिनस्तोत्राणि ॥

## १. श्रीयुगादिस्तवः

(उपजाति)

अर्हन्तमादीश्वरमादिबुद्धं श्रियःपतिं नाभिभवं भवन्तम् ।
यमेकमप्येवमनेकरूपं ध्यायन्ति लोकास्तमहं स्तवीमि ॥ १

स्वभावभावागतयोगसिद्धे !
ताः सिद्धयोऽष्टावपि सुप्रसिद्धाः ।
सत्प्रातिहार्यर्द्धिमिषेण देव !
सेवां वितन्वन्ति तवैव नित्यम् ॥ २

सर्वज्ञ ! सर्वातिशयैकसद्म !
निश्छद्म ! पद्मासनसन्निविष्टम् ।
युगादियोगीश्वर ! योगिनस्त्वां
विलोकयन्तः कलयन्ति योगम् ॥ ३

अर्धोन्मिषत्तारमपारशान्तरसैकपूर्णं नयनद्वयं ते ।
निरीक्ष्य योगस्य रहस्यमेतच्चेच्छिष्यते शिष्यलवैस्तवैव ॥ ४

रागादिदोषाङ्कविमुक्तमौदासीन्यप्रसन्नास्यमृजुश्लथाङ्गम् ।
निसर्गसिद्धाद्भुतयोगमेकं त्वामेव देवं शरणं श्रितोऽस्मि ॥ ५

## २. श्रीअजितनाथस्तवनम्

(इन्द्रवंशा)

बाह्यान्तरङ्गारिजयं विधाय य-
श्चक्रे पितुः स्वस्य (च) नाम सार्थकम् ।

तं तीर्थनाथं जितशत्रुनन्दनं
भक्त्याऽजितं योगिगुरुं स्तवीम्यहम् ॥ १

ये जन्तवो देव ! तव प्रसादतो
लब्ध्वाऽऽत्मलाभं विरतिं प्रपद्य च ।
शान्ताः सदैकान्तनिवाससेविनः
प्रारम्भका योगविधेर्भवन्ति ते ॥ २

क्षुत्तर्षनिद्रेन्द्रियमारुतासनाभ्यासेन चिद्रूपनिरूपणोद्यताः ।
त्वां प्राप्य नाथं स्वयमेव हेलया
तन्निष्ठिता योगमयन्ति योगिनः ॥ ३

यन्मानसे ध्वस्तसमस्तकल्पनावीचीचये शुद्धसमाधिपङ्कजे ।
त्वं हंसवत् स्वच्छतमे निलीयसे
निष्पन्नयोगाः स्युरतोऽनिलीयसे ॥ ४

इत्थं त्रिभेदक्रमयोगसाधनं कुर्वन्ति ये देव ! तवोपदेशतः !
तेषां न दूरेऽखिललब्धिशालितं
श्रीवैजयेयाऽजित ! तावकं पदम् ॥ ५

## ३. श्रीसम्भवनाथस्तवनम्

(द्रुतविलम्बित)

नतपुरन्दरकौसुमशेखरक्षरदमन्दमकरन्दमनोहरम् ।
पदपयोजयुगं तव सम्भव ! प्रहतमोहतमोऽहमभिष्टुवे ॥ १

विमलकेवलसम्भव ! सम्भवाभिधविभो ! त्वदनुग्रहशालिनाम्।
विशदबोधमयी तव देशना वरमते ! रमते मतिरङ्गिनाम् ॥ २

असुमतां जगदीश ! परस्परानुगनयावलिशालिनि शासने ।
त्वदनुभावत एव रुचिः शुचिः
शुभवतां भवतान्तिहरी भवेत् ॥ ३

तव जिनेश ! सुरेश्वरसेविता सुरमणीवदियं चरणद्वयी ।
परितुतोष न येषु जनेषु तैः सचरणाचरणा कथमाप्यते ? ॥ ४

इति विबोधसुदृक् चरणात्मकं सुगतिमार्गमवाप्य तवोदितम् ।
शिवपदं सुखदं समवाप यो जिनपते ! न पतेत् पुनरप्यसौ ॥५

## ४. श्रीअभिनन्दननाथस्तवनम्

(स्वागता)

येन बन्धुजनतापि समस्ताऽकारि जन्मनि सुखैः प्रतिहस्ता ।
तं त्रिसन्ध्यमभिनन्दननाथं सम्प्रणौमि विनतामरनाथम् ॥ १

प्रातरेव तव देव ! मुदाऽरं यो हि पश्यति मुखाब्जमुदारम् ।
दर्शनं न खलु दुर्लभमस्य ब्रह्मणोऽपि नियतं परमस्य ॥ २

पूज्यसेऽर्धदिन एव सदैव स्तूयसे च जिन ! येन स एव ।
पूज्यते प्रतिदिनं सुरसार्थैः स्तूयते च वचनैर्गुरुसार्थैः ॥ ३

एककाऽपि तव पूजनवन्ध्या
यस्य याति जिन ! नान्तिमसन्ध्या ।
तत्कृतस्य सुकृतस्य न सङ्ख्यामीशते गणयितुं गुरुमुख्याः ॥४

एवमेनमभिनन्दनदेवं यस्त्रिसन्ध्यममरैः कृतसेवम् ।
वीक्षतेऽर्चति च चेतसि धत्ते
तस्य भक्तिमिह को न विधत्ते ? ॥ ५

## ५. श्रीसुमतिनाथस्तवनम्

(रथोद्धता)

मेघभूपकुलदीपमुज्ज्वलं मङ्गलाङ्कगगनार्कमण्डलम् ।
पञ्चमं सुमतिनामतीर्थपं संस्तुवे त्रिविधबोधदेशकम् ॥ १

येन्द्रियाधिकतया विशेषतोऽनेकधोल्लसति बुद्धिरङ्गिनाम् ।
सैव देव ! तव सेवकर्षिभिर्भाष्यते प्रथमबोधनामतः ॥ २

तीर्थनाथ ! तव भाषितागमप्रोक्ततत्त्वपरमार्थबोधतः ।
ज्ञाननामकममेयमुज्ज्वलं बोधमाहुरपरं महर्षयः ॥ ३

आगमार्थमवगम्य निश्चितं ज्ञाततत्त्वपरिशीलनस्पृशाम् ।
त्वत्प्रणीतपथचारिणामसम्मोहबोधमयतैव जायते ॥ ४

आद्यबोधमिह तारतम्यतः पूर्वमापमहमप्यनेकशः ।
साम्प्रतं तु सुमते ! तथा कुरु
स्यां यथा त्रिविधबोधवानलम् ॥ ५

## ६. श्रीपद्मप्रभनाथस्तवनम्

वैराग्यपूरेण मनोनिशान्ताद् रागस्त्रिरूपोऽपि बहिर्निरस्तः ।
यं सेवते कान्तिमिषेण देवं पद्मप्रभं तं प्रयतः प्रणौमि ॥ १

(इन्द्रवज्रा)

हारिद्ररागेण समो जनानां मायांशुकात् स्नेहमयोपरागः ।
त्वद्ध्यानसूर्यातपसम्भवोड्डी(हि?),
क्षणात् समुड्डीयत एव देव ! ॥ (उ.जा.) २

कौशुम्भरागोपमकामरागो, देदीप्यते लोकमनःपटेषु ।
तावद् विभो ! त्वन्महिमाम्बुपूरैः
प्रक्षाल्यते देव ! न यावदेव ॥ (इ.व.) ३

ताम्बूलरागप्रतिमोऽपि दृष्टे रागो मनश्चेलमितोऽतिगाढम् ।
प्राप्तत्वदुक्तागममातुलिङ्गरसैर्न कैस्कैरपनीयते स्म ॥ ४
(उ.जा.)

एवं त्रिभेदोऽपि जिनेन्द्रपद्मप्रभप्रभो ! रागविशेष एषः ।
नर्ते प्रसत्तिं तव जीयते (हि?) ततो द्रुतं देव ! मयि प्रसीद ॥५
(उ.जा.)

## ७. श्रीसुपार्श्वनाथस्तवनम्

(उपजाति)

जगत्प्रसिद्धेऽपि चतुष्प्रकारे धर्मे सदा मुख्यतया प्रतीतम् ।
दानं त्रिधा शुद्धमदर्शि येन, तस्मै सुपार्श्वाय नमस्करोमि ॥ १

निष्कारणं निःस्पृहमेव दानं, यच्चेतसाऽऽनन्दमयात्मकेन ।
प्रदीयते तज्जिननाथ ! चित्तशुद्धं तवैवानुगतैरगादि ॥ २

यन्मूलशुद्ध्युत्तरशुद्धिसारं, सद्वस्तु देशावसरोचितं च ।
वितीर्यते वित्तविशुद्धये तद् दानं त्वदुक्तार्थविदो वदन्ति ॥ ३

मूलोत्तरानेकगुणाय कोटिशुद्धाय सम्बन्धविवर्जिताय ।
यद्दीय[ते] तत् तव शासनज्ञाः
सत्पात्रशुद्धं प्रवदन्ति दानम् ॥ ४

एवं ददुर्ये जिन ! चित्त-वित्त-पात्रैकशुद्धं जगतीह दानम् ।
सिद्धस्य बुद्धस्य निरञ्जनस्य सुपार्श्व ! पार्श्वं तव ते लभन्ते ॥५

## ८. श्रीचन्द्रप्रभनाथस्तवनम्

(भुजङ्गप्रयात्)

सितध्यानगङ्गाजलक्षालितेव
प्रलिप्तेव सच्छीलकर्प्पूरपूरैः ।
शरच्चन्द्रवन्निर्मला यस्य कान्तिः
शरीरस्य चन्द्रप्रभं तं स्तुवेऽहम् ? ॥ १

स्वभावेन या निन्द्यकर्माऽप्रवृत्तिः,
प्रवृत्तिश्च या शस्यकृत्येषु नित्यम् ।
सदाचारशीलं तदेतत् तवैव प्रसादेन सम्प्राप्यते भव्यजीवैः ॥२

महामोहभेदस्य वेदोदयस्यावकाशं मनोरोधतः सन्निरुद्ध्य ।
स्वयं धार्यते ब्रह्मचर्यं तदेत-
न्मतं सम्मतं ब्रह्मणि प्रस्थितानाम् ॥ ३

कृते योगसञ्ज्ञेन्द्रियाङ्गिक्षमादे-
रपि व्याप्तिजातं गुणश्रेणिभूपम् ।
त्वयाऽदायि शीलाङ्गशीलं मुनीनां
रथीकृत्य मोक्षाध्वनि प्रस्थितानाम् ॥ ४

सुदृक्ष्वेकमाद्यं द्वयं संयतेषु, त्रयं चाप्रमत्तेषु जायेत यस्य ।
यथा तस्य शीलस्य लाभो मम स्यात्-
तथा देव ! चन्द्रप्रभाशु प्रसीद ॥ ५

## ९. श्रीसुविधिनाथस्तवनम्

(उपजाति)

सुग्रीवभूपालकुलावतंस !, रामाभिरामाङ्कसरोजहंस ! ।
तपोऽग्निशुद्धार्जुननिर्मलाङ्ग-
कान्ते ! प्रणामः सुविधे ! ऽस्तु तुभ्यम् ॥ १

द्वाविंशतिख्यातपरीषहाणां देहेन सम्यग् सहनं यदेतत् ।
शारीरिकं नाम तपस्त्वमेव पुण्याय तीर्थेश्वर ! साध्ववादीः ॥२

(इन्द्रवज्रा)

यद्वाचनाद्युत्तमपञ्चभेदस्वाध्यायकर्म क्रियते मुनीन्द्रैः ।
तद् वाग्मयं नाम तपोविशेषं, विशेषतः साधुतरं त्वमात्थ ॥३

यद्भावनासाम्यसमाधिसारं विधीयते ध्यानविधानमेव ।
तन्मानसं नाम तपः प्रधानतमं विदुर्देव ! तवागमज्ञाः ॥ ४

एवं तपःकर्मविशोधितात्मा त्वद्ध्यानलीनैकमहो जिनेन्द्र ! ।
यथा भवामि प्रहतप्रमादं तथा प्रसादं सुविधे ! विधेहि ॥ ५

## १०. श्रीशीतलनाथस्तवनम्

(इन्द्रवज्रा)

कुक्षौ स्थिते यत्र पितुः शरीराद्दाहज्वरार्ति क्षणमात्रतोऽपि ।
माता करस्पर्शवशाज्जहार तं शीतलं नौमि विशुद्धभावम् ॥ १

भव्याङ्गिनामेव तवोक्ततत्त्वे सम्यक्त्वलम्भावसरे रुचिर्या ।
जायेत मिथ्यात्वविघातिनीति ख्याता मुमुक्षूत्तमभेदिनी सा ॥२

आसन्ननिःश्रेयससङ्गमानां सदा त्वदाज्ञाश्रितमानसानाम् ।
या भावना प्रोल्लसति प्रमादविघातिनी सा प्रथिता प्रतीक्ष्या ॥३

(उ.जा.)

अत्याङ्गभाजां क्षपकाध्वगानां त्वयि स्फुरद्ध्यानपरायणानाम् ।
आसन्नभावागतकेवलानां या भावना मोहविघातिनी सा ॥ ४
(उ.जा.)

इत्थं स्वभक्तेषु जनेषु येन निर्वाप्य मोहोद्भवपापतापम् ।
उत्पादितं शान्तरसैकशैत्यं स शीतलस्तीर्थपतिः श्रियेऽस्तु ॥५
(उ.जा.)

## ११. श्रीश्रेयांसनाथस्तवनम्

(शालिनी)

भूनाथ-स्वर्णाथ-योगीन्द्रनाथा
भक्त्या शक्त्या दर्शितोरुप्रभावाः ।
संसेवन्ते शासनं यस्य नित्यं,
तं श्रेयांसं तीर्थनाथं स्तवीमि ॥ १

राजाऽ-मात्य-श्रेष्ठिमुख्यैर्मनुष्यैः
या ते यात्राद्युन्नतिः शासनस्य ।
तीर्थाधीशाद्यापि विस्तार्यते सा
नैवान्यत्रालोक्यते लेशतोऽपि ॥ २

सौधर्माद्या भावना व्यन्तराश्च
ज्योतिष्का ये सद्दृशः सन्ति देवाः ।
तैः सर्वैस्ते शासनं सेव्यते यत्,
तन्माहात्म्यं वर्ण्यते केन सम्यक् ? ॥ ३

यद् योगीन्द्रैस्त्वत्पदाम्भोजसेवाहेवाकोद्यल्लब्धिविद्याप्रदीपैः ।
नित्यं दीप्रैर्द्योतते शासनं तत्,
किं क्वाप्यासीत् कापथध्वान्तगम्यम् ? ॥ ४

एवं मर्त्या नाकिनो योगिनो ये
कुर्वन्त्युच्चैः शासनस्योन्नतिं ते ।
श्रीश्रेयांस ! त्वत्प्रसादेन तेषां
श्रेयःस्थानावाप्तिरस्त्येव हस्ते ॥ ५

## १२. श्रीवासुपूज्यनाथस्तवनम्

(रथोद्धता)

सम्मदान्मिलितनाकनायकैः पूज्यते विकचचारुपङ्कजैः ।
यत् पदाम्बुजयुगं सदैव तं वासुपूज्यजिननायकं स्तुवे ॥ १

पुष्प-धूप-जल-चारुचन्दन-स्फारवस्त्र-मुकुटादिशोभया ।
पूज्यसे हि रुचिराङ्गपूजया, यैस्त एव सफलार्घपाणयः ॥ २

अक्षताऽऽऽज्य-फल-दीप्रदीपया,
त्वां महन्ति य इहाऽग्रपूजया ।
ते महर्द्धिसुखसम्पदः पुरः प्राप्नुवन्ति नियतं शरीरिणः ॥ ३

गीत-नृत्य-नुतिनादरूपयाऽऽराध्यसे त्वमिह भावपूजया ।
येन तत्फलमनन्तमुत्तमं, ज्ञायते न खलु केवलं विना ॥ ४

एवमुत्तमधिया त्रिभेदया पूजया त्वमिह येन पूज्यसे ।
वासुपूज्य ! जिननाथ ! पूज्यते
स त्रिलोकपतिभिस्तु निश्चितम् ॥ ५

## १३. श्रीविमलनाथस्तवनम्

धातुर्यथाग्नेः सिचयश्च नीरात् शुद्धाञ्जनादक्षि मणिश्च शाणात् ।
ध्यानात्तथा यो विमलत्वमाप, तीर्थेश्वरं तं विमलं स्तवीमि ॥१

(इ.वज्रा.)

(उपजाति)

गतार्तरौद्रं श्रितधर्मशुक्लं,
मग्नं सदा साम्यसुधैककुण्डे ।
त्वयि विलीनं परमात्मरूपे, मनस्सतां निर्मलतामुपैति ॥ २

षड्भिश्चतुर्भिः कुवचः-कुभाषादोषैश्च मुक्तं वचनं वदन्ति ।
हितं मितं देव ! तवानुगा यत् तदुच्यते वाङ्मयनिर्मलत्वम् ॥३

हिंसादिदोषव्यसनोपरोधयत्नात् क्रियारम्भविवर्जितेऽत्र ।
त्वदुक्तमार्गाचरणे गतानां सञ्जायते कायमलोपशामः ॥ ४

ध्यायन् स्तुवन्नेवमहं च नित्यं त्वामेव देवं विमलस्वरूपम् ।
मनोवचःकायमलक्षयेण, भव्यो जनो निर्मलतामुपैति ॥ ५

## १४. श्रीअनन्तनाथस्तवनम्

(उपजाति)

अनन्तदृग्ज्ञानसुखाऽऽत्मवीर्यमयस्वरूपं परमात्मरूपम् ।
ध्यायामि सङ्कल्पविकल्पशून्यमनन्तदेवं स्वहृदि स्फुरन्तम् ॥१

जघन्यमध्योत्तमभेदभिन्नं स्फुटं चतुःपल्यनिरूपणान्तम् ।
सङ्ख्यातसञ्ज्ञं गणितं त्वमात्थ
यथा तथाऽन्येऽल्पधियः किमाहुः ? ॥ २

त्रिधाप्यसङ्ख्येयमिदं परीतयुक्तद्विरुक्तत्वनवप्रभेदम् ।
संवर्गणाजातमसङ्ख्यभेदं
यथा भवानाह तथा परे न ॥ ३

पूर्वोक्तरीत्यैव नवप्रभेदमनन्तमप्येतदनन्तभेदम् ।
प्रक्षेपसंवर्गविधिप्रवृद्धं, त्वमेव जानासि जिनेश ! सम्यग् ॥ ४

सङ्ख्यातराशिर्मनुजादिकेषु,
राशिस्त्वसङ्ख्यो विबुधादिकेषु ।
सिद्धादिषूक्तः स्वकनामराशि-
र्येन प्रणामोऽस्तु जिनाय तस्मै ॥ ५

## १५. श्रीधर्मनाथस्तवनम्

(उपजाति)

यमेव चिन्तामणिबुद्धिराध्यं दुःखं समाराध्य सुखं लभन्ते ।
लोकास्तमेवैकमहाप्रभावं धर्मोपमं धर्मजिनं श्रयामि ॥ १

मैत्रीप्रधानं करुणानिधानं, प्रमोदतापूर्णमुपेक्षयाढ्यम् ।
मनो यदीयं भवति स्वभावात्,
श्रीधर्म ! तच्चेतसि वर्तसे त्वम् ॥ २

पिण्डे नियुक्तं च पदे प्रयुक्तं, रूपे स्थिरं सृष्टमतीतरूपम् ।
ध्यानं चतुर्धेति समस्ति यस्य,
ध्याता स धर्मस्य विनिश्चयेन ॥ (इ.वज्रा.) ३

आज्ञा-ऽपायश्च विपाकता च
संस्थानता चेति चतुष्टयस्य ।
विचारणा चेतसि यस्य नित्यं,
स एव धर्मैकपरो नरः स्यात् ॥ ४

स्वशासने वा परशासने वा बालैश्च वृद्धैश्च बुधैश्च मूर्खैः ।
प्रगृह्यते यस्य सदैव नाम धर्मं तमेवाहमपि श्रितोऽस्मि ॥ ५

## १६. श्रीशान्तिनाथस्तवनम्

(उपजाति)

सदा सुरालीभिरधिष्ठितेन यश्चक्ररत्नेन महाबलेन ।
जिगाय सर्वं नरनाथचक्रं, जीयात् स शान्तिर्जिनचक्रवर्ती ॥ १

यः कालपाठाद्यरकात्मकेन सञ्ज्ञानचक्रेण महोमयेन ।
अज्ञानतावल्लितर्तिं लुलाव, जीयात् स शान्तिर्जिनचक्रवर्ती ॥ २

निःशङ्कताद्यारकमण्डलेन चक्रेण यो दर्शननामकेन ।
ममन्थ मिथ्यात्वमिहारिवारं,
जीयात् स शान्तिर्जिनचक्रवर्ती ॥ ३

इर्यासमित्यादिमयारकेण चारित्रचक्रेण सुदुर्धरेण ।
चिच्छेद यो मोहतरुं महान्तं,
जीयात् स शान्तिर्जिनचक्रवर्ती ॥ (इ.वज्रा) ४

यस्येति रत्नत्रयरूपचक्रत्रयात्मकं राजते धर्मचक्रम् ।
बाह्यान्तरङ्गारिजयैकहेतुर्जीयात् स शान्तिर्जिनचक्रवर्ती ॥ ५

## १७. श्रीकुन्थुनाथस्तवनम्

(रथोद्धता)

शूरराजतनयं नयोज्ज्वलं चक्रवर्तिकमलाविलासिनम् ।
कुन्थुनाथमहमेष भक्तितः संस्तवीमि कृततत्त्वनिर्णयम् ॥ १

प्रत्यपादि जगदीश ! यत् त्वयोत्पत्तितत्त्वमखिलेषु वस्तुषु ।
आससाद तदपीह निश्चितं लोकरूढिवशतो विधेः पदम् ॥ २

सत्सु वस्तुषु भवानपीह यत् तत्त्वमाह विगमत्वलक्षणम् ।
तत्स्वभावमयमूर्तिमानयं शम्भुरेव जनताभिरुच्यते ॥ ३

विश्ववस्तुविषयेषु वाह (?) (य)द्
ध्रौव्यतत्त्वमिह यद् भवान् विभो !।
श्रीसमुद्भव ! तदेव साग्रहं केचिदच्युततया बभाषिरे ॥ ४

इत्यजेश-हरिरूपमेतकं यत्परेऽपि जगदुर्जगत्त्रये ।
तत् त्रितत्त्वमयमेव भासतेऽस्माकमीश ! मनसीह नान्यथा ॥५

## १८. श्रीअरनाथस्तवनम्

(द्रुतविलम्बित)

गजपुरेशसुदर्शननन्दनं प्रथितभारतसप्तमचक्रिणम् ।
अरजिनं जितगौरवमादराद्, वयममी स्वहृदि प्रणिदध्महे ॥१

मठवितानसदंशुकपुस्तकाऽऽसनजनर्द्धिविलोकनगौरवम् ।
अपि मुनिर्निजचेतसि यो वहेत्
कथमसौ लभते तव दर्शनम् ? ॥ २

.............................................................. ।
............................................................ ॥ ३

य इह खाद्यविलेह्यकदूष्यकाऽभिनवपेयरसैककृतस्पृहः ।
........................ स रसगौरववान् खलु वञ्च्यते ॥ ४

अरजिनेश ! सुरेशनतेदृशीं त्रिविधगौरवदत्तविडम्बनाम् ।
अहमतीत्य यथा समतामयः पथि चरामि तवैव तथा कुरु ॥५

## १९. श्रीमल्लिनाथस्तवनम्

(उपजाति)

श्रीकुम्भभूपालकुलप्रदीपं, भवार्णवे विस्तृतमन्तरीपम् ।
उत्खातशल्यत्रयवल्लिमूलं
ध्यायामि मल्लिं स्वमनोऽनुकूलम् ॥ १

अप्यल्पमात्रेण बलं स्वकीयं प्रादर्शि येन प्रसभं भवत्सु ।
तन्नाथ ! मायामयशल्यमस्मादृशैर्वराकैरपि जीयते किम् ? ॥२

येनान्त्यचक्रीश्वरनन्दिषेणमुख्याङ्गिनो दुर्लभबोधिकत्वम् ।
सम्प्रापितास्तत्र निदानशल्ये-
ऽयस्कान्तिरत्नं...(हि ?) तवोपदेशः ॥ (इ.वज्रा) ३

प्राप्यापि बोधिं विरतिं च जीवा
मरीचिवद् येन भवं भ्रमन्ति ।
तन्मे हृदिस्थं जिननाथ ! मिथ्या-
दृक्शल्यमाकर्षय सूत्रमन्त्रैः ॥ ४

शल्यत्रयं तावदिदं जनानां हृदि प्रविष्टं कुरुते प्रपीडाम् ।
मल्ले ! नमल्लेख ! तव प्रणामसंदंशकेनाद्रियते न यावत् ॥ ५

## २०. श्रीमुनिसुव्रतनाथस्तवनम्

(उपजाति)

सुमित्रधात्रीशभवं भवन्तं, यो ध्यायति ध्याननिलीनचित्तः ।
चिन्तातुराणां प्रसरं निवार्य, स सुव्रतः सुव्रत ! सम्मतस्ते ॥१

पूर्वानुभूतिस्मृतिमात्रजातदुर्ध्यानसन्तानमयैकरूपाम् ।
योऽतीतचिन्तामधमां निनिन्द, स सुव्रतः सुव्रत ! सम्मतस्ते ॥२

योऽनागतार्थानुगतां च चिन्तां विमध्यमां सापि निरर्थकत्वात् ।
प्रत्याचचक्षेऽतिविशुद्धचेताः,
स सुव्रतः सुव्रत ! सम्मतस्ते ॥ ३

स्वभावसूक्ष्मस्थितिवर्तमानकालप्रचारां जिननाथ ! चिन्ताम् ।
यश्चोत्तमाख्यामपि संवृणोति, स सुव्रतः सुव्रत ! सम्मतस्ते ॥४

इति त्रिकालप्रभवामपीमां चिन्तां महामोहमयीमपास्य ।
अचिन्त्यरूपे त्वयि लीयते स्म,
स सुव्रतः सुव्रत ! सम्मतस्ते ॥ ५

## २१. श्री नमिनाथस्तवनम्

(उपजाति)

नम्राऽखिलाऽऽखण्डलमौलिमाला वव्रे सहंसावलिसङ्गचङ्गम् ।
पदाम्बुजं श्रीनमिनाथतीर्थेशितुः
स्तुवे सत्त्वगुणाढ्यलाभम् ॥ १

शक्तः क्षमावान् धनवानुदारो विभुर्विवेकी गुणवानगर्वः ।
परोपकारी च सुधीर्नरः स्यात्
तवोदितात् सत्त्वगुणाज्जिनेश ! ॥ २

भोगाङ्गसङ्गोल्लसिनाभिमानस्त्रिवर्गसंसाधनसावधानः ।
यद्विभ्रमां भ्रान्तिमना जनः स्याद्,
रजःस्वभावां तदुदाहरस्त्वम् ॥ ३

तवागमे सत्यपि यज्जनोऽयं नारीधनादावतिलुब्धचेताः ।
सदा परद्रोहपरायणः स्यात्, तत्तामसत्वं प्रथयन्ति सन्तः ॥ ४

नमे ! तव ध्यानदिवाकरो मे रजस्तमस्तोममपास्य दूरात् ।
उल्लासयत्युत्तमसत्त्वपद्मं यथा तथा नाथ ! मयि प्रसीद ॥ ५

## २२. श्रीनेमिनाथस्तवनम्

(उपजाति)

यस्योज्जयन्तावपि चूलिकायां कल्याणकानां त्रितयं बभूव ।
श्रीयादवानन्दकरं जिनेन्द्रमभिष्टुवेऽहं तमरिष्टनेमिम् ॥ १

भवान् विभो ! रैवतकेऽत्र शैले
राजीमतीं राज्यमतिं च मुक्त्वा ।
आबालकालादपि शुद्धशीलो जग्राह दीक्षां शिवदानदक्षाम् ॥२

तां क्षायिकीं श्रेणिमवाप्य शुक्लध्यानान्तराले हतघातिकर्मा ।
लेभे भवानत्र गिरौ गरीष्ठे सत्केवलज्ञानमपि प्रधानम् ॥ ३

(इ.वज्रा)

इहैव शैलेऽनशितो हि मासं कृत्वा समुद्घातनयोगतां च ।
कर्मांशमुक्तः समयेन सिद्धिं
नित्यां सदानन्दमयीमितोऽसि ॥ ४

इत्थं गिरौ यो गिरनारनाम्नि कल्याणकानां त्रितयं ततान ।
देवः स रत्नत्रयदानपूर्वं संघस्य शस्यास्पदसम्पदेऽस्तु ॥ ५

## २३. श्रीपार्श्वनाथस्तवनम्

(उपजाति)

कलावपि श्रीकलिकुण्डमन्त्रयन्त्रप्रयोगाः प्रकटप्रभावाः ।
स्फुरन्ति यद्ध्यानबलेन पुंसां, श्रीपार्श्वनाथं तमहं नमामि ॥१

यस्मिन् मनोन्तःस्फुरति प्रदीपो-
पमे तमोध्वंसिनि सद्दृशां स्यात् ।
चिन्तामणिस्फूर्तिमयस्फुटैव, श्रीपार्श्वनाथं तमहं नमामि ॥ २

मन्त्राधिराजाक्षरसङ्गचङ्गं यं ध्यायतां षड्दलपद्ममध्ये ।
पुंसां वशे स्युर्विजयाजयाद्याः, श्रीपार्श्वनाथं तमहं नमामि ॥ ३

(इ.वज्रा)

नागेन्द्रपद्माऽऽ तत–पादपद्महृत्पद्मगो यत्र भवत्यवश्यम् ।
लोकस्त्रिलोकी विजयाजयाद्याः, श्रीपार्श्वनाथं तमहं नमामि ॥४
(इ.वज्रा)

अन्येऽपि विद्यामणिमन्त्रयन्त्रा जने मनोवाञ्छितसिद्धयश्च ।
यन्नाममन्त्रस्मृतिमात्रतोऽपि, श्रीपार्श्वनाथं तमहं नमामि ॥ ५

## २४. श्रीमहावीरस्वामिस्तवः

किङ्किल्लिसत्पल्लवमण्डपान्तर्सिंहासनासीनमहीनभासम् ।
छत्रत्रयीचामरचारुशोभं, धर्मं दिशन्तं प्रणमामि वीरम् ॥ १
(इ.वज्रा)

ये देशनासद्मनि रत्नशालविशालशालासु सभासु भव्याः ।
विलोकयन्ति स्म चतुर्मुखं त्वां,
नरामरा देव ! त एव धन्याः ॥ (उपजाति) २

द्वितीयशाले मिलितास्तिरश्चां गणाः कर्णेहत्य तवैकवाणीम् ।
पपुः परां ये परिमुक्तवैरा–
स्ते श्लाघनीया न जिनेश ! कस्य ? ॥ (उपजाति) ३

शाले तृतीये तव शालनाट्यशालासु नाट्यानि मनोहराणि ।
विस्तारयन्तस्तव देव ! सेवा–
हेवाकिनो नाकिनरोऽपि धन्याः ॥ (इ.वज्रा) ४

इति त्रिशालस्थितितोरणादिशोभाद्भुतं सद्म सुदेशनाय ।
आलोकि लोकैस्तव यैर्जिनेन्द्र !
तेषां कृतार्थी च विलोकनश्रीः ॥ (उपजाति) ५

# १०. ॥ चतुर्विंशतिजिनस्तोत्राणि ॥

## १. श्रीऋषभदेवस्तवनम्

(अनुष्टुप्)

श्रीनाभेय ! सुनाभेयसदनं सदनन्तचित् ।
न त्वा नत्वा दयालो ! के लोके लोकेशतामगुः ॥ १

हतमोहतमोद्रोहः कामदः कामदर्प्पहा ।
जय सद्भालसद्भाल ! त्वमितापदतापदः ॥ २

स्तवं निर्माय निर्माय ! न तवाऽऽनतवासव ! ।
सुकृती सुकृती जज्ञे कोऽमलः कोमलध्वने ॥ ३

नरमा नरमानद्रुप्रभञ्जनप्रभञ्जन ! ।
जनताऽज ! नता लेभेऽदर्पकाऽदर्पका त्वयि ॥ ४

यस्त्वाऽभीमारि भीमारिप्रमद ! प्रमदप्रद ! ।
नमतीन ! मतीरेष सदयाः सदयाः श्रयेत् ॥ ५

## २. श्री अजितनाथस्तवनम्

(अनुष्टुप्)

श्रीमन्तमजितं देवं कषायैरजितं सदा ।
त्रैलोक्यवन्दितं देवं घोरसंसारपारगम् ॥ १

अद्य प्राप्ताः श्रियः सर्वा मया तीर्ण्णो भवार्णवः ।
जीवितं सफलं मेने यत् त्वं दृष्टोऽतिदुर्लभः ॥ २

पवित्रा रजनी सैव प्रशस्यो दिवसोऽपि च ।
स एव जगतीनाथ ! यत्र स्यात् तव दर्शनम् ॥ ३

त्वं मरौ कल्पशाखीव जाङ्गले गाङ्गपुरवत् ।
सुपर्वमणिवन्नैस्स्वे दुर्लभोऽसि प्रभो ! भवे ॥ ४

अनवद्या महाविद्याः सम्पदो विपदोज्झिताः ।
सौभाग्यं सह भाग्येन भाक्तिकः संश्रयेत् तव ॥ ५

## ३. श्रीशम्भवनाथस्तवनम्

(अनुष्टुप्)

श्रीशम्भवजिनाधीशं योगीन्द्रं नौमि सादरम् ।
जगत्पूज्यं मुदा हेलिमुल्लसन् महसाऽदरम् ॥ १

निस्तीर्ण्णरौद्रसंसारदावपावक ! शम्भव ! ।
सेनामातः सदा तात ! सद्भावरावश्यम्भव ! ॥ २

त्वं जीयाः सर्वदाऽनर्घ्यगुणकल्पद्रुनन्दनः ।
जितारिगण ! लोकेश ! जितारिनृपनन्दनः ॥ ३

यं नत्वा लेभिरे शैवसम्पदं मङ्क्षु देहिनः ।
स त्वं सत्त्वं क्षयं कर्तुं मोहराजस्य देहि नः ॥ ४

तत्याज शासनं जातु तावकं पावकं न यः ।
तं शाश्वतसुखावासं कैवल्यभविकं जय ॥ ५

## ४. श्रीअभिनन्दनजिनस्तवनम्

(अनुष्टुप्)

सोऽभिनन्दननाथ ! त्वं विजयस्व दयाऽमदः ।
यस्य ते हृद्यमेयाऽस्थाद् विजयस्वदयाऽमदः ॥ १

जनताऽऽपन्नदीतारतरणे ! भवतारण ! ।
मोहारेराविं कान्त्याऽस्ततरणे ! भवता रणः ॥ २

श्रीस्ते न हि मुदे कस्य प्रभो ! विश्वाभिनन्दन ! ।
रक्ष मां भवतो भास्वत्प्रभो विश्वाभिनन्दनः ॥ ३

पाहि ताः शोषिताघौघ ! नीरागततमादयाः ।
त्वं प्रजा न हि तत्याज नीरागततमादया ॥ ४

सा श्लाघ्या स्वदृशा प्रास्तकमला सदया लयम् ।
या त्वा गत्वा प्रजा स्तौति कमलासदयालयम् ॥ ५

## ५. श्रीसुमतिनाथस्तवनम्

(अनुष्टुप्)

सुमतावावली पद्मां सुमतावस्थिता नता ।
सुमतावापका नेयाऽसुमतामयसद्मनि ॥ १

भवनाशगुणश्रेणिभवनासुमतां श्रिये ।
भव नाथ ! मनोजन्मभव ! नागगते ! सदा ॥ २

कामद ! त्वां प्रजा दृष्ट्वा कामदर्पहरं मुदम् ।
कामदश्रेयसा लेभे कामदक्षां युतां न हि ॥ ३

कमलादान्यदोषाणां कमलातारमाश्रितम् ।
कमलाक्ष ! ररक्षास्तकमलारेर्भवान्नहि ॥ ४

तारया श्रद्धया चारुतार ! यास्ते स्तुतिं व्यधुः ।
ता रयाज्जनता देव ! तारयाऽऽपन्नदीपतेः ॥ ५

## ६. श्रीपद्मप्रभजिनस्तवनम्

(अनुष्टुप्)

श्रीपद्मप्रभनाथाय सनाथाय श्रिया नमः ।
योगीन्द्राय नतेन्द्राय महते परमात्मने ॥ १

तवाचिन्त्यप्रभावस्य स्वरूपं वेत्ति कः प्रभो ! ।
प्राप्तानन्तचतुष्कस्य महेशस्य महात्मनः ॥ २

शाश्वतं योगिनां ध्येयं विरूपं रूपवर्जितम् ।
शिवश्रीकण्ठशृङ्गारहारं सारं सदा नुमः ॥ ३

महादेवो महानन्ददायको जिननायकः ।
जयति क्षीणकर्मारिर्महिमास्पदमन्वहम् ॥ ४

महनीयचरित्रस्य श्रेष्ठस्य परमेष्ठिषु ।
गुणग्रामगरिष्ठस्य किङ्करोऽस्मि तव प्रभो ! ॥ ५

## ७. श्रीसुपार्श्वनाथस्तवनम्

(अनुष्टुप्)

श्रीसुपार्श्वजिनेन्द्रस्य चन्द्रस्य जगतः स्तुवे ।
स्याद्वादिनः क्रमाम्भोजमभवस्य स्वयम्भुवः ॥ १

न हि कस्य मुदे देव ! भवतो मुखचन्द्रमाः ।
अकलङ्कः सदा सौम्यकान्तिश्रीसदलङ्कृतः ॥ २

सुधाकुण्डाभयो रम्यनेत्रयोस्तव सौम्ययोः ।
कमलाकारयोस्तारतारयोर्भद्रमन्वहम् ॥ ३

पद्मरागारुणप्रेङ्खन्नखद्युतिविराजितम् ।
वीक्ष्य ते को मुदं नाऽऽप सल्लक्षणकरद्वयम् ॥ ४

पुण्यलावण्यसम्भारसौभाग्यपदमद्भुतम् ।
दृष्ट्वा ते निर्म्मलं रूपं को न चित्रीयते सुधीः ॥ ५

## ८. श्रीचन्द्रप्रभजिनस्तवनम्

(अनुष्टुप्)

श्रीचन्द्रप्रभदेव ! त्वां चन्द्रोज्ज्वलतनुत्विषम् ।
चन्द्राननमहं स्तौमि चन्द्रलाञ्छनमादरात् ॥ १

कर्त्ता विश्वोपकाराणां ज्ञाता त्रैलोक्यवस्तुनः ।
त्यक्ता राजश्रियो जीयात् प्राप्ता मुक्तिपुरः परः ॥ २

त्रातारं विश्वजन्तूनां दातारं शिवसम्पदाम् ।
हन्तारं भावशत्रूणां नेतारं नौमि भक्तितः ॥ ३

स्वामिनेऽखिलविश्वस्य शमिने दमिने सदा ।
नयिने यमिने भूयात् तायिने ज्ञानिने नमः ॥ ४

हरते कुमतेर्वादान् कुर्वते जगते हितम् ।
श्रीमते धीमते नेतः ! महते भवते नमः ॥ ५

## ९. श्रीसुविधिनाथस्तवनम्

(अनुष्टुप्)

सुविधे ! सुविधे धीरः सुमते सुमते ! यते ! ।
तावके पावके त्यक्तवनितो विनतोऽस्म्यहम् ॥ १

अनेकनयसङ्कीर्ण्णं दुर्लभं भवदागमम् ।
कुतीर्थिकशतागम्यं प्रमाणाबाध्यमाश्रये ॥ २

याऽऽराद्धा कल्पवल्लीव जन्तूनां कल्पितप्रदा ।
त्वदाज्ञामनिशं शीर्षे शेषामिव वहामि ताम् ॥ ३

प्रदत्ते सुगतेर्युग्मं युगं हन्ति च दुर्गतेः ।
भव्यानां पालितं यत् ते दर्शनं तदहं श्रये ॥ ४

चारित्रेण पवित्रेण कृत्स्नकर्मक्षयं व्यधाः ।
त्वं येन तरसा देहि तन्ममापि तमोपहम् ॥ ५

## १०. श्रीशीतलनाथस्तवनम्

(अनुष्टुप्)

श्रीशीतल ! जिनाधीश ! सर्वज्ञ ! परमेश्वर ! ।
भगवन् ! सुचिरं नन्द योगीश्वर ! महामुने ! ॥ १

देवाधिदेव ! तीर्थेश ! पुरुषोत्तम शङ्करः ।
जय पारगतः स्वामिन् ! केवलज्ञानसत्तमः ॥ २

वीतराग ! महादेव ! स्वयम्भूर्मुनिनायक ! ।
सवीर्यः सर्वदा सार्वः त्रायस्व त्वं त्रिकालवित् ॥ ३

जिनं क्षीणाष्टकर्माणमभयप्रदमुत्तमम् ।
स्याद्वादवादिनं सर्वदर्शिनं बोधिदं नुमः ॥ ४

तीर्थङ्कराय देवाय शम्भवे विभवे भवे ।
अर्हतेऽनिशमाप्ताय नमः श्रीपरमेष्ठिने ॥ ५

## ११. श्रीश्रेयांसनाथस्तवनम्

(अनुष्टुप्)

श्रेयांसः श्रेयसां धाम श्रेयसेऽस्तु सदा सताम् ।
यन्नामध्यानतो मर्त्या लभन्ते श्रेयसीं श्रियम् ॥ १

श्रेयांसि श्रेयसो नाम निरस्ताश्रेयसो मुदा ।
ध्यायन्तो मन्त्रवत् प्राज्ञा लेभिरे भक्तिशालिनः ॥ २

अगण्यपुण्यपण्यानामापणो जगदुत्तमम् ।
एष एव प्रमोदेन श्रेयांसं नौति यो मुदा ॥ ३

नूनं शिरोमणीयन्ते ते नरा महतामपि ! ।
श्रेयांसे विद्यते भक्तिर्येषां मनसि शाश्वती ॥ ४

तं मानवशिरोरत्नं वन्दन्ते त्रिदशा अपि ।
यः श्रेयांसवचो वन्द्यं लङ्घते न कदाचन ॥ ५

## १२. श्रीवासुपूज्यजिनस्तवनम्

(अनुष्टुप्)

वासुपूज्यप्रभो ! सर्वजन्तुजातकृपापरः ।
त्वत्तो नान्योऽस्ति देवो हि मुक्तिदाता जगत्त्रये ॥ १

आराधयेज्जिनेश ! त्वां यो विमुच्य कुदैवतम् ।
करीरं सेवते मूढः सोऽपास्य सुखशाखिनम् ॥ २

कथं श्रीर्वर्द्धते तेषां गेहे श्रेयो भवेत् किमु ? ।
येषां त्वदर्चने नाथ ! नाऽऽदरः सर्वथा नृणाम् ॥ ३

देवयोर्नान्तरं येषां स्वान्ते नीरागरागिणोः ।
किं ते जडा न मन्यन्ते तुल्यत्वं मणिकाचयोः ॥ ४

देवो विश्वे त्वमेवेति जानन्तोऽपि जना जिन ! ।
यद् ध्यायन्ति कुदेवं तन्मिथ्यात्वं बलवत्तरम् ॥ ५

## १३. श्रीविमलनाथस्तवनम्

(अनुष्टुप्)

विमलो जगतीनाथः सततं विमलाजिनः ।
निर्म्मदो निर्म्ममो जीयान्निर्दोषो निर्गतामयः ॥ १

स्वामिन् ! निर्द्रोह ! निर्मोह ! निर्लोभ ! गतमत्सर ! ।
जय निःसङ्ग ! निर्माय ! निरीह ! हततामस ! ॥ २

हतदुष्कर्मसङ्घात ! हतपातकसञ्चय ! ।
हतसंसारसन्ताप ! हतमन्मथ ! पाहि नः ॥ ३

त्यक्तराज्यरमाऽऽराम ! नीराग ! जय नीरजः ! ।
त्रस्तभावद्विषज्जात ! प्रदातस्नेहबन्धन ! ॥ ४

मुक्तेर्निशोक ! निष्कोप ! निर्दम्भ ! मम निर्भय ! ।
त्वं यच्छ शर्म निर्हास ! मरणोज्झित ! निर्भव ॥ ५

## १४. श्रीअनन्तनाथस्तवनम्

(अनुष्टुप्)

श्रीअनन्तजगन्नाथमनन्तयशसं जिनम् ।
अनन्तपृथुविज्ञानमनन्तसुखदं स्तुवे ॥ १

नाभिभूतश्चतुर्वक्त्रो हंसगामी प्रजापतिः ।
सदा ब्रह्माऽसि धातेव प्रभो ! चित्रमराजसः ॥ २

अरिष्टनरकच्छेदी श्रीपतिः पुरुषोत्तमः ।
चित्रं विष्णुरिवासि त्वमगदो न जनार्दनः ॥ ३

सर्वज्ञो मदनद्वेषी शम्भुरीशो महाव्रती ।
शङ्करोऽस्ति तदाश्चर्यं नेतर्यदभवो भवान् ॥ ४

ब्रह्मरूपस्त्वमेवासि शङ्करः पुरुषोत्तमः ।
इति देवत्रयीरूपस्त्वमेव भवने मतः ॥ ५

## १५. श्रीधर्मनाथस्तवनम्

(अनुष्टुप्)

धर्मनाथ ! कृपां कुर्याः पततीह भवे मयि ।
यस्मात् त्वत्सदृशो नान्यः करुणारससागरः ॥ १

नास्तीह त्वत्समो दाता नास्ति रोरोऽपि मत्समः ।
अतो मे याचितं देहि देहिव्यूहहितः शिवम् ॥ २

त्रैलोक्यदुःस्थितोद्धारे त्वमेव कृतसङ्गरः ।
मत्तुल्यो दुःस्थितो नातो मामुद्धर कृपापर ! ॥ ३

भीतत्राणे महान्तो हि तत्परास्तेषु सत्तरः ।
त्वमेकोऽसि ततो भीतं पाहि मां मोहभूपतेः ॥ ४

आत्मतुल्यमुदारेशाः कुर्वन्ति निजसेवकम् ।
त्वं सीमा तेषु भृत्योऽहं तवेति जिन ! चिन्तय ॥ ५

## १६. श्रीशान्तिनाथस्तवनम्

(अनुष्टुप्)

शान्तिनाथं जिनं भक्त्या सुरासुरनरार्चितम् ।
स्तुवे शान्तिकरं शान्तिमन्दिरं मन्दधीरहम् ॥ १

शिवश्रीसङ्गदातारं हन्तारं जगदापदाम् ।
भवन्तं को न वन्देत वीतराग ! सचेतनः ॥ २

सुधापानं मरौ देशे यथा पुंसोऽतिदुर्लभम् ।
तथैवाकृतपुण्यस्य दुर्लभो मृगलाञ्छनः ॥ ३

प्राप्यापि जिन ! निर्दोषं दुष्प्रापं तव शासनम् ।
प्रमादं कुर्वते येऽत्र हा तेषामतिमूढता ॥ ४

श्रीशान्ते ! भवतः पार्श्वे न याचे शक्रसम्पदम् ।
वाञ्छामि भवदाज्ञायाः पालनं तु भवे भवे ॥ ५

## १७. श्रीकुन्थुनाथस्तवनम्

(अनुष्टुप्)

कुन्थुनाथ ! जगन्नाथ ! सर्वथाऽपाकृथा यथा ।
मोहमल्लं तथोपायं कृपया मम दर्शय ॥ १

त्रिलोकीगञ्जनं वीरं यया शक्त्याऽवधीः स्मरम् ।
प्रसद्य सत्वरं यच्छ तज्जये मम तां प्रभो ! ॥ २

चूर्णीकृतानि कर्माणि भवता येन लीलया ।
तद्ध्यानं कृपया नाथ ! ममापि वितराधुना ॥ ३

शिवश्रीकण्ठशृङ्गारहारतां भगवन्नगाः ।
यया समतया मे तां कृपां कृत्वा सुलम्भय ॥ ४

यत्सुखं त्वं शिवाऽऽवासे स्वामिन्ननुभवन्नसि ।
तस्य मे निजभृत्यस्य संविभागं कुरु प्रभो ! ॥ ५

## १८. श्रीअरनाथस्तवनम्

(अनुष्टुप्)

अरनाथ ! सदा कुर्यात् तवाऽऽज्ञोल्लङ्घनं न यः ।
शीर्षेऽशेषेव तस्याज्ञा मरुताऽपि विधीयते ॥ १

त्वदाज्ञारहितो देही न सुखं न च सम्पदः ।
न यशो न च नाकित्वं नापवर्गं समाश्रयेत् ॥ २

तीर्थसेवा क्षमा ध्यानं दमो दानं दया तपः ।
सर्वं तवाज्ञया हीनं मुक्तये सर्वथा न हि ॥ ३

कारारूपनिगोदेषु सततं भवदाज्ञया ।
वर्ज्जितो दुःखितो दीनोऽनन्तकालं स्थितोऽस्म्यहम् ॥ ४

मयेह भ्रमताऽवापि त्वदाऽऽज्ञा कर्मलाघवात् ।
तथा कुरु यथा नाथ ! स्यात् तस्याः खण्डनं न मे ॥ ५

## १९. श्रीमल्लिनाथस्तवनम्

(अनुष्टुप्)

मल्ले ! खजिद् ! नमल्लेख ! तारतत्त्वव्रताऽऽरत !।,
सद्भावप्रोल्लसद्भाऽव ! मामनामरमामनाः ॥ १

भीमारिजिदभीमारिः सर्वदाऽरिद्र ! सर्वदा ।
लोके शर्म्मद ! लोकेश ! यामद ! त्वं जयाऽमद ॥ २

नो कोऽपव्यसनोऽकोप ! मानवर्ज्जित ! मानवः ।
माऽराग ! स्तौति मारागवारण ! त्वाऽघवारण ! ॥ ३

तत्याज गुणतत्याऽज ! राजितश्रीर्दराजित ! ।
तानामहर ता नाऽऽम सन्म ! ते येऽलसन् मते ॥ ४

यामायनिलयामाय ! तारयाऽविप्रतारया ।
याता तत्त्वधिया तात ! सत्तमस्त्वमसत्तमः ॥ ५

## २०. श्रीमुनिसुव्रतजिनस्तवनम्

(अनुष्टुप्)

सुव्रतः सुव्रतस्वामिन् ! परमाऽपरमानहृत् ।
कमलाः कमलास्य ! त्वं देहि नो देहिनो हितः ॥ १

सुमनाः सुमनास्त्वत्तोऽसमवासमवाप्नुयात् ।
भासुरा भासुराच्यीँह्रिपद्मतोऽपद्मतोऽमृते ॥ २

सदयं सदयं न त्वा महतामहता रमा ।
न मता नमता लेभे सकला सकला प्रभो ! ॥ ३

तरणे ! तरणे ! भासा भवतो भवतोयधौ ।
न यते ! नयतेऽर्चां कोऽमदनाऽमद ! ना पदौ ॥ ४

वसु धाव सुधाभूतसमताऽसमतासमम् ।
रणवारणवागस्य सत्वरं सत्त्वरङ्ग ! मे ॥ ५

## २१. श्रीनमिनाथस्तवनम्

(अनुष्टुप्)

नमिदेवं गुणाऽऽकार सन्नतामरमण्डलम् ।
विनमामि रसाधारं भवसागरतारणम् ॥ १

विमलं कमलाकेलिमन्दिरं वसुसुन्दरम् ।
वन्देऽहं सादरं देव ! पदतामरसं तव ॥ २

भूरिमायारसासीर ! हेमकाय ! तमोहर ! ।
महामोहमहानागकण्ठीरव ! चिरं जय ॥ ३

नीराग ! निरहङ्कार ! निरपाय ! निरामय ! ।
कामं समीहितं देहि देव ! मे जनताहित ! ॥ ४

दमदानदयासारतारमागमसागरम् ! ।
सेवे गममणिवारदं कुलं विपुलं तव ॥ ५

## २२. श्रीनेमिनाथस्तवनम्

(अनुष्टुप्)

नेमिनाथ ! त्वया विश्वं निमज्जद् भवसागरे ।
अनाथं दुःखितं मत्वाऽऽवि ज्ञातसमवस्तुना ॥ १

प्रभो ! मदतमोमायालोभकोपभयोज्झितः ।
मम त्राणाय मोहारेरुदासीनस्त्वमन्वहम् ॥ २

दृढानामपि निर्मूलोन्मूलनं कर्म्मशाखिनाम् ।
लीलयाऽकृत कन्दर्पदर्पनाश ! जवाद् भवान् ॥ ३

त्वयि यस्तनुते भक्तिं शश्वद् देहि शमालय ! ।
भवभीतिहर ! त्रातस्तस्य शस्यसुखं विभो ! ॥ ४

नाऽऽत मोहं ससार श्रीदायकं जिननायकम् ।
दुर्गति त्वामरं नत्वा मदनाऽशमवर्ज्जितः ॥ ५

## २३. श्रीपार्श्वनाथस्तवनम्

(अनुष्टुप्)

पार्श्वेन नाऽऽवि को यक्षपार्श्वेन नतविघ्नतः ।
पार्श्वेन भीवने रम्यपार्श्वेनाऽभात् त्वया जगत् ॥ १

वामेय ! शिवपूर्मार्गे वामे यस्त्वयि सन्नतः ।
वामेय ! तं नरं सद्योऽवामेयगुण ! विघ्नतः ॥ २

भावतस्तव यो ज्ञातभाव ! तत्त्वरत ! क्रमौ ।
भावतः स्तौति तं रक्षाऽभावतस्तापतः क्षणात् ॥ ३

कान्तारङ्गादहोऽमोह ! कां तारं न प्रजामपाः ।
कान्ताऽरं कस्य चारित्रकान्तारं नाकृथाः प्रियम् ॥ ४

महानन्दप्रदा भातु महानन्द ! तवाऽश्रिते ।
महानन्दरमा भूरिमहानन्दसुरागिताम् ॥ ५

## २४. श्रीवीरजिनस्तवनम्

(अनुष्टुप्)

वर्द्धमानजिनेश ! श्रीवर्द्धमान ! न मुक्तये ।
कामरागसुधीरत्वाऽकामराग ! प्रजाऽस्तु ते ॥ १

पापदावपयोनाथ ! पापदाव ! रमास्पद ! ।
भवतारण ! को नाऽऽवि भवता रणदुर्गतेः ॥ २

तारतार ! भवाम्भोधितारतारमया श्रिता ।
जनता या मदध्वंसेऽज नता याऽमद ! त्वयि ॥ ३

हतमोह ! निरस्ताऽऽरेह तमोह ! कदाचन ।
मा या मम हृदो विश्वेऽमायाऽमम ! जिनोत्तम ! ॥ ४

क्षमादरमिताऽनीते ! क्षमाऽदर तमाश्रयेत् ।
मा नवस्तवमानन्दाद् मानवस्तव यो व्यधात् ॥ ५

## २५. श्रीसाधारणजिनस्तवनम्

(अनुष्टुप्)

जिनेन्द्र ! तव पादान्तेऽभिपन्नः पतितोऽस्म्यहम् ।
पोस्फुरीति कृपाऽपन्ने यस्य ते पार्श्ववर्त्तिनि ॥ १

रागादिनाहलैः स्वामिन् ! पीडितोऽहं निरन्तरम् ।
किं प्रेष्यस्य व्यथा युक्ता समर्थे सति भर्तरि ॥ २

संसारे पर्यटन् नाथ ! त्वां विना दुःखितोऽभवम् ।
अतोऽहं संश्रये देव ! भवन्तं प्रभुमाभवम् ॥ ३

औदासीन्यं कथं युक्तं सेवके सापदि प्रभोः ।
सन्दानितोऽस्मि कामादिदस्युभिर्निर्भरं यतः ॥ ४

आभवं मम नाथस्त्वमस्म्यहं तव सेवकः ।
भगवन्निति विज्ञप्तिं सफलीकुरु मे प्रभो ! ॥ ५

## २६. श्रीसीमन्धरजिनस्तवनम्

(अनुष्टुप्)

सीमन्धरं जिनाधीशं नम्राखण्डलमण्डलम् ।
शुभज्ञानरमाकेलिमन्दिरं नौमि सादरम् ॥ १

ये त्वां पश्यन्ति ते धन्यास्ते श्लाघ्याः पूजयन्ति ये ।
ते दक्षा ये निषेवन्ति नराः सीमन्धरप्रभो ! ॥ २

लोककोकावलीहेलिराधिव्याधितमोहरः ।
विश्वकल्पितकल्पद्रुश्चिरं जीया जिनोत्तम ! ॥ ३

संसारभीमकान्तारेऽनङ्गरागादितस्करैः ।
भ्रमन्तं पीड्यमानं मां रक्ष रक्ष दयानिधे ! ॥ ४

किं विनीतैर्दिवोभोगैरलं मन्त्रैरलं गजैः ।
कृतं कल्पद्रुणा नाथ ! शासनं तेऽस्तु मेऽनिशम् ॥ ५

## २७. श्रीविंशतिविहरमानजिनस्तवनम्

(अनुष्टुप्)

वन्दे सीमन्धरं देवं युगन्धरं जिनेश्वरम् ।
बाहुं त्रैलोक्यनेतारं सुबाहुं पुरुषोत्तमम् ॥ १

सुजातं नौमि सज्जातं स्वयम्प्रभं रविप्रभम् ।
वृषभाननमानौम्यनन्तवीर्यं जिनोत्तमम् ॥ २

विशालं श्रीलतासारं सूरप्रभं जगत्प्रभुम् ।
वज्रधरं धराधारं नुत चन्द्राननं जिनम् ॥ ३

चन्द्रबाहुं लसद्बाहुं भुजङ्गं भुवनाधिपम् ।
ईश्वरं श्रीश्वराराध्यं नेमिप्रभप्रभुं स्तुमः ॥ ४

वीरसेनजिनो जीयान्महाभद्रः सुभद्रकृत् ।
चिरं देवयशादेवोऽजितवीर्यो जिताहितः ॥ ५

## २८. श्रीसप्ततिशतजिनस्तवनम्

(अनुष्टुप्)

षष्ट्या युतं शतं वन्दे जिनानां ज्ञानशालिनाम् ।
मुदा सर्वविदेहान्तमहाविजयसम्भवम् ॥ १

भरतैरवतोद्भूताः पञ्च पञ्च जिनोत्तमाः ।
जयन्तु जगदानन्दकारिणः पापवारिणः ॥ २

नमतोत्कृष्टकाले श्रीनिदानं वन्द्यमर्हताम् ।
समस्तक्षेत्रजातानां सप्तत्या संयुतं शतम् ॥ ३

प्रसीदन्तु सदा मह्यं जिनाः ! मुक्तिप्रदानतः ।
किं कल्पपादपाः क्वापि प्राप्ताः प्रयान्ति मोघताम् ॥ ४

मुक्तिश्रीसङ्गमोत्कोऽहं शतं सप्ततिसंयुतम् ।
रक्ताङ्कतालमेघेशस्वर्णवर्णान् स्तुवेऽर्हतः ॥ ५

## २९. श्रीत्रिकालजिनस्तवनम्

(अनुष्टुप्)

येऽतीता वर्त्तमाना ये भाविनो ये महीतले ।
सर्वे श्रीजिनपाः पान्तु माममी भववारिधेः ॥ १

तदीयो गोष्पदीभूयादपारो भवसागरः ।
वसन्ति मानसे येषां जिना हंसा इवानिशम् ॥ २

संसारकुहरे पातो भविता न कदाचन ।
तेषामार्हतपादानां ये सदा भक्तिकारिणः ॥ ३

भवनीरधिशोषस्तैरकारि तरसा ध्रुवम् ।
एकशोऽपि जिना येषां दृष्टिगोचरमाश्रिताः ॥ ४

संसारकूपगे श्वभ्रे जैना दीप्रनखांशवः ।
भवन्तु पततो रज्जुवदालम्बनदा मम ॥ ५

## ३०. श्रीशाश्वतजिनस्तवनम्

(अनुष्टुप्)

शाश्वतं तीर्थनाथानां त्रिसन्ध्यं नौमि भावतः ।
चक्रवालं भवव्यालं हन्तुं शाश्वतशर्मदम् ॥ १

तारामण्डलमध्ये याः सन्ति यास्ताविषस्थिताः ।
पातालाभरणीभूता याः सन्ति सर्वकामदाः ॥ २

द्वीपे नन्दीश्वरे मेरुनगेषु रुचकादिषु ।
वैताढ्येषु धरारामाकर्णकुण्डलकुण्डले ॥ ३

याः स्थिताः सर्वदा जैनीः शाश्वतीः प्रतिमा मुदा ।
श्रुतानुसारतः स्मारं स्मारं ध्यायामि ताः सदा ॥ (त्रिभि.) ४

नाम्ना श्रीऋषभो देवो वर्द्धमानो जिनेश्वरः ।
चन्द्राननजगन्नाथो वारिषेणजिनः श्रिये ॥ ५

## ३१. श्रीशाश्वताशाश्वतजिनस्तवनम्

(अनुष्टुप्)

नामाऽऽकृतिद्रव्यभावैः पुनतस्त्रिजगज्जनम् ।
शाश्वताशाश्वतानाप्तानर्हतः स्तुतिमानये ॥ १

यत्र क्षेत्रे च देशे च काले च सम्भवोऽर्हताम् ।
तत्र ते स्वामिनः सर्वे जयन्तु जयकारिणः ॥ २

क्षेत्राणि तानि शस्यानि ते देशाः शुभशालिनः ।
स कालोऽपि पवित्रश्च यत्र तीर्थकृतां जनुः ॥ ३

सफलं मानुषं जन्म तेषां ये जिनसेवकाः ।
श्रीः शुभा सैव या जैनसद्मादौ व्ययमायते ॥ ४

सर्वे तीर्थकृतोऽशेषसम्पदानन्ददायिनः ।
तिष्ठन्तु सर्वदा चित्ते मदीये मदवर्जिते ॥ ५

## ३२. श्रीशत्रुञ्जयतीर्थस्तवनम्

(अनुष्टुप्)

आदिनाथ ! जगन्नाथ ! विमलाचलमण्डन ! ।
जय नाभिकुलाऽकाशप्रकाशनदिवाकर ! ॥ १

तव देव ! पदाम्भोजसेवाऽति दुर्लभा भवे ।
पुण्यसम्भारहीनानां कल्पवल्लीव देहिनाम् ॥ २

ते धन्या मानवा देवा यैरापि तव शासनम् ।
वन्दनीया विभो ! ते ये वन्दन्ते भवतः पदौ ॥ ३

प्रचण्डतमरागादिरिपुसन्ततिघातकम् ।
श्रीयुगादिजिनाधीशं देवं वन्दे मुदा सदा ॥ ४

श्रीशत्रुञ्जयकोटीर ! कृतं राज्यश्रिया प्रभो ! ।
सर्वाघनाशनं मेऽस्तु शासनं ते भवे भवे ॥ ५

## ३३. श्रीगिरिनारतीर्थस्तवनम्

(अनुष्टुप्)

श्रीउज्जयन्तशैलेशतुङ्गशृङ्गविभूषण ! ।
श्रीमन् ! नेमिजिनाधीश ! जय श्रीकेलिमन्दिर ! ॥ १

दृष्टः पुण्येन येन त्वं दुर्लभोऽपि मया भवे ।
दर्शनेन स्वकीयेन तत् पुषाण ममाधुना ॥ २

कन्दर्पमत्तमातङ्गघातसिंहोपमाय ते ।
नमोऽस्तु जगदानन्दकारिणेऽघनिवारिणे ॥ ३

त्वं माता त्वं पिता देव ! त्वं दाता जगदीश ! मे ।
भवाम्भोधौ पतन्तं मां पाहि पाहि कृपानिधे ! ॥ ४

सृतं देवतया देव ! सृतं मानुषकैः सुखैः ।
श्रीनेमे ! सततं मेऽस्तु सुलभं तव दर्शनम् ॥ ५

## ३४. श्रीअर्बुदगिरितीर्थस्तवनम्

(अनुष्टुप्)

अर्बुदाद्रौ युगादीशं रिरीमूर्त्तियुतं स्तुमः ।
नेमिं च प्रतिमाः सर्वाः प्रासादत्रयसंश्रिता ॥ १

धन्योऽसौ विमलो मन्त्री वस्तुपालोऽपि मन्त्रिराट् ।
यद्धर्मकीर्त्तने स्थाने ईदृशे विषमे गिरौ ॥ २

श्लाघ्यौ नरोत्तमावेतौ ययोः पद्मा कलावपि ।
प्रासादप्रतिमाद्यथ प्रशस्यव्ययमाश्रयत् ॥ (युग्मम्) ३

ऋषभाद्या जिनाः सर्वे विरहं निजपादयोः ।
मम मा ददतामीशाः सेवके कृतवत्सलाः ॥ ४

अर्बुदोऽयं नगाधीशो जीयाच्चिरमिलातले ।
प्रासादैर्योऽसमैर्जैनैरभ्रंलिहैः पवित्रितः ॥ ५

## ३५. श्रीस्तम्भनजिनस्तवनम्

(अनुष्टुप्)

स्तुवे श्रीस्तम्भनाम्भोजराजहंससमं जिनम् ।
श्रीपार्श्वमिष्टदं सर्वविघ्नसङ्घातघातकम् ॥ १

श्रीदश्चिन्तामणिः कल्पपादपः कामदोऽघटः ।
न दाता त्वत्समो मुक्तिचङ्गश्रीसङ्गकारक ! ॥ २

न रोगो न च सम्मोहो न शोको न च साध्वसम् ।
न दुःखं न च दारिद्र्यमलं स्थातुं नते त्वयि ॥ ३

तव प्रभावतः स्वामिन् ! कलिकालो विनश्वरः ।
जज्ञे कृतयुगाश्लेष इव लोकोऽपि वैभवात् ॥ ४

जय श्रीस्तम्भनाधीश ! श्रीपार्श्व ! पुरुषोत्तम ! ।
चूरयन्नघसङ्घातं पूरयन् नरवाञ्छितम् ॥ ५

## ३६. श्रीअष्टापदतीर्थस्तवनम्

(अनुष्टुप्)

अष्टापदनगोत्तंसान् वृषभादिजिनेश्वरान् ।
मानवर्णजुषो वन्दे चतुर्विंशतिमादरात् ॥ १

अहो भाग्यमहो पुण्यं तेषामद्भुतमङ्गिनाम् ।
येषामष्टापदे देवान् नन्तुं शक्तिः पटीयसी ॥ २

धन्योऽसौ भरतश्चक्री सौवर्णं जिनमन्दिरम् ।
गिरावष्टापदे येन कारितं प्रतिमान्वितम् ॥ ३

इहस्था अपि ये तत्र धृत्वा चित्ते जिनोत्तमान् ।
वन्दन्ते सर्वदा तेषां मुक्तिश्रीर्वशवर्त्तिनी ॥ ४

एवं भक्त्या स्तुता मह्यं जिनेन्द्रा ऋषभादयः ।
बोधिलाभं प्रयच्छन्तु संसारे तिष्ठते सदा ॥ ५

## ३७. श्रीसम्मेतशिखरतीर्थस्तवनम्

(अनुष्टुप्)

यस्मिन्नजितनाथादिपार्श्वान्ता विंशतिर्जिनाः ।
सिद्धाः सम्मेतशैलाख्यं तीर्थं तं नौमि भक्तितः ॥ १

दातारः शिवसौख्यानां त्रातारो जगतामिनाः ।
सम्मेतगिरिशृङ्गाराः पान्तु वो भवतो जिनाः ॥ २

शैलोऽयं शिखरोऽशेषनगानां सपरिच्छदाः ।
यत्रानशनमादाय जिनेशा लेभिरे शिवम् ॥ ३

दूरस्थेनापि येनेदं वन्द्यते भावतोऽनिशम् ।
तीर्थं शक्रार्चितं तेन प्राप्यते परमं पदम् ॥ ४

भावतो वन्दिता भव्यैः सर्वज्ञा अजितादयः ।
कैवल्यं ददतां सर्वे सर्वदा सर्वदर्शिनः ॥ ५

पू.आ.सहस्रावधानिश्री मुनिसुन्दरसूरिविरचितानि

# ११. ॥ चतुर्विंशतिजिनस्तोत्राणि ॥

## ( त्रुटित )

### १. श्रीअभिनन्दनजिनस्तोत्ररत्नम्

........ चापलम्, त्वया जिनेन्दो ! मनसः समन्ततः ।
ममापि तद्दोषमिमं हरेति यं, कपिर्भजन्नर्थयतेऽङ्कदम्भतः ॥ ५
(वंशस्थ)

न नाममात्रेण बभूव सिद्धार्थेति प्रसिद्धा जननी यदीया ।
पुमर्थसीमाऽव्ययशर्मलाभात्,
तत्त्वार्थतोऽपि त्ववताज्जिनोऽयम् ॥ (उपजातिः) ६

न दैवतानां मितिरत्र वर्त्तते,
य एव तु स्तोत्रममीषु चार्हति ।
अभीष्टदानाव्यभिचारनिर्णयात्,
तमाभवं श्रीअभिनन्दनं स्तवैः ॥ (वंशस्थ) ७

महर्षयो यस्य गुणाननेकशो,
मुदा स्तुवन्तः समतां ययुः प्रभोः ।
विभिद्य सद्यो ममतां स सर्वतो,
ददातु देवो मम तां प्रणेमुषः ॥ (वंशस्थ) ८

एवं श्रीअभिनन्दनं जिनपतिं यः संस्तुते कालिका-
यक्षेशाश्रमसेवितांह्रिकमलं कल्याणमालालयम् ।
शक्रालीमुनिसुन्दरस्तुतिततीरर्हन्नदृष्टद्विषो,
जित्वा स्यादचिरात्पदं स सुकृती सर्वेष्टसौख्यश्रियाम् ॥ ९ ॥
(शार्दूल.)

## २. श्रीसुमतिजिनस्तोत्ररत्नम्

(वैतालीय)

सुमतिस्तनुतां जयश्रियं, मम भावद्विषतो जिगीषतः ।
कुमतानि विहाय यं भजन्, लभते भव्यजनोऽर्थिताः श्रियः ॥ १

भुवनाधिप ! मेघजोऽप्यसि, स्तुतिभाजः खलु मेऽघहृद् यतः ।
जनयस्यपि मङ्गलात्मजः, सततं त्वं विपुलं च मङ्गलम् ॥ २

इति ते स्तवने कथं यते, न जडोऽपि स्वधियोऽनुसारतः ।
सुखलभ्यशुभात्मसत्फले, नहि मन्दोऽप्यलसो हि कर्मणि ॥ ३

कलितोऽपि शिवश्रिया प्रभो !, दधसे क्वापि न भैरवाकृतिम् ।
भजसे जिन ! सर्वमङ्गला-श्रितरूपोऽपि सनातनस्थितिम् ॥ ४

शिवसूर्न कुमारतां श्रितो, दधसे क्रौञ्चमथाङ्कसङ्गतम् ।
जिन ! तारकमित्रतां भजन्,
जगति स्वामितया श्रुतोऽद्भुतम् ॥ (युग्मम्) ५

चरणौ तव बिभ्यतां भवा-च्छरणं यौ जिन ! वज्रिणामपि ।
हृदि तौ मम तिष्ठतां स्थिरा-वियता नाथ ! लभे कृतार्थताम् ॥६

यदि ते कुशलाभिलाषुकं, यदिवा क्लेशभयातुरं मनः ।
जनते ! सुमतिं प्रपद्य तज्जिनराजं सुमतिं प्रभुं भज ॥ ७

भगवन् सुमते ! प्रसीद मे, स्वमते देहि मतेः स्थिरां स्थितिम् ।
भवते विमतेर्जयश्रिया, सुखमेषोऽपि जनः शिवस्य यन् ॥ ८

एवं भासुरभक्तितुम्बरुमहाकालीसमासेवितं,
यत्तीर्थाधिपतिं स्तवीति सुमतिं कल्याणमालालयम् ।

शक्रालीमुनिसुन्दरस्तुतिततीरर्हन्नदृष्टद्विषो,
जित्वा स्यादचिरात्पदं स सुकृती सर्वेष्टसौख्यश्रियाम् ॥ ९
(शार्दूलवि.)

## ३. श्रीपद्मप्रभजिनस्तोत्ररत्नम्

(उपजातिः)

जगत्त्रयीजित्वरमोहशत्रु-
जयश्रिया प्राप परं पदं यः ।
पद्मप्रभं पद्मतलोपमाक्षं,
स्तुवे तमर्हन्तमनन्तपद्मम् ॥ १

स सान्वयं नाम निजं ततान,
धरः पिता ते जिन ! जन्मकाले !
यथेष्टदानैर्धरति स्म सद्यो,
दारिद्र्यकूपे निपतज्जगद्यः ॥ २

मात्रेकसीमानमवाप्य सापि,
माता सुसीमा तव सान्वयाऽभूत् ।
जगत्त्रयत्राणविधौ नदीष्णु-
मजीजनद्या भुवनोत्तमं त्वम् ॥ ३

शिरस्त्विदं बिभ्रतु वासवाद्याः,
सूर्यः करे श्रीः कुरुतां गृहं वा ।
तथापि मुक्तिस्तव सेवयैवे-
त्यङ्कं मिषत्त्वां किल सेवतेऽब्जम् ॥ ४

जनुर्जराऽन्तादिभयोर्मिकीर्णे,
भवाम्बुराशौ पतितो बिभेमि ।
ततो निजाज्ञातरणिं प्रदाय,
प्रसद्य नेतः ! कुरु निर्भयं माम् ॥ ५

दत्से स्वभक्तौ स्थिरचेतसां त्वं,
समीहितार्थान् जिनराज ! जाने ।
स्पृहाऽस्ति सौख्येषु न चेतसस्तु,
स्थिरत्वमस्यां मम तत् कथं स्याम् ? ॥ ६

स्वदोषतप्तो बहुधा विकल्पै-
रिति प्रभो ! व्यग्रमनाः स नाऽस्मि ।
कमप्युपायं शरणागतं तत्,
प्रशाधि मां येन लभेऽर्थिताऽर्थान् ॥ ७

अथवाऽल्पमपि स्तुतोऽर्थिनां,
ददसेऽभीप्सितसाधनान्यपि ।
तददृष्टजयाश्रियोऽप्यहं, जिन !
मोदे कृतवानिति स्तुतिम् ॥ (वैतालीय) ८

इत्थं यो महिमाम्बुराशि-कुसुमश्यामानिषेव्यं स्तुते,
श्रीपद्मप्रभतीर्थनाथममलं कल्याणमालालयम् ।
शक्रालीमुनिसुन्दरस्तुतिततीरर्हन्नदृष्टद्विषो,
जित्वा स्यादचिरात्पदं स सुकृति सर्वेष्टसौख्यश्रियाम् ॥ ९
(शार्दूल.)

## ४. श्रीसुपार्श्वजिनस्तोत्ररत्नम्

(उपजातिः)

सुपार्श्वनेतर्भगवन् ! जयश्री-
महःसुखज्ञानशिवप्रदायिन् ! ।
स मे सहर्षं त्रिदशेन्द्रवृन्द-
स्तुतक्रमाम्भोरुह ! वाञ्छिताप्त्यै ॥ १

मातङ्गयक्षः कुशलानि यस्य,
पदौ श्रितानां भविनां तनोति ।
शान्ता प्रशान्तिं सकलापदां च,
भजे सुपार्श्वं त्रिजगत्प्रभुं तम् ॥ २

बभार पृथ्वीतनयोऽपि यो वपुः,
सुवर्णकान्ति प्रभुरार्जवं सदा ।
ज्ञमित्रतां निश्चलतां च खातिगः,
सुपार्श्वदेवं तमुपैमि निर्भवम् ॥ (वंशस्थ) ३

प्रभुः प्रतिष्ठात्मजतां श्रितोपि यः,
शुभप्रतिष्ठोद्भवकृत् प्रणेमुषाम् ।
स निष्ठितार्थो हृदि तिष्ठतान् मम,
प्रथिष्ठरत्नत्रयनिष्ठतां ददत् ॥ (वंशस्थ) ४

इमौ जिनस्याखिलमङ्गलावलौ,
धत्तः प्रभुत्वं सकलार्थितप्रदौ ।
वदन्निीतीवाऽङ्कमिषात् तव क्रमौ,
निषेवते स्वस्तिक एष बोधिदः ॥ ५

सुखानि सर्वाण्यतिशेरते ध्रुवं,
विभो ! गरिम्णा शिवशर्मसम्पदः ।
इमास्त्वदाज्ञैव तनोति चादृता,
बुधास्त्वदन्यं कथमाश्रयन्ति तत् ? ॥ (वंशस्थ) ६

असांवृतब्रह्मविवर्त्तवैभवं,
विधेयवैधुर्यविवर्जितं तव ।
निरूप्यते यन्मुनिभिर्निरावृत्ति,
स्वरूपमिच्छाम्यधिगन्तुमीश ! तत् ॥ (वंशस्थ) ७

अनन्तकालं भ्रमता ततो भवे,
मयाऽसि नातः शरणीकृतोऽधुना ।
सुपार्श्व ! मोहारिजयश्रियोज्ज्वलं,
निजस्वरूपादपृथक् कुरुष्व माम् ॥ (वंशस्थ) ८

स्तुतिमिति मतिमांस्तनोति यस्ते,
भुवनविभोऽर्थितदायिनीं सुपार्श्व ! ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाद्वयोऽचिरात् स्यात् ॥ (औपच्छन्दसिक) ९

## ५. श्रीचन्द्रप्रभजिनस्तोत्ररत्नम्

(उपजातिः)

वपुस्त्विषा प्राप्य विधोर्ध्रुवं यो,
जयश्रियं स्वांह्रियुगस्य नित्यम् ।
चकार तं सेवकमङ्कदम्भा-
च्चन्द्रप्रभं श्रीजिनमेनमीडे ॥ १

स्वदेहदीप्तिप्रचयेन शुक्ल-
ध्यानाह्वयज्योतिष आन्तरस्य ।
यो वर्णिकां दर्शयते प्रबुद्धां-
स्तदेव देयात् स जिनोऽष्टमो मे ॥ २

पीतोऽस्मि गर्भाऽवतरेऽस्य मात्रे-
त्यथोऽपि मां मा स्म पिबत् कदाचित् ।
इतीव भीत्यांऽह्रियुगं यदीयं,
विधुर्भजत्येष जिनोऽवतान्माम् ॥ ३

नित्यं यदंह्रिद्वयसेवयाऽऽप्त-
पुण्येन मन्ये सततं सितांशुः ।
वक्रोऽपि मौलौ ध्रियते हरेण,
स चन्द्रलक्ष्मा क्षिपतादघं मे ॥ ४

सेव्योऽपि नाथः सततं भ्रुकुट्या,
नादर्शयद्यो भृकुटिं कदाचित् ।
एकेन नित्यं विजयेन युक्तोऽ-
प्यनन्तसङ्ख्यान् विजयाँश्च दत्ते ॥ ५

स लक्ष्मणायास्तनयो नयेन,
कुतीर्थिकानां प्रहरन् मदौघान् ।
शिवश्रिये श्रीमहसेनवंश-
रविश्छविद्योतितदिङ्मुखोऽस्तु ॥ ६

धत्ते पदं यो गिरिशस्य मौलौ,
नेत्रे हरेर्वोदितमात्रपूज्यः ।

भुक्तेः प्रदाता द्युसदां स चन्द्रो,
यस्यांह्रिभाग् वक्ति जगत्प्रभुत्वम् ॥ ७

स तीर्थनेता विनुतो मयाऽपि,
चन्द्रप्रभो वासववृन्दवन्द्यः ।
देयादमेयं मम निर्गुणस्या-
प्यपारकारुण्यनिधिः सुखौघम् ॥ ८

स्तुतिमिति मतिमाँस्तनोति यस्ते,
भुवनविभोऽष्टमतीर्थनाथ ! सम्यग् ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाद्वयोऽचिरात् स्यात् ॥ (औपच्छन्दसिक) ९

## ६. श्रीसुविधिजिनस्तोत्ररत्नम्

(वैतालीय)

यदि वाञ्छथ शर्म शाश्वतं, जनताः कर्मजयश्रियोज्ज्वलम् ।
स्तुत तत् सुविधिं जिनं यतः, सदुपायः सदुपेयसिद्धये ॥ १

सुविधे ! सततं प्रमत्तता-कलुषत्वेऽपि शिवाभिलाषिणि ।
करुणा क्रियतां तथा मयी-हितमेषोऽप्यचिराल्लभे यथा ॥ २

जननीं तव तां प्रणौम्यहं, जिन ! रामेत्यभिरामनामिकाम् ।
त्वयि गर्भगतेऽपि ते गुणा-नभजद्या सुविधिक्रियादिकान् ॥ ३

त्वयि भक्ततया सुतारका, जिनराजाऽजितयक्षराडपि ।
तव शासनभासनोद्यतौ, परिपातः सततं त्वदाश्रितान् ॥ ४

मकराङ्कित ! सेवते ध्वजा-नुमितोऽनङ्गभटः पदौ नु ते ।
भवघातनशक्तिवाञ्छया, विनिहन्तुं निजवैरिणं भवम् ॥ ५

अतिथिः स्वमनोगृहे चिरं, जिन ! सुग्रीवज ! यैर्निबध्यसे ।
कुरुषे गतबन्धनानिमाँश्चरितं तेन शमिँस्तवाद्भुतम् ॥ ६

यदचिन्त्यमनन्तमव्ययं, परमैर्योगिभिरर्थ्यते सुखम् ।
जिन ! यत्र तदेव वेतनं,करवै तत् खलु दास्यमेव ते ॥ ७

न भवारिजयश्रियः परं, फलमीहेत कृती तव स्तवात् ।
इयमेव तव प्रसादतो, भवतात् तात ! ममाचिरेण तत् ॥ ८

स्तुतिमिति मतिमाँस्तनोति यस्ते,
सुविधिविभोऽखिलवाञ्छितार्थदात्रीम् ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाद्वयोऽचिरात् स्यात् ॥ (औप.) ९

## ७. श्रीशीतलजिनस्तोत्ररत्नम्

(रथोद्धता)

शीतलोऽपि हिमवद् भवद्विषो,मोहकक्षमदहज्जयश्रिये ।
यः शिवाध्वसुगमीकृतीच्छया, तं स्तुवे जिनवरं जगद्गुरुम् ॥ १

केवलं दृढरथः पिता न ते, निर्वृतिपुरे स्वमेयुषाम् ।
ज्ञानदर्शनचरित्रवर्णना-प्रापणे दृढरथस्त्वमप्यसि ॥ २

नन्दया यदि विभो ! तवाम्बया,
गर्भगे त्वयि पितुः क्षतः क्षणात् ।
गाढदाहदहनस्त्वया ततो, दुःखदाहदहने किमद्भुतम् ? ॥ ३

यक्षिणी तरुवरश्च सेवया, प्राप केवलमशोकतां न ते ।
उद्भवां हतिविहारदेशना-दर्शनैस्त्रिजगतीजनोऽपि तु ॥ ४

ब्रह्मयक्षपरिषेवितक्रमं, शीतलं त्रिजगतीसुरद्रुमम् ।
संस्मरन्नपि जनोऽश्नुतेऽर्थितं,
क्लिश्यते किमु ततः क्रियान्तरे ? ॥ ५

शीतलेशपदपङ्कजं हृदि, स्थापयन्नमलभक्तितो जनः ।
कृत्रिमेतरविपद्गणोद्भवं, सर्वतापनिचयं नयेत् क्षयम् ॥ ६

शिश्रियुर्विविधदेवतान्तरा-
णीश ! येऽपि शिवसम्पदिच्छया ।
तैरपि त्वमधिपः श्रयिष्यते,
नापरोऽस्ति हि शिवार्थिनां पथः ॥ ७

श्रीवत्सलाञ्छनजिनेश ! जगन्नमस्य !,
स्तोत्रस्य कोपि महिमा तव सोऽस्त्यचिन्त्यः ।
यत्सम्भवं फलमशेषफलातिशायि,
स्यात्तद् व्यधामिममितीदृशमस्तु तन्मे ॥ (वसन्ततिलका) ८

स्तुतिमिति मतिमाँस्तनोति यस्ते,
जिनवर! शीतलनाथ ! विश्वतायिन् ! ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाढ्योऽचिरात् स्यात् ॥ (औप०)९

## ८. श्रीश्रेयांसजिनस्तोत्ररत्नम्

(उपजातिः)

श्रेयांसनेतुः स्तवनेन मोह-
जयश्रियं हस्तगतां विदध्याम् ।

त्रिलोकजैत्रौजसि मोहशत्रौ,
जिते हि जेयं नहि किञ्चिदस्ति ॥ १

माता पिता वा तव विष्णुरस्तु,
श्लाघापदं यन्नुतिरर्थिताप्त्यै ।
देवान्तरं तद्गुणमुक्तमन्ये(न्यं),
विष्ण्वन्तरं नाथ ! खपुष्पतुल्यम् ॥ २

श्रेयांसभक्त्या मनुजं कृतार्थं,
स्तवीमि यक्षेष्वहमीश्वरं वा ।
सा मानवी कस्य न माननीया ?,
श्रेयोऽर्थिनी श्रेयसि याऽतिभक्ता ॥ ३

आजन्महिंस्रा अपि सेवया ते,
पापैर्विमुक्ताः पशवोऽपि हि स्युः ।
एवं निबुध्येव तवांह्रिपीठं,
निषेवते चिह्नमिषेण खड्गी ॥ ४

त्वत्पादसंस्पर्शपवित्रितानि,
रसायनाभानि रजांस्यपीश ! ।
वन्द्यानि शक्रोपमऋद्धयोपि,
त्वदंह्रिसेवाविमुखास्तु निन्द्याः ॥ ६

संसारनैर्गुण्यमपीन्द्रियाणां,
दुरन्ततां वेद्मि जिनागमात्ते ।
ठकैः प्रमादैर्वशतां तु तेषां,
नीये तदेतान् हर नाथ ! मेऽरीन् ॥ ७

इति स्तुतस्तीर्थपतिर्मयाऽपि,
श्रेयांसनामा पुरुहूतपूज्यः ।
भीतं द्विधा वैरिगणात् प्रसह्य,
क्रियात् सदा निर्भयशर्मकर्म ॥ ८

स्तुतिमिति मतिमांस्तनोति यस्ते,
भुवनविभोऽखिलवाञ्छितार्थदात्रीम् ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाद्वयोऽचिरात् स्यात् ॥ (औप०) ९

## ९. श्रीवासुपूज्यजिनस्तोत्ररत्नम्

(रथोद्धता)

सर्वदैत्यविजयश्रियोज्ज्वलो, यं मरुत्पतिरभीक्ष्णमार्चयन् ।
सर्वकालमतिभक्तितः प्रभुं, तं स्तवीमि वसुपूज्यभूपजम् ॥ १

नो गुणैश्च न च रूपसम्पदा, वर्त्तते त्रिभुवने तवोपमा ।
नो मणीभिरथवा महत्त्वतः, सागरस्य हि समो जलाशयः ॥ २

अर्जितं चिरकृतान्तसेवया, पातकं क्षपयितुं तु सैरिभः ।
सर्वपापहरमीश ! ते श्रित-स्तीर्थमंह्रियुगमङ्कदम्भतः ॥ ३

श्रीजयाङ्गज ! कुमारसेवितं, चण्डया सततमर्चितं तव ।
योंऽह्रिपद्मयुगलं निषेवते, तं जगत्त्रयमिदं निषेवते ॥ ४

भीरु भीमविषयद्विषां गणान्न त्यजेच्चपलतां च मे मनः ।
तत्तथा निजगुणैर्नियन्त्र्यता-मेतदीश ! भवति स्थिरं यथा ॥ ५

रोषतोषरहितोऽसि चेत्तथाप्यर्थ्यसेऽभिरुचितं तनोषि च ।
ईदृशोऽपि हि सुरद्रुमोऽर्थितः प्रार्थितं प्रददतेऽर्थिनां फलम् ॥ ६

वासुपूज्य ! विहरन् यथा भुवि, त्वं हरस्यसुमतामुपद्रवान् ।
ध्यानशक्तिवशतो हृदि स्थितो,
विद्विषो मम हराऽऽन्तरांस्तथा ॥ ७

त्वां निरीक्ष्य बहुतर्क्कलोचनै-र्दैवतेषु परमं फलप्रदम् ।
एवमस्तवमशेषविद्विषा-मर्थये त्वविषयं पदं प्रभो ! ॥ ८

स्तुतिमिति मतिमाँस्तनोति यस्ते,
भुवनविभो ! जिनराज ! वासुपूज्य! ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाद्वयोऽचिरात् स्यात् ॥ (औप०) ९

## १०. श्रीविमलजिनस्तोत्ररत्नम्

(द्रुतविलम्बित)

विमलबोधमवाप्य जयश्रिया,
विषममोहरिपोः स्ववचोऽम्बुदैः ।
वृजिनपङ्कहृतेर्विमलीकृता-
ऽऽश्रितकुलं विमलं जिनमाश्रये ॥ १

यदि भयं भवतां भवतान्तितो,
भजत तत् कृतवर्मनृपाङ्गजम् ।
तदपहारविधौ हि बुधा मुधा,
भवगतापरदैवतसंश्रयः ॥ २

विषयमोहगुणाद्यनुचिन्तना-
चितमलं जलवज्जिन ! मे मनः ।
विमलतां नय हे विमलप्रभो !,
निजगुणोत्करकातकचूर्णतः ॥ ३

विमलिताः किल गर्भनिवासिना,
स्वजननीमतिदेहगुणास्त्वया ।
विमलितं च जगज् जिन ! केवलो-
दयजुषा किमु मां तदुपेक्षसे ? ॥ ४

परकुतर्कगणा भ्रमयन्ति ये,
सुखतते: स्पृहयालुतया जगत् ।
तव मते रमयन्ति मनस्विनो,
जिन ! त एव विचारितगोचराः ॥ ५

विषयगृध्नुवचोऽनुगचेतस-
स्त्वदुदिते न रतिं दधते जनाः ।
तदहि शूकरलाञ्छन ! नाद्भुतं,
जहति किं न सरोऽशुचिपा द्विकाः ? ॥ ६

पदजुषस्तव षण्मुखयक्षराड्,
जिन ! सुखाकुरुते विजयाऽपि च ।
तदिदमीयगुणानुगमीश ! मा-
मपि सुखाकुरुतामभितोऽपि तौ ॥ ७

चिरमनन्तभवभ्रमणार्दित-
स्तव पदौ शरणं समुपागमम् ।
विमलनाथ ! तथा कुरु मां यथा,
जिन ! भवाम्यचलामितशर्मभाक् ॥ ८

श्यामापि माता विमलीकृता स्वा-
ऽवस्थानतो येन जिनेन गर्भे ।

हृदि स्थितोऽयं विमलोऽघपङ्क-
हृतेर्दयाब्धिर्विमलीक्रियान् माम् ॥ (उपजाति) ९

स्तुतिमिति मतिमाँस्तनोति यस्ते,
विमलविभोऽखिलवाञ्छितार्थदात्रीम् ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाढ्योऽचिरात् स्यात् ॥ (औप०) १०

## ११. श्री अनन्तजिनस्तोत्ररत्नम्

(उपजातिः)

अनन्तसम्पत्प्रभवः स्तुतः स्या-दनन्तसंसारजयश्रिया यः ।
अनन्तगौरामितकान्तकीर्त्ति-मनन्तमर्हन्तमहं स्तुवे तम् ॥ १

तवावतारस्य विभो ! महिम्ना,
कथं न माता सुयशा भवेत् सा ? ।
गीतं सुरेन्द्रैरपि देव ! यस्या,
मुदा यशः पूरितदिग्वितानम् ॥ २

तव प्रभावाज्जनकस्य सेनां, सिंहोपमां शत्रुगणो ददर्श ।
मृगोपमं स्वं तु रणेषु मेने, स सिंहसेनः प्रथितस्ततोऽभूत् ॥ ३

पातालयक्षप्रभुणाऽङ्कुशाह्व-देव्या च ते रक्षितभक्तराशेः ।
सेवेत सर्वाघहरं तु तीर्थं, श्येनोऽङ्कमिट् पादयुगं स्वशुद्ध्यै ॥ ४

भ्रमन्ननन्तेषु भवेषु वैरि-पराभवैरेव भृतोऽस्मि देव ! ।
प्रभुस्त्रिलोक्या अपि रक्षणेऽसि,
स्वमाश्रितं तत् किमुपेक्षमे माम् ? ॥ ५

जगत्सतत्त्वानि विचार्य लेभे, दुःखक्षयायौपयिकं मयैकम् ।
त्वय्येव नाथत्वधियो निवेश-
स्ततोऽपि नाद्यापि कथं सुखी स्याम् ? ॥ ६

आशक्रकीटं विविधोच्चनीच-भवोद्भवान्तादिकदर्थनासु ।
पराक्रमो यस्य समो विमोह-
रिपोस्त्वमेवाऽस्य जिनाऽसि जेता ॥ ७

ततो भियाऽस्माच्छरणं श्रितोऽस्मि, पदौ तवैवाहमनन्तनेतः ! ।
अतस्तथा द्राक् कुरु निर्भयं मां,
यथा परानन्दमयः सदा स्याम् ॥ ८

स्तुतिमिति मतिमाँस्तनोति यस्ते-
ऽखिलरिपुजैत्रगुणामनन्तनेतः ! ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाढ्योऽचिरात् स्यात् ॥ (औप०) ९

## १२. श्रीधर्मजिनस्तोत्ररत्नम्

(शालिनी)

स श्रीधर्म ! त्वं जय श्रीजिनेन्दो !,
श्रेयः सर्वं संस्तुतिर्यस्य दत्ते ।
तस्मादेतां कुर्वते सर्वशक्त्या,
देवेन्द्राद्या योगिनश्चाप्यशेषाः ॥ १

पास्येवाऽन्ताद्यापदो नाथ ! विश्वं,
नीलं वासः क्रूरतां मन्दतां वा ।
खभ्रान्तिं वा नैव धत्से कदाचित्,
ख्यातश्चित्रं भानुसूनुस्तथापि ॥ २

भक्तिं धत्ते यः सुते सुव्रताया-
स्तस्मिन् भक्ता स्यात्त्रिलोक्यप्यजस्रम् ।
द्वेषं तस्मिन् यश्च कुर्यात्कदापि,
द्विष्टाः सर्वाः सम्पदोऽस्मिन् सदापि ॥ ३

कन्दर्प्पार्च्यं किन्नरोपासनीयं,
विश्वेशं योऽन्यानुवृत्त्यादिनाऽपि ।
श्रीमद्धर्मं वन्दते वन्दते तं,
मर्त्यामर्त्याधीश्वराली क्रमेण ॥ ४

मन्ये विश्वप्राणिनां संश्रितानां,
दुर्निर्भेदादृष्टभूभृद्‌गणानाम् ।
भेदार्थं यो वज्रमङ्कच्छलेना-
जस्रं धत्ते धर्मनाथं श्रये तम् ॥ ५

नार्हंस्तेषां विश्वजैत्रोर्जितेभ्यो,
रागादिभ्यश्चेतसां भीर्द्विषद्भ्यः ।
त्वत्सिद्धान्तप्रौढदुर्गस्य मध्ये,
नावस्थानं यानि जातु त्यजन्ति ॥ ६

किं वाच्योऽयं कर्मणां ही विपाकः,
केचिद्यस्मात्सत्यपि त्वय्यधीशे ।
संसाराब्धेर्भीरवोपि श्रयन्ते,
मोहादीनां धाम देवान्तराणि ॥ ७

यस्य स्तोत्रे स्यात् समीहाऽप्यनन्त-
श्रेयः प्राप्त्यै किं पुनर्व्यावृतत्वम् ।

स श्रीधर्मः शत्रुभीतिप्रशान्त्या,
तन्यान् नाथः शाश्वतं मे प्रमोदम् ॥ ८

स्तुतिमिति मतिमाँस्तनोति यस्ते,
त्रिभुवनपालक ! धर्मतीर्थनेतः ! ।
सुरवरमुनिसुन्दरस्तवानां,
स पदमनन्तसुखाद्वयोऽचिरात् स्यात् ॥ (औप०) ९

## १३. श्रीशान्तिजिनस्तोत्ररत्नम्

(उपजातिः)

जयश्रिया भारतभूपतीनां,
यः पञ्चमश्चक्रभृतां बभूव ।
मोहाद्यरीणामथ षोडशोऽर्हन्,
शान्तिं तमीडे जिनमार्त्तिशान्त्यै ॥ १

निर्वाण्युपास्यं गरुडार्चनीयं,
श्रीविश्वसेनोरुकुलाम्बरार्कम् ।
भजन्ति ये श्रीअचिराङ्गजं तान्,
सुरेशितारोऽप्यचिराद्भजन्ते ॥ २

निजाभिधोच्चारकृतोऽखिलार्त्ति-
शान्तिं वितन्वन् ध्वनिवस्तुनोर्यः ।
तादात्म्यमावेदयते प्रशान्तिं,
स शान्तिनेता नयतादघं मे ॥ ३

प्रमाथशक्तिं तमसो निजारे-
र्मार्गन् मृगाङ्कोऽनुमितः स्वचिह्नात् ।

निषेवते यं किल सर्वभीतीः
स मे निहन्यान्मृगलाञ्छनोऽर्हन् ॥ ४

अदा जगद्यो जननादिभिः स्वैः,
शान्ते ! सुरङ्गं किमहं कुरङ्गः ? ।
सुरङ्गता मेऽस्त्विविति यं मृगोऽङ्क-
निभान्नु विज्ञाय यते ! भजे तम् ॥ ५

विधोः सुधातोऽभ्यधिकां विभावयन्,
मृगो नु जन्मान्तजरादिनाशनात् ।
वचःसुधां यस्य पिपासुरङ्कतां,
भजत्ययं शान्तिजिनः शिवाय मे ॥ ६

स्मरापहारी न भवाश्रयः सदो-
दिताक्षरश्रीर्गतजाड्यगोततिः ।
कुरङ्गदोषोज्झनकृत्तमोऽर्दयन्,
जिनोऽवतान्मां मृगलक्षणो नवः ॥ (वंशस्थ) ७

विपत्तृणानां दहने प्रगल्भते,
लवोऽपि वह्नेरिव यस्य संस्तुतेः ।
प्रभुः स शान्तिर्द्विविधा द्विषां भियोऽ-
पनीय मे नित्यसुखाद्वयं क्रियात् ॥ (वंशस्थ) ८

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते,
मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते,
फलमिति तद्वितराचिरान्ममापि (औप०) ९

# १४. श्रीकुन्थुनाथजिनस्तोत्ररत्नम्

(वंशस्थ)

बभूव यः सर्वसगर्वभूभृतां,
जयश्रिया भारतषष्ठचक्रभृत् ।
स कुन्थुनाथः स्तुतिगोचरीभवन्,
पुनातु मां सप्तदशो जिनेश्वरः ॥ १

सुखानि कुन्थुः प्रभुरातनोतु मे,
स शाश्वतानन्दमयानि सर्ववित् ।
यदीयविज्ञानसरोरुहोदरे,
मधुव्रताभां भुवनानि बिभ्रते ॥ २

भवप्रमाथं विदधात्यकामता-
ममारतां चच्छगलाङ्कितो दधत् ।
तथाऽपि यः श्रीतनयः प्रसिद्धिभाग्,
मतं स तन्यान् मम कुन्थुतीर्थराट् ॥ ३

सुवर्णकान्तिर्दधते न मन्दतां,
न खभ्रमं जातु न वक्रतामपि ।
स्तुवन्ति यं सूरसुतं बुधास्तथाऽ-
प्यहो ! स कुन्थुः प्रथयत्वघक्षयम् ॥ ४

न यक्षिणी सा जिन ! कैर्बला या,
स चापि गन्धर्वसुरः प्रशस्यते ? ।
त्वदंह्रिसेवादिभिरामरं जनुः,
स्वमीश ! याभ्यां क्रियते फलेग्रहि ॥ ५

बभार यश्चक्रिपदे नवोत्तमान्,
निधीन् जिनत्वे च स तत्त्वशेवधीन् ।
प्रदीयमाना जगतोऽपि येऽव्ययं,
न यान्ति कुन्थुः स मुदेऽस्तु मे प्रभुः ॥ ६

श्रयामि तं कुन्थुविभुं समीहित-
प्रदप्रसादं परमेष्ठिनां परम् ।
यदंह्रिसेवाविधिकल्पवीरुधः,
फलानि चक्रीन्द्रजिनेन्द्रसम्पदः ॥ ७

द्विधाऽखिलद्वेषिविनिर्जयाद्यतो,
बभूव चक्री जिननायकश्च यः ।
तमेव मे द्राक् स कृपानिधिः कृपा-
ऽऽस्पदस्य कुन्थुर्ददतां कृतस्तुतिः ॥ ८

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते,
मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते,
फलमिति तद्वितराचिरान्ममापि ॥ (औप०) ९

## १५. श्रीअरजिनस्तोत्ररत्नम्

(उपजातिः)

संसारशत्रोर्विजयश्रियाऽऽप्य-
मिच्छन् शिवं चक्रिरमां जहौ यः ।
अरं जिनं तं विषयैर्विचित्रै-
ररञ्जिनं स्तौमि जिताखिलाऽऽरम् ॥ १

चिकीर्षतेऽपि स्तवने तवेष्टान्-
यास्कन्दतां तत्करणे न चित्रम् ।
देवान्तराणां तु कृतेऽप्यमुष्मिन्,
प्रयासमेवाऽऽप्नुवतां कथं तत् ? ॥ २

सुदर्शनक्ष्मापतिवंशमौलिं, देवीतनुजं जगतामधीशम् ।
परानुवृत्यापि नरोऽरदेवं,स्तुवन्न रोरत्वमुपैति जातु ॥ ३

यक्षेशयक्षं जिन ! तं स्तवीमि,
धारिण्यभिख्यामपि यक्षिणीं ताम् ।
नित्यं तवोपासनभक्तदक्षा-
दिभिः शिवं यौ कुरुतः करस्थम् ॥ ४

चिह्नच्छलाद् यद्विदधाति नन्द्या-वर्त्तः प्रभो ! ते पदपद्मसेवाम् ।
अचेतनोऽप्येष बभूव तेन, धुरीणवृत्तिः किल मङ्गलेषु ॥ ५

निरासि यन्मोहरिपुस्त्वया त-त्त्वन्मत्सरान्वेष रुणद्धि जन्तून् ।
पुरे विविक्षूंस्तव शासने ते, त्वामित्यदृष्ट्वैव भवे भ्रमन्ति ॥ ६

को वाऽत्र दोषस्तव तस्य वेश !, तस्यैव यत्ते दधते सदाज्ञाम् ।
स्वाज्ञानुगेष्वेव तु स प्रगल्भो, जह्युर्बुधास्तद्भवदां तदाज्ञाम् ॥ ७
(युग्मम्)

मा त्याक्षीर्जिन ! नस्त्वदेशकरणान् स्वामी पुनस्त्वत्समो,
भावी क्वेति कुनाभयो नव मरुत्सञ्चारिताब्जच्छलात् ।
भक्त्या केवलिनं चरन्तमवनीं विज्ञापयन्ति स्म यं,
तन्यात् सर्वभयक्षयान्मम परं श्रीमानरः शर्म सः ॥(शार्दू. ) ८

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते,
मघवमहामुनिसुन्दरस्तुतांह्रेः ।
स भवति गुणसम्पदा समस्ते,
फलमिति तद्वितराचिरान्ममापि ॥ (औप०) ९

## १६. श्रीमल्लिजिनस्तोत्ररत्नम्

(रथोद्धता)

मल्लिनाथ ! भवतः स्तवं द्विधा,
सर्ववैरिविजयश्रिये भजे ! ।
सेविताङ्घ्रि सदुपाययोगतः,
स्याद् बुधः पदमुपेयसम्पदः ॥ १

ये प्रकल्पितकियत्फलेष्वपि,
स्वर्द्रुमादिषु भृशं जिनाऽऽदृताः ।
निश्चितेन्द्रविभवादिसत्फले,
तेऽपि किं तव गुणस्तवेऽलसाः ? ॥ २

भजन् वनौका अपि यस्य निश्चलं,
पादाम्बुजं नित्यमहोमहाफलम् ।
जिनेन्द्रवाच्यं हरितामसङ्गतः,
स्यान्निष्फलं नो गुरुसेवनं ततः ॥ ३

पराभवन् योगबलेन संवरद्विषं सुविस्तारितराजिसंवरः ।
ददातु देवो नवमं रसं वर-स्वजन्मसन्तर्पितराजसंवरः ॥ ४

ध्यानं चतुर्थं समवाप्य विश्रुतं,
योऽर्थं चतुर्थं भजति स्म शाश्वतम् ।
अरे चतुर्थे शुभितः शुभोदयश्चतुर्थतीर्थप्रभुरस्तु स श्रिये ॥ ५

## ५. श्रीसुमतिनाथचैत्यवन्दनम्

(रथोद्धता अथवा श्येनी)

मङ्गलावलिनदीमहार्णवं, मङ्गलाप्रवरकुक्षिसम्भवम् ।
मेघभूपतिसुतं दयालता-मेघमञ्चत जिनं जना रताः ॥ १

मातुरुत्तमतमाभवन्मतिर्गर्भगेऽपि ननु यत्र जाग्रति ।
अत्र किं कुतुकमस्य संस्मृतेरप्यदोषधिषणा प्रजायते ॥ २

अङ्गुलीदलविराजिकोमलम्, स्मेरमुत्तमगुणालिकोमलम् ।
यस्य शस्यपदपद्मयामलम्, संश्रयन्न लभते नयामलम् ॥ ३

पञ्चबाणबलभञ्जनक्षमम्, पञ्चभेदिविषयछिदागमम् ।
पञ्चसारसमितिप्रपञ्चकम्, पञ्चमं नमत तीर्थनायकम् ॥ ४

कर्णिकारकुसुमासमप्रभः, क्रौञ्चलक्षितपदो हताशुभः ।
तीर्थनाथसुमतिर्मनोधृतिं, यच्छतान्मम तथा च निर्वृत्तिम् ॥ ५

## ६. श्रीपद्मप्रभजिनचैत्यवन्दनम्

(उपजाति)

प्रशस्तपद्माकरवत्सुवृत्तः, श्रीसद्मपद्माङ्कपदोऽतिवित्तः ।
पद्मप्रभः पातु विभुर्विभाव-विभावरीयान् कृतकर्म्मलावः ॥१

सरोरुहं राजगणेन वन्द्य-मानं यदंह्रिश्रयणेन सद्यः ।
पराभवं राजभवं निरास्यत्, प्रमाणमेतन्महदाश्रयस्य ॥ २

मूर्त्ता विभान्त्यत्र विभातसन्ध्याः, सद्धर्मकर्मप्रकृतावबन्ध्या ।
मूर्तिर्यदीयाऽवसरं विवेका-दित्योदयार्थं ददते प्रवेका ॥ ३

धराधिराजो धर एव धन्यः, सीमासुसीमारमणो न चान्यः ।
कुले यदीये कमले मराल-लीलां ललौ यः सुषमाविशालः ॥४

प्रवालबालारुणपद्मराग-रम्याङ्गकान्तिः परिमुक्तरागः ।
षडन्तरारिक्षयकारशक्तिं, षष्ठो जिनो यच्छतु मे सुयुक्तिम् ॥५

## ७. श्रीसुपार्श्वनाथचैत्यवन्दनम्

(स्वागता)

श्रीप्रतिष्ठनरनाथतनूजम्, सुप्रतिष्ठनरनिर्मितपूजम् ।
देवदेवमभिनौमि सुपार्श्वम्, देवताऽधिपतिसेवितपार्श्वम् ॥ १

स्वस्तिकारणमनोहरदृष्टिं, स्वस्तिकाङ्कितपदं कृततुष्टिम् ।
यं जनस्य भजतो ननु पृथ्वी - सूनुमृद्धिरिह राजति पृथ्वी ॥२

दुःखदुर्गतिविरोधिविकारा-स्तावदेव भविनां स्युरपाराः ।
यस्य यावदतुलं त्वभिधानं, स्मर्यते न शुभसिद्धिविधानम् ॥३

दर्शनश्रुतलघूरुचरित्रा-रागताः शिवफला इति नेत्राः ।
येन जल्पितुमिवोच्चपताका, उच्छ्रिताः प्रकटपञ्चफणाङ्काः ॥४

हारिवारिजरजःकरणरङ्ग(त्?)-पिञ्जराञ्जगसुभगः-शुभचङ्गः ।
श्रीसुपार्श्वभगवानघसङ्ग-च्छेदकोऽस्तु गुणगौरवतुङ्गः ॥ ५

## ८. श्रीचन्द्रप्रभजिनचैत्यवन्दनम्

(वसन्ततिलका)

चन्द्रोपलप्रवरचन्द्रमयूखचन्द्र-
गौराङ्ग ! सङ्गतगुणाश्रममुक्तचन्द्र ! ।
चन्द्रप्रभ ! त्रिभुवनाधिपते ! प्रसीद
सौभाग्यसुन्दरविभो ! कुशलावलीद ! ॥ १

श्रीखण्डपाण्डुरमुदारतनुं भवन्तं,
व्याख्यानसद्मनि सुवागमृतं किरन्तम् ।
दृष्ट्वा जनेऽजनि, जिनेति ननु,
प्रतीतिर्गङ्गागिरेर्हिमवतःप्रसरीसरीति ॥ २

विश्वेश ! शीतरुचिरेष कलालयोपि,
पीयूषपात्रमपि ऋक्षगणाधिपोपि ।
त्वां सेवतेऽधिकसमृद्धिकृते नु नित्यं,
राजा न तृप्यति ततः कियतेति सत्यम् ? ॥ ३

उद्दामसेनमहसेनवसुन्धरेश-
श्रीलक्ष्मणासुत ! विवेककरोपदेश ! ।
चन्द्राङ्क ! भव्यजनचन्द्रकिधूमयोने,
सौम्यां दृशं मयि निधेहि शुभश्रियोने ! ॥ ४

अष्टाङ्गयोगकुशलोऽष्टगुणोष्टसिद्धि-
दाताष्टकर्मबलनिर्दलनप्रसिद्धिः ।
अष्टासु मे श्रवणमातृषु वत्सलत्व-
माप्तोष्टमो दिशतु विश्रुतसत्यसत्त्वः ॥ ५

## ९. श्रीसुविधिजिनचैत्यवन्दनम्

(तोटक)

गुणराजिमनोहररत्ननिधिं, वरशान्तरसोर्मिसुधाजलधिम् ।
परिणामहितोदितपुण्यविधिं, प्रणमामि जिनेन्द्रमहं सुविधिम्॥१

मुदितामलसाधुलसच्चरितं, विदिताऽखिललोकमिहादुरितम् ।
सुखमिच्छसि चेच्चतुर ! त्वरितं,
सुविधिं भज तत्सुखमाभरितम् ॥ २

दधतं सततं सुमहानवमं, विगलन्मलजालमिहानवमम् ।
सदनं परमं प्रशमं नवमं, जिनमञ्चत भव्यजनाः ! नवमम् ॥३

पुरुहूतपरम्परया महितं, शमधामहितं सुखधामहितम् ।
विदलन्तमघं भविनामहितं,
सुविधिं स्मर भव्यकलामहितम् ॥ ४

कमलोपमदक्षिणवामकरं, क्रमसेवनसोदरसन्मकरम् ।
अवदातयशोजितसोमकरं, सुविधिं श्रयतानघधामकरम् ॥ ५

## १०. श्रीशीतलनाथचैत्यवन्दनम्

(मालिनी)

अमृतमसमतृष्ण-तापनिर्वापहेतुं,
हितमगदमदभ्रं रागरोगं विनेतुम् ।
कतकफलमशुद्धस्वान्तपानीयशुद्ध्यै,
जिनपतिमहमीडे शीतलं पुण्यबुद्ध्यै ॥ १

दृढरथनृपनन्दानन्दनं नेत्रलीला-
म्बुजविकसनभानुं बिभ्रतं योगिलीलाम् ।

भजत शुभजनाः श्रीवत्ससश्रीकपादम्,
जिनममुमकलङ्कं सर्वदा निर्विषादम् ॥ २

विषमविषयकीलाघोरसंसारदावे,
कथमहह !!! दुरन्तक्लेशदायिस्वभावे ।
दधति रतिमधन्या मोहमूढापदेनं,
तदुपशमकमाप्तं नो भजन्ते यदेनम् ॥ ३

कलुषशिरसि भेदे जाज्वलद्वज्ररूपम्,
निबिडजडिमनाशे चण्डभानुस्वरूपम् ।
कथमिह भजमानाः सत्यशब्दार्थदाक्ष्यम्,
यमभिदधति देवं साधवः शीतलाख्यम् ॥ ४

अपि दशसु दिशासु स्पष्टबोधप्रकाशम्,
सदशभिधसुधाभुक्शाखिवत्पूरिताशम् ।
दशविधयतिधर्म्मोल्लासवृद्ध्यै त्रिकालम्,
दशमजिनवरेन्द्रं नौमि भावादनालम् ॥ ५

## ११. श्रीश्रेयांसनाथचैत्यवन्दनम्

(शालिनी)

श्रेयोलक्ष्मीराजमानारविन्दं, पादद्वन्द्वोपास्तिकृद्देववृन्दम् ।
साधुश्रेणिकौमुदीशुक्लपक्षं, श्रीश्रेयांसं संश्रयेऽस्तारिपक्षम् ॥१

निर्वाणश्रीकण्ठमाणिक्यहार ! – क्लेशध्वान्तच्छेदसूर्यावतार ! ।
वाच्यातीतस्फीतवृत्तप्रतीत !, त्रायेयाऽहं न त्वया पापभीतः ॥२

तृष्णालोलोल्लोलमालाकरालं,
मोहाम्भोधिं प्रोच्छलत्पङ्कजालम् ।

उत्तीर्णास्ते ये मतं तेऽधिरूढाः,
स्वामिन् ! श्रीमन् ! यानपात्रं ह्यमूढाः ॥ ३

दम्भो लोभो मोहमायाप्रमादाः, कामक्रोधभ्रान्तिमिथ्याविवादाः।
देवासन्ना नैव ते स्युर्वराकाः, सिंहस्येव स्फूर्जतःफेरुपाकाः ॥४

माद्यन्मायासूर्यजाकामपाल !, श्रेयान् श्रेयःकल्पवृक्षालवाल ! ।
नेतश्चेत श्लोक्षभावेन युक्तं,
त्वत्सेवातो मेऽस्तु कालुष्यमुक्तम् ॥ ५

## १२. श्रीवासुपूज्यजिनचैत्यवन्दनम्

(प्रमिताक्षरा)

वसुपूज्यराजकुलकीर्त्तिकरं, हरिपूज्यपादमतुलर्द्धिभरम् ।
प्रभुवासुपूज्यभगवन्तमहं, प्रणमामि भव्यजनदत्तमहम् ॥ १

भुवनावतंस ! भविनो कुशला, भगवन् ! सुखैकरसिकाःसकलाः।
ननु तन्निमित्तमतुलार्त्तिहरं, न भवन्तमीश्वरम्भजन्ति परम् ॥ २

विषया विपाकविषभोगसमा, निखिलाःकषायरिपवो विषमाः।
परिहृत्य तानिति कृती रमते, परिणामहारिणि तवेश ! मते ॥३

भववासिनः सुखकलाविरला, विपुलापि राज्यकमला तरला ।
भवतः प्रभोरभिलषामि नतः,
स्थिरमेकमेव शिवसौख्यमतः ॥ ४

तरुणांशुमालिसमकान्तिकलः, कलिताखिलत्रिभुवनो विमलः।
विभुवासुपूज्य ऋभुपूज्यपद-
द्वितयः प्रसीदतु स मे सुखदः ॥ ५

## १३. श्रीविमलनाथचैत्यवन्दनम्

(वैतालीय)

यशसा सकलेन्दुमण्डलं, जितवन्तं विकलङ्कमुज्ज्वलम् ।
मदमेघघटामहाबलं, विमलं नौमि जिनं सुनिर्मलम् ॥ १

भगवन् ! भववाससंकटं, विकटं नाम विदन्नपि स्फुटम् ।
निबिडैर्ननु कर्मबन्धनैः, स्थितवानस्मि सितो हहा घनैः ॥ २

भुवनेश ! वनेऽथवा जने, नगरे संवसथेऽथ पत्तने ।
भवरागविषोर्मिविह्वलः, क्षणमात्रं न सुखं लभे किल ॥ ३

विमलोसि जिनाभिधानतः, परिणामादपि तादृशो मतः ।
अधुनापि तवाभिधा पुनर्विमलं देव ! करोतु मे मनः ॥ ४

गिरिमन्दरकान्तिसुन्दरः, प्रमदोदारनमत्पुरन्दरः ।
विशदं दिशतु त्रयोदशः, सुकृतोद्द्योतपदं जिनो यशः ॥ ५

## १४. श्रीअनन्तजिनचैत्यवन्दनम्

(पृथ्वी)

विवेककनकाचलोद्गतमरीचिकल्पद्रुम-
स्फुरच्छिवफलोल्लसत्सुखरसैकभोगोत्तमः ।
अनन्तजिननायकः सकलसम्पदां दायकः,
प्रभुर्विजयतां नमद्भविकसंहतेस्त्रायकः ॥ १

कुबोधखरमारुतोपचितकोपदावानल-
प्रसर्पदशुभाशयप्रबलधूममालाकुलः ।
भवन्मतसुधासरः शरणयामि यावन्मतं,
कुकर्मपिशुनः स मां नयति तावदेवेश ! तम् ॥ २

अनीतिवनवेष्टितोऽशुभविकल्पकूटोन्नतः-
सदाकठिनतान्वितः सुकृतमार्गरोधोद्यतः ।
तदैव ननु भिद्यते विषममानशैलस्तत-
स्तवेश ! यदि शासनं कुलिशमाप्यते भाग्यतः ॥ ३

कुबुद्धिविषवल्लरीघनमनःकुडङ्गस्थितिः
प्रतारणमहाविषा सुचपलातिगुप्तागतिः ।
विभो ! निकृतिपन्नगी ननु तदैव दूरं चरेद्-
भवद्वचनगारुडं यदि हृदि प्रकामं स्फुरेत् ॥ ४

भृतत्रिभुवनोदरप्रचुरपङ्कलोभार्णव-
प्रमापणघटोद्भवः सुकृतिलोकनेत्रोत्सवः ।
चतुर्दशजिनेश्वरः शिवफलं गुणस्थानकं,
चतुर्दशमसौ विभुर्दिशतु मेघपुत्रोऽधिकम् ॥ ५

## १५. श्रीधर्मनाथचैत्यवन्दनम्

(उपजाति)

धर्मोद्यमारामलसद्वसन्तं, भव्याङ्गिनां चित्तगृहे वसन्तम् ।
श्रीधर्मनामानमधीशमीडे, लीनं शिवे सर्वनिवृत्तपीडे ॥ १

चन्द्रप्रदीपद्युपतीनुदीतान्, सर्वानतीत्योल्लसता प्रतीतान् ।
केनापि नित्यं स्वपरावभासि-
ज्ञानप्रकाशेन विभो ! विभासि ॥ २

आदर्शमध्ये मित एव तावद्धीनाधिको वा प्रतिभाति भावः ।
त्रैलोक्यदर्शिन् ! निखिलांस्त्वमेव,
भावानृतान् पश्यसि देवदेव ! ॥ ३

कर्माङ्कुरात्यन्तभिदे लवित्रं, शुद्ध्यै महातीर्थजलं पवित्रम् ।
विचारयंस्ते विमलं चरित्रं,
को नाम चित्ते न दधाति चित्रम् ? ॥ ४

श्रीभानुवंशाम्बुजचण्डभानुः, प्रभानुगामी कृतमेरुसानुः ।
धर्मो जिनः पातु निरस्तमारिः, श्रीसुव्रताकुक्षिदरीमृगारिः ॥५

## १६. श्रीशान्तिनाथचैत्यवन्दनम्

(उपेन्द्रवज्रा)

जगत्त्रयीजीवनजागरूक !, प्रभावशान्ते ! गतलोभलूक ! ।
जय प्रभो ! मन्मथदन्दशूक- सुपर्ण ! सङ्क्रन्दनशस्यशूक ! ॥१

वसुन्धरावल्लभविश्वसेन-कुलप्रदीपक्षितमोहसेन ! ।
नमोऽस्तु ते श्रीअचिराङ्गजात !,
सुजातरूपद्युतिदेह ! तात ! ॥ २

स्थितस्य गर्भेपि तव प्रभावः, स्वयं भुवि क्लेशहरस्वभावः ।
समुल्लसावृतिमध्यगस्य, गन्धो यथा जातिमणीवकस्य ॥ ३

(उपजाति)

त्वया यथारक्षि कपोतपोतः, सम्पन्नकष्टाद्व्यसनाब्धिपोत ! ।
तथैव मां रक्ष विभो ! प्रमाद-निषादबन्धाद्विहितप्रसादः ॥ ४

(उपजाति)

भवानभूत्पञ्चमचक्रवर्त्ती, हरन् जनानां भुवि काममर्त्तीः ।
श्रुतस्तथा षोडश तीर्थनाथस्तनुष्व शान्ते ! समतां ममाथ ॥ ५

## १७. श्रीकुन्थुनाथचैत्यवन्दनम्

(इन्द्रवंशा)

कल्याणकोटीकमलामहोत्पलं,
कालत्रिकज्ञानलसत्कलाकलम् ।
आनम्य सम्यक्कमनीयभावतः,
कुन्थुं कृतार्थी भविताहमादृतः ॥ १

जीवप्रदेशाः समयाः पराणवः, प्रत्यर्थमन्तातिगपर्यवोद्भवः ।
निःशेषमेतत् प्रतिभाति ते स्थिरं,
ज्ञाने तदस्मात्परमस्ति किङ्करम् ? ॥ २

उत्फुल्लनेत्राः सुरराजराजयः, प्रोल्लासिरोमाञ्चविवृद्धमूर्त्तयः ।
त्वां पूजयेयुः सुरपादपस्रजां पुञ्जेन दूरे भगवन्! पराः प्रजाः ॥३

पापादपायो न परः परो भवेदेको ह्युपायस्तदपासने भवे ।
यत्ते पदाम्भोजविलोकनं हितं,
तत्तात्त्विकैर्देव ! तदैव संश्रितम् ॥ ४

बिन्दो रसस्येव सुवर्णसञ्चयः, स्यादेकवाक्यादपि ते महोदयः ।
तत्त्वां भजे कुन्थुविभो ! निरन्तरं सम्पूर्णमूलातिशयैर्मनोहरम् ॥५

## १८. श्रीअरनाथचैत्यवन्दनम्

(दोधक-विभावरी)

मानवदानवदैवतवन्द्यं, तत्त्वकलाकुशलैरभिनन्द्यम् ।
श्रीअरनाथमनन्तमुदारं, भावभरेण भजामि मुदारम् ॥ १

कोपविमुक्तममानममायं, नाथमलोभममोहमकायम् ।
देवमरागमनीहमकामं, नौमि विशुद्धगुणैरभिरामम् ॥ २

राजसुदर्शनवंशवतंसं, दर्शनदूरितदुरितमहिंसम् ।
सिद्धिवधूरमणं रमणीयं, नाथममुं नमत स्मरणीयम् ॥ ३

सप्तमचक्रधरं गुणभाजं, सप्तदशाग्रगतं जिनराजम् ।
अष्टमनोहरसिद्धिनिधानं, ध्यानगतं तनवानि विमानम् ॥ ४

कोमलकाञ्चनकान्तिशरीरं, कर्ममहाबलभञ्जनधीरम् ।
श्रीअरनाथमुपास्य गभीरं, साधु लभेय भवोदधितीरम् ॥ ५

## १९. श्रीमल्लिनाथजिनचैत्यवन्दनम्

(वंशस्थ)

समुल्लसन्मल्लिसुमस्रजा समः, दधद्यशोराशिरनन्तविक्रमः ।
क्रमप्रणामप्रवणामरेश्वरस्तनोतु मल्लिःकुशलं जगद्गुरुः ॥ १

सखीन्नृपान् षड्निजपूर्वजन्मनः, षडन्तरङ्गारिवशीकृतात्मनः ।
भवानतानीत् शिवराज्यसङ्गतानहो गुरूणामविनाशिमित्रता ॥२

तनोति वश्यं भुवनं यथा स्मरः,
स्त्रियं तु तामेव निरूप्य विद्वरः ।
अपाहरत्तं जगदीशकामिनां(तां)ततो महीयश्चरितं महात्मनाम् ॥३

जिनैः परैर्या प्रयतैर्दिनैर्घनैरघानि भावारिचमूस्तपोधनैः ।
जिगाय चैकेन दिनेन तां भवा-
नहोऽद्भुता ते गुरुसत्त्वता ध्रुवा ! ॥ ४

जिनेन्द्रमल्लिर्नृपकुम्भसम्भव-
स्तमोब्धिशोषेऽपि च कुम्भसम्भवः ।
बिभर्तु भद्राणि स कामकुम्भतः,
श्रियाधिकः कुम्भसुलक्ष्मशोभितः ॥ ५

## २०. श्रीमुनिसुव्रतस्वामिचैत्यवन्दनम्

(मञ्जुभाषिणी-नन्दिनी)

विदितावदातयदुवंशभूषणं, मुदितामनोहरमपास्तदूषणम् ।
मुनिसुव्रतं जिनपतिं नमाम्यहं,
महनीयशासनमनीहमन्वहम् ॥ १

मिथिलापुरीपतिसुम(मि)त्रसम्भवं, शुभवासरोदयसुमित्रवैभवम्।
भुवनैकमित्रमनिमित्तवत्सलं,
मुनिमानमामि जिनपं सदा फलम् ॥ २

भृगुकच्छनामनगरं तुरङ्गमप्रतिबोधहेतुमगमस्त्वमश्रमः ।
निशयाप्यतीत्य किल षष्टियोजनी-
मिति तावकी तु करुणातिशायिनी ॥ ३

वरवृत्तापालिकलितं सुनिर्मलं निभृतम्भृतं समरसेन केवलम् ।
भगवन् ! भवन्तमुचितं महासरः
सदृशं श्रयेत कमठः सदास्थिरः ॥ ४

जलपूरपूर्णजलदोपमद्युते !, गुणवासविंशतिशरासनोन्नते ! ।
मुनिसुव्रतेश ! मम सत्यपेशलं,
कुरु चित्तमार्त्तिहरबोधिनिश्चलम् ॥ ५

## २१. श्रीनमिनाथचैत्यवन्दनम्

(शिखरिणी)

महामो व्यामोहप्रसरतिमिरत्रासतरणिं,
महामोहोदञ्चत्सलिलनिलयोत्तारतरणिम् ।

गुणश्रेणीगेहं गहनभव[वि] भ्रान्तिहरणं,
शरण्यं सर्वज्ञं नमिमिह जगद्वन्द्यचरणम् ॥ १

स्थितोऽनन्तं कालं तनुतरनिगोदेषु निवस-
न्नविश्रामं कुर्वन् जननमरणान्येव भगवन् ! ।
मिथोभिन्नैर्गोलैर्विविधविविधैर्बालक इव,
प्रसङ्गेन व्यर्थं विहितरतिरासादितशिव ! ॥ २

ततश्च्युत्वा स्थूलेष्वहमिह निगोदेषु गतवा-
नथ प्रत्येकद्रुक्षितिजलमरुद्वह्निषु भवाः ।
मया सङ्ख्यातीता घनतरमपूर्यन्त विकले-
ष्वथो सङ्ख्याता मे जनिमरणकोटी च मिमिले ॥ ३

ततो लेभे पञ्चेन्द्रियचरिगतौ दुःखनिचयान्,
क्षुधातृष्णाशीतातपवधनबन्धादिविषयान् ।
अथ प्राप्तः सप्तास्वपि नरकपृथ्वीषु यदहं,
महाकष्टं वाचा जिनप ! ननु तद्वक्तुमसहम् ॥ ४

इति भ्रान्त्वा भ्रान्त्वा भुवनहित ! लक्षाः सुवितता-
स्तनूभूद्योनीनां चतुरधिगताशीतिकलिताः ।
मया भाग्याभोगाद्विभुरथ भवानापि भगवन् !
नमे ! नेतस्तन्मे भवभवहरोऽचिन्त्यबलवन् ! ॥ ५

## २२. श्रीनेमिनाथचैत्यवन्दनम्

(मन्दाक्रान्ता)

ब्रह्माद्वैतप्रवरपदवीबोधने चण्डभासं,
शोभासम्पन्निलयमखिलश्रीविलासैकवासम् ।

श्रीमन्नेमिं समरससुधावारपारावतारम्,
विश्वाधारं स्तवनविषयीकर्तुमिच्छाम्युदारम् ॥ १

श्रेयःश्रेणीकुलयदुकुलोत्तंसवित्तावदात !
प्रेङ्खच्छङ्खाङ्कित ! नरपतिश्रीसमुद्राङ्गजात ! ।
श्रीशैवेय ! प्रवरकरुणावल्लिवृद्ध्यै वसन्त !
श्रीमन्नेमे जय जय विभो ! पादपूतोज्जयन्त ! ॥ २

आगत्यापि श्वशुरसदनं बन्धुवर्गानुरोधाद्-
दृष्ट्वा बद्धानशरणपशूनेव कारुण्यबाधात् ।
तानामोच्य न्यवृत उदितात्त्वं स्ववीवाहकृत्या-
देवन्देव ! प्रभवति दया तावकीनैव सत्या ॥ ३

त्वय्येकस्मिन्नविजितवति ख्यातवीरावतारे,
त्रैलोक्यस्याप्यविजय इवाभूज्जयःशम्बरारेः ।
मत्तो हस्ती परवनचरांस्त्रासयन्नप्यराते-
र्नश्यन् सिंहात् किमुबलवताम्मुख्यतामत्र गाते ॥ ४

सौभाग्यश्रीसुभगभगवन्नुज्जयन्ताद्रिशृङ्ग-
प्राप्तप्रेङ्खद्व्रतनिरुपमज्ञाननिर्वाणरङ्ग ! ।
श्रीमन्नेमे ! दुरितगहनच्छेदनोदारनेमे !
बुद्धिं शुद्धां वितनु नितरां पावने दर्शने मे ॥ ५

## २३. श्रीपार्श्वनाथचैत्यवन्दनम्

(शार्दूलविक्रीडितम्)

विघ्नव्रातविवर्त्तकर्त्तनजगद्विख्यातवीरव्रतः,
स्वस्तिश्रेणिसमृद्धिपूरणविधौ कल्पद्रुमो विश्रुतः ।

पुण्यप्रौढिपदप्रभावपटुताप्रत्यक्षपूषाप्रियं,
श्रीपार्श्वः परमोदयं जिनपतिः पुष्णातु शाम्यश्रियम् ॥ १

श्रीवामारमणाश्वसेननृपतिश्रेष्ठान्वयश्रीकर !
प्रेङ्खत्पावनकायकान्तिविजितप्रत्यग्रधाराधर ! ।
पुण्यप्राप्यपदप्रसादपरमश्रीमूलतासाधन-
श्लाघ्यश्रीधरणेन्द्रवन्द्यचरण ! त्रायस्व मां पाप्मनः ॥ २

स्वावासात् सहसा समेत्य च भवान् कारुण्यतस्तात्त्विका-
दुद्दध्रे विषमाज्ज्वलन्तमुरगं दीनं यथा पावकात् ।
तां कारुण्यदृशं विधाय भगवन् ! मामप्यनन्याश्रयं,
विश्वव्यापिकषायभीषणदवादाकर्ष देव ! स्वयम् ॥ ३

कामं कामठवारिवाहपटलोपज्ञप्रसर्पत्पयः-
पूरःप्लावयति स्म लेशमपि नो त्वां ध्यानगं निर्भयः ।
तत्किं कौतुकमत्र मोहजलधिर्लोकत्रयव्यापकः,
सोऽपि क्षोभयति स्म नो जिनपते ! त्वां संसृतेस्तारक ! ॥ ४

जीरापल्लि-फलर्द्धि-काशि-मथुरा-शङ्खेश्वर-श्रीपुर
त्रम्बावत्यणहिल्लपत्तनमुखप्रख्याततीर्थेश्वर ! ।
चञ्चच्चित्रकमूलिकेव भगवन् ! पार्श्व ! त्वदीयाभिधा
कुर्यान्मे गुणकोशमक्षयमसावाराध्यमाना त्रिधा ॥ ५

## २४. श्रीमहावीरदेवचैत्यवन्दनम्

(स्रग्धरा)

श्रेयोमूलानुकूलागमशुचिवचसां जन्मभूःपावनानां,
मिथ्यात्वप्राणपोषप्रदकुमतगिरां छेदकर्त्ता घनानाम् ।

त्रैलोक्यत्राणलीलानलसगुणलसद्धर्मसाम्राज्यहेतु-
र्नेता श्रीवर्द्धमानो मम नुतिविषयं भक्तिभाजः समेतु ॥ १

गर्वाखर्वाद्रिशृङ्गस्थिरदृढमनसां वादधीसादराणां,
प्रौढानामेन्द्रभूतिप्रमुखगणभृतां चातुरीसुन्दराणाम् ।
गूढं सन्देहजालं सुविषममभिनल्लीलया त्वं क्षणेन,
छिन्दानो ध्वान्तराशिं लगयति किमु वा वत्सरं वासरेनः ? ॥२

ज्ञानं स्वार्थावभासि प्रमितिरभिमता तत्प्रमेयाश्च भावा,
नित्यं चोत्पत्तिनाशध्रुवगुणसहजव्यक्तिसत्तास्वभावाः ।
नित्यानित्यं जगत् स्यात्सदसदथपराक्कर्तृकं कर्मवश्यं,
धर्मःसम्यग्दयात्मा गदितुमिति भवानेव जानात्यवश्यम् ॥ ३

तत्त्वालोकाय नेत्रं भवजलधितटाऽऽवाप्तये यानपात्रं,
चित्तोल्लासाय मित्रं कलुषतरुततिच्छेदनायोग्रदात्रम् ।
नानासत्तर्करत्नप्रकरगुरुनिधिः शासनं ते चिराय,
त्रातर्जीयान्निमित्तं सकलसुकृतिनां पुण्यपुण्योदयाय ॥ ४

पुण्यर्द्ध्या भासमानः कनकगिरिगुरुप्रस्थशोभासमानः,
स्फूर्जत्क्वाकम्पमानद्युतिरतिशयतःकल्पवृक्षोपमानः ।
नित्यं निर्लोभमानःपरमसुखकलासम्पदा शोभमानः,
स्वामी श्रीवर्द्धमानः प्रदिशतु कुशलं सद्गुणैर्वर्द्धमानः ॥ ५

उपाध्यायश्री क्षमाकल्याणगणिविरचिता

# १६. ॥ चैत्यवन्दनचतुर्विंशतिका ॥

## १. श्री ऋषभजिनेन्द्र-चैत्यवन्दनम्

(शार्दूलविक्रीडित )

सद्भक्त्या नतमौलिनिर्जरवरभ्राजिष्णुमौलिप्रभा-
संमिश्राऽरुणदीप्तिशोभचरणाम्भोजद्वयः सर्वदा ।
सर्वज्ञः पुरुषोत्तमः सुचरितो धर्मार्थिनां प्राणिनां,
भूयाद् भूरिविभूतये मुनिपतिः श्रीनाभिसूनुर्जिनः ॥ १

सद्बोधोपचिताः सदैव दधता प्रौढप्रतापश्रियो,
येनाऽज्ञानतमोवितानमखिलं विक्षिप्तमन्तः क्षणम् ।
श्रीशत्रुञ्जयपूर्वशैलशिखरं भास्वानिवोद्भासयन्,
भव्याम्भोजहितः स एष जयतु श्रीमारुदेवप्रभुः ॥ २

यो विज्ञानमयो जगत्त्रयगुरुर्यं सर्वलोकाः श्रिताः,
सिद्धिर्येन वृता समस्तजनता यस्मै नतिं तन्वते ।
यस्मान्मोहमतिर्गता मतिभृतां यस्यैव सेव्यं वचो,
यस्मिन् विश्वगुणास्तमेव सुतरां वन्दे युगादीश्वरम् ॥ ३

## २. श्रीअजितनाथजिनेन्द्र-चैत्यवदनम्

(मालिनी)

सकलसुखसमृद्धिर्यस्य पादारविन्दे,
विलसति गुणरक्ता भक्तराजीव नित्यम् ।
त्रिभुवनजनमान्यः शान्तमुद्राऽभिरामः,
स जयति जिनराजस्तुङ्गतारङ्गतीर्थे ॥ १

प्रभवति किल भव्यो यस्य निर्वर्णनेन,
व्यपगतदुरितौघः प्राप्तमोदप्रपञ्चः ।
निजबलजितरागद्वेषविद्वेषिवर्गं,
तमजितवरगोत्रं तीर्थनाथं नमामि ॥ २

नरपतिजितशत्रोर्वंशरत्नाकरेन्दुः,
सुरपति–यतिमुख्यैर्भक्तिदक्षैः समर्च्यः ।
दिनपतिरिव लोकेऽपास्तमोहान्धकारो,
जिनपतिरजितेशः पातु मां पुण्यमूर्त्तिः ॥ ३

## ३. श्रीसम्भवनाथजिनेन्द्र–चैत्यवन्दनम्

(स्त्रग्धरा)

यद्भक्त्यासक्तचित्ताः प्रचुरतरभवभ्रान्तिमुक्ता मनुष्याः,
सञ्जाताः साधुभावोल्लसितनिजगुणान्वेषिणः सद्यः एव ।
स श्रीमान् सम्भवेशः प्रशमरसमयो विश्वविश्वोपकर्ता,
सद्भर्ता दिव्यदीप्तिः परमपदकृते सेव्यतां भव्यलोकाः ! ॥ १

शुक्लध्यानोदकेनोज्ज्वलमतिशयितस्वच्छभावाद्भुतेन,
स्वस्मादादृत्य वृत्तं शिवपदनिगमं कर्मपङ्कप्रपञ्चम् ।
नीरन्ध्रं दूरयित्वा प्रकृतिमुपगतो निर्विकल्पस्वरूपः,
सेव्यस्तार्क्ष्यध्वजोऽसौ जगति जिनपतिर्वीतरागः सदैव ॥ २

वार्धौ विद्योतिरत्नप्रकर इव परिभ्राजते सर्वकाले,
यस्मिन्निःशेषदोषव्यपगमविशदे श्रीजितारेस्तनूजे ।
दुष्प्रापो दुष्टसत्त्वैः स्फुटगुणनिकरः शुद्धबुद्धिक्षमादिः,
कल्याणश्रीनिवासः स भवति वदताऽभ्यर्चनीयो न केषाम् ?॥३

## ४. श्रीअभिनन्दनजिनेन्द्र-चैत्यवन्दनम्

(द्रुतविलम्बित)

विशदशारदसोमसमाननः, कमलकोमलचारुविलोचनः ।
शुचिगुणः सुतरामभिनन्दन !, जय सुनिर्मलताञ्चितभूघनः ॥१

जगति कान्तहरीश्वरलाञ्छित-क्रमसरोरुह ! भूरिकृपानिधे ! ।
मम समीहितसिद्धिविधायकं, त्वदपरं कमपीह न तर्कये ॥ २

प्रवरसंवर ! संवरभूपते - स्तनय ! नीतिविचक्षण ! ते पदम् ।
शरणमस्तु जिनेश ! निरन्तरं, रुचिरभक्तिसुयुक्तिभृतो मम ॥३

## ५. श्रीसुमतिनाथजिनेन्द्र-चैत्यवन्दनम्

(उपेन्द्रवज्रा)

सुवर्णवर्णो हरिणा सवर्णो, मनोवनं मे सुमतिर्बलीयान् ।
गतस्ततो दुष्टकुदृष्टिराग-द्विपेन्द्र ! नैव स्थितिरत्र कार्या ॥ १

जिनेश्वरो मेघनरेन्द्रसूनु-र्घनोपमो गर्जति मानसे मे ।
अहो गुरुद्वेषहुताशन ! त्वा-मसौ शमं नेष्यति सद्य एव ॥ २

इतः सुदूरं व्रज दुष्टबुद्धे!, समं दुरात्मीयपरिच्छदेन ।
सुबुद्धिभर्ता सुमतिर्जिनेशो, मनोरमः स्वान्तमितो मदीयम् ॥३

## ६. श्रीपद्मप्रभजिनेन्द्र-चैत्यवन्दनम्

(भुजङ्गप्रयात)

उदारप्रभामण्डलैर्भासमानः,
कृताऽत्यन्तदुर्दान्तदोषापमानः ।

सुसीमाङ्गज ! श्रीपतिर्देवदेवः,
सदा मे मुदाऽभ्यर्चनीयस्त्वमेव ॥ १

यदीयं मनः पङ्कजं नित्यमेव,
त्वयाऽलङ्कृतं ध्येयरूपेण देव !।
प्रधानस्वरूपं तमेवाऽतिपुण्यं,
जगन्नाथ ! जानामि लोके सुधन्यम् ॥ २

अतोऽधीश ! पद्मप्रभाऽऽनन्दधाम !
स्मरामि प्रकामं तवैवाङ्ग नाम ।
मनोवाञ्छितार्थप्रदं योगिगम्यं,
यथा चक्रवाको रवेर्धाम रन्यम् ॥ ३

## ७. श्रीसुपार्श्वनाथजिनेन्द्र-चैत्यवन्दनम्

(त्रोटक)

जयवन्तमनन्तगुणैर्निभृतं, पृथिवीसुतमद्भुतरूपभृतम् ।
निजवीर्यविनिर्जितकर्मबलं, सुरकोटिसमाश्रितपत्कमलम् ॥१

निरुपाधिकनिर्मलसौख्यनिधिं, परिवर्जितविश्वदुरन्तविधिम् ।
भववारिनिधेः परपारमितं, परमोज्ज्वलचेतनयोन्मिलितम् ॥२

कलधौतसुवर्णशरीरधरं, शुभपार्श्वसुपार्श्वजिनप्रवरम् ।
विनयाऽवनतः प्रणमामि सदा, हृदयोद्भवभूरितरप्रमुदा ॥ ३

## ८. श्रीचन्द्रप्रभजिनेन्द्र-चैत्यवन्दनम्

(वंशस्थ)

अनन्तकान्तिप्रकरेण चारुणा, कलाधिपेनाश्रितमात्मसाम्यतः ।
जिनेन्द्र ! चन्द्रप्रभ ! देवमुत्तमं, भवन्तमेवात्महितं विभावये ॥१

उदारचारित्रनिधे ! जगत्प्रभो !, तवाननाम्भोजविलोकनेन मे ।
व्यथा समस्ताऽस्तमितोदितं सुखं,
यथा तमिस्रा दिवमर्कतेजसा ॥ २

सदैव संसेवनतत्परे जने, भवन्ति सर्वेऽपि सुराः सुदृष्टयः ।
समग्रलोके समचित्तवृत्तिना, त्वयैव सञ्जातमतो नमोऽस्तु ते ॥३

## ९. श्रीसुविधिनाथजिनेन्द्र-चैत्यवन्दनम्

(वसन्ततिलका)

विश्वाभिवन्द्य ! मकराङ्कितपादपद्म !,
सुग्रीवजात ! जिनपुङ्गव ! शान्तिसद्म ! ।
भव्यात्मतारणपरोत्तमयानपात्र !,
मां तारयस्व भववारिनिधेर्विरूपात् ॥ १

निःशेषदोषविगमोद्भवमोक्षमार्गं,
भव्याः श्रयन्ति भवदाश्रयतो मुनीन्द्र ! ।
संसेवितः सुरमणिर्बहुधा जनानां,
किं नाम नो भवति कामितसिद्धिकारी ? ॥ २

विज्ञं कृपारसनिधिं सुविधे ! स्वयम्भू-
र्मत्वा भवन्तमिति विज्ञपयामि तावत् ।
देवाधिदेव ! तव दर्शनवल्लभोऽहं,
शश्वद् भवामि भुवनेश ! तथा विधेहि ॥ ३

## १०. श्रीशीतलनाथजिनेन्द्र-चैत्यवन्दनम्

(शार्दूलविक्रीडित)

कल्याणाङ्कुरवर्धने जलधरं सर्वाङ्गिसम्पत्करं,
विश्वव्यापियशः कलापकलितं कैवल्यलीलाश्रितम् ।
नन्दाकुक्षिसमुद्भवं दृढरथक्षोणीपतेर्नन्दनं,
श्रीमत्सूरतबन्दिरे जिनवरं वन्दे प्रभुं शीतलम् ॥ १

विश्वज्ञानविशुद्धसिद्धिपदवीहेतुप्रबोधं दधद्,
भव्यानां वरभक्तिरक्तमनसां चेतः समुल्लासयन् ।
नित्यानन्दमयः प्रसिद्धसमयः सद्भूतसौख्याश्रयो,
दुष्टाऽनिष्टतमः प्रणाशतरणिर्जीयाज्जिनः शीतलः ॥ २

सद्भक्त्या त्रिदशेश्वरैः कृतनुतिर्भास्वद्गुणालङ्कृतिः,
सत्कल्याणसमद्युतिः शुभमतिः कल्याणकृत्सङ्गतिः ।
श्रीवत्साङ्कसमन्वितस्त्रिभुवनत्राणे गृहीतव्रतो,
भूयाद् भक्तिभृतां सदेष्टवरदः श्रीशीतलस्तीर्थकृत् ॥ ३

## ११. श्रीश्रेयांसनाथजिनेन्द्र-चैत्यवन्दनम्

(हरिणी)

चिरपरिचिता गाढव्याप्ता सुबुद्धिपराङ्मुखी,
निजबलपरिस्फूर्त्योदग्रा समग्रतया मम ।
व्यपगतवती दूरं दुष्टा स्वनिष्ठकुदृष्टिता,
अपचितसहा सद्यो भूत्वा यदीयसुदृष्टितः ॥ १

निरुपमसुखश्रेणीहेतुर्निराकृतदुर्दशा,
शुचितरगुणग्रामावासो निसर्गमहोज्ज्वला ।

हृदयकमले प्रादुर्भूता सुतत्त्वरुचिर्मम,
विदलितभवभ्रान्तिर्यस्याऽप्यजस्रमनुस्मृतेः ॥ २

उपकृतिमतिर्दाने दक्षो निरस्तजगद्व्यथः,
समुचितकृतिर्विज्ञानांशुप्रकाशितसत्पथः ।
नृपगणगुरोर्विष्णोर्वंशे प्रभाकरसन्निभः,
स भवतु मम श्रेयांसेनः प्रबोधसमृद्धये ॥ ३

## १२. श्रीवासुपूज्यजिनेन्द्र-चैत्यवन्दनम्

(रथोद्धता)

पूर्णचन्द्रकमनीयदीधिति-भ्राजमानमुखमद्भुतश्रियम् ।
शान्तदृष्टिमभिरामचेष्टितं, शिष्टजन्तुपरिवेष्टितं परम् ॥ १

नष्टदुष्टमतिभिर्यमीश्वरं, संस्मरद्भिरिह भूरिभिर्नृभिः ।
क्षीणमोहसमयादनन्तरा, प्रापि सत्यपरमात्मरूपता ॥ २

पार्थिवेशवसुपूज्यवेश्मनि, प्राप्तपुण्यजनुषं जगत्प्रभुम् ।
वासुपूज्यपरमेष्ठिनं सदा, के स्मरन्ति न हि तं विपश्चितः ? ॥३

## १३. श्रीविमलनाथजिनेन्द्र-चैत्यवन्दनम्

(मन्दाक्रान्ता)

संसारेऽस्मिन् महति महिमाऽमेयमानन्दिरूपं,
त्वां सर्वज्ञं सकलसुकृतिश्रेणिसंसेव्यमानम् ।
दृष्ट्वा सम्यग्विमलसदसज्ज्ञानधाम प्रधानं,
सम्प्राप्तोऽहं प्रशमसुखदं सम्भृतानन्दवीचिम् ॥ १

ये तु स्वामिन् ! कुमतिपिहितस्फारसद्बोधमूढाः
सौम्याकारां प्रतिकृतिमपि प्रेक्ष्य ते विश्वपूज्याम् ।
द्वेषोद्भूतेः कलुषितमनोवृत्तयः स्युः प्रकामं,
मन्ये तेषां गतशुभदृशां का गतिर्भाविनीति ॥ २

श्यामासूनो ! प्रतिदिनमनुस्मृत्य विज्ञानिवाक्यं,
हित्वाऽनार्यं कुमतिवचनं ये भुवि प्राणभाजः ।
पूर्णानन्दोल्लसितहृदयास्त्वां समाराधयन्ति,
श्लाघ्याचाराः प्रकृतिसुभगाः सन्ति धन्यास्त एव ॥ ३

## १४. श्रीअनन्तनाथजिनेन्द्र-चैत्यवन्दनम्

(स्त्रग्विणी)

यस्य भव्यात्मनो दिव्यचेतोगृहे,
सर्वदाऽनन्तचिन्तामणिर्द्योतते ।
यान्ति दूरे स्वतस्तस्य दुष्टापदो,
विश्वविज्ञानवित्तं भवेदक्षयम् ॥ १

यस्तु सर्वज्ञरूपं स्वरूपस्थितं,
वीक्ष्य सद्भावतः सिंहसेनात्मजम् ।
अद्भुताऽऽमोदसन्दोहसम्पूरितो,
मन्यते धन्यमात्मीयनेत्रद्वयम् ॥ २

सोऽपवर्गानुगामिस्वभावोज्ज्वलां,
व्यूढमिथ्यात्वविद्रावणे तत्पराम् ।
बन्धुरात्मानुभूतिप्रकाशोद्यतां,
शुद्धसम्यक्त्वसम्पत्तिमालम्बते ॥ (युग्मम्) ३

## १५. श्रीधर्मनाथजिनेन्द्र-चैत्यवन्दनम्

(कामक्रीडा)

भास्वज्ज्ञानं शुद्धात्मानं धर्मेशानं सद्ध्यानं,
शक्त्या युक्तं दोषोन्मुक्तं तत्त्वासक्तं सद्भक्तम् ।
शश्वच्छान्तं कीर्त्या कान्तं ध्वस्तध्वान्तं विश्रामं,
क्षिप्तावेशं सत्यादेशं श्रीधर्मेशं वन्दध्वम् ॥ १

निःशेषार्थप्रादुष्कर्ता सिद्धेर्भर्ता सन्धर्ता,
दुर्भावानां दूरे हर्ता दीनोद्धर्ता संस्मर्ता ।
सद्भक्तेभ्यो मुक्तेर्दाता विश्वत्राता निर्माता,
स्तुत्यो भक्त्या वाचोयुक्त्या चेतोवृत्त्या ध्येयात्मा ॥ २

सम्यग्दृग्भिः साक्षाद् दृष्टो मोहाऽस्पृष्टो नाकृष्टः,
स्रोतोग्रामैः सम्पज्ज्येष्ठः साधुश्रेष्ठः सत्प्रेष्टः ।
श्रद्धायुक्तस्वान्तैर्जुष्टो नित्यं तुष्टो निर्दुष्ट-
स्त्याज्यो नैव श्रीवज्राङ्को नष्टातङ्को निःशङ्कम् ॥ ३

## १६. श्रीशान्तिनाथजिनेन्द्र - चैत्यवन्दनम्

(द्रुतबिलम्बित)

विपुलनिर्भरकीर्तिभरान्वितो,
जयति निर्जरनाथनमस्कृतः ।
लघुविनिर्जितमोहधराधिपो,
जगति यः प्रभुशान्तिजिनाधिपः ॥ १

विहितशान्तसुधारसमज्जनं,
निखिलदुर्जयदोषविवर्जितम् ।

परमपुण्यवतां भजनीयतां,
गतमनन्तगुणैः सहितं सताम् ॥ २

तमचिरात्मजमीशमधीश्वरं,
भविकपद्मविबोधदिनेश्वरम् ।
महिमधाम भजामि जगत्त्रये,
वरमनुत्तरसिद्धिसमृद्धये ॥ (त्रि.भि.) ३

## १७. श्रीकुन्थुनाथजिनेन्द्र-चैत्यवन्दनम्

(गीतपद्धति)

जय जय कुन्थुजिनोत्तम ! सत्तमतत्त्वनिधान !,
धर्मिजनोज्ज्वलमानसमानसहंससमान ! ।
ज्ञानाच्छादकमुख्यमहोद्धतकर्मविमुक्त !,
विषमविषयपरिभोगविरक्त ! शुभाशययुक्त ! ॥ १

जय जय विश्वजनीन ! मुनिव्रजमान्य ! विशुद्ध-
चेतन ! चारुचरित्रपवित्रितलोक ! विबुद्ध ! ।
निरुपममेरुमहीधरधीर ! निरन्तरमेव,
गर्वविवर्जित ! सर्वसुपर्वविनिर्मितसेव ! ॥ २

जय जय सूरनरेश्वरनन्दन ! चन्दनकल्प !,
जिनेश ! विश्वविभावविनाशक ! वीतविकल्प ! ।
निर्मलकेवलबोधविलोकितलोकालोक !,
प्रादुर्भूतमहोदयनिर्वृति ! नित्यविशोक ! ॥ ३

## १८. श्रीअरनाथजिनेन्द्र - चैत्यवन्दनम्

(रामगिरिरागेण गीयते)

दिव्यगुणधारकं भव्यजनतारकं,
दुरितमतिवारकं सुकृतिकान्तम् ।
जितविषमसायकं सर्वसुखदायकं,
जगति जिननायकं परमशान्तम् ॥ १

स्वगुणपर्यायसम्मीलितं नौमि तं,
विगतपरभावपरिणतिमखण्डम् ।
सर्वसंयोगविस्तारपारङ्गतं,
प्राप्तपरमात्मरूपं प्रचण्डम् ॥ २

साधुदर्शनवृतं भाविकैः प्रस्तुतं,
प्रातिहार्याष्टकोद्भासमानम् ।
सततमुक्तिप्रदं सर्वदा पूजितं,
शिवमहीसार्वभौमप्रधानम् ॥ (त्रि.भि.) ३

## १९. श्रीमल्लिनाथजिनेन्द्र-चैत्यवन्दनम्

(गीतनी चाल)

कुम्भसमुद्भव ! संमदाकर ! गुणवर ! ।
हे मल्लिजिनोत्तमदेव ! जय जय विश्वपते ! ॥ १

कृत्याकृत्यविवेकिता जिन ! समुचिता ।
हे त्वयि जागर्ति जिनेश !, जय जय विश्वपते ! ॥ २

नित्यानन्दप्रकाशिका भ्रमनाशिका ।
हे तव शुभदृष्टिरनीश ! जय जय विश्वपते ॥ ३

शुद्धिनिबन्धसन्निधे ! सद्गुणनिधे ।
हे वर्जितसर्वविकार !, जय जय विश्वपते ! ॥ ४

निजनिरुपाधिकसम्पदा शोभित ! सदा ।
हे निर्मलधर्मधुरीण !, जय जय विश्वपते ! ॥ ५

## २०. श्रीमुनिसुव्रतजिनेन्द्र - चैत्यवन्दनम्

(अन्यगेयपद्धति-रागः)

उत्तमचेतन ! धर्मसमृद्ध ! जगत्पते !,
नित्याऽनित्यपदार्थनिचयविलसन्मते ! ।
निजविक्रमजितमोहमहोद्भटभूपते !,
श्रीपद्मातनुजात ! सुजातहरिद्द्युते ! ॥ १

श्रीमुनिसुव्रत ! सुव्रतदेशक ! सज्जनाः,
कृतसद्गुरुशुभवाक्यसुधारसमज्जनाः ।
ये प्रणमन्ति भवन्तमनन्तसुखाश्रितं,
केवलमुज्ज्वलभावमखण्डमनिन्दितम् ॥ २

ते निःसंशयमेव जगत्त्रयवन्दिताः,
सद्भावेन भवन्ति सुदृष्ट्यानन्दिताः ।
कृत्यं स्वोचितमेव यतः किल कारणं,
जनयति नात्मविरुद्धमिहाऽसाधारणम् ॥ (त्रि.भि.) ३

## २१. श्रीनमिनाथजिनेन्द्र-चैत्यवन्दनम्

(पञ्चचामर)

नमीश ! निर्मलात्मरूप ! सत्यरूप ! शाश्वतं,
परोर्ध्वसिद्धिसौधमूर्ध्नि सत्स्वभावतः स्थितम् ।

विधाय मानसाब्जकोशदेशमध्यवर्तिनं,
स्मरामि सर्वदा भवन्तमेव सर्वदर्शिनम् ॥ १

प्रफुल्लक्रौञ्चलाञ्छन ! प्रभूततेजसोऽद्य ते,
दिवाकरस्य वा महेश्वराऽभिदर्शनेन मे ।
प्रमादवर्धिनी सुदुर्मतिर्निशेव दुर्भगा,
गता प्रणाशमाशु हृत्कजे विनिद्रताऽभवत् ॥ २

निरस्तदोषदुष्टकष्टकार्यमर्त्यसंस्तवो,
भवे भवे भवत्पदाम्बुजैकसेवकः प्रभो ! ।
भवेयमीदृशं भृशं मदीयचित्तचिन्तितं,
तव प्रसादतो भवत्ववन्ध्यमेव सत्वरम् ॥ ३

## २२. श्रीनेमिनाथजिनेन्द्र-चैत्यवन्दनम्

(उपजाति)

विशुद्धविज्ञानभृतां वरेण, शिवात्मजेन प्रशमाकरेण ।
येन प्रयासेन विनैव कामं, विजित्य विक्रान्तनरं प्रकामम् ॥१

विहाय राज्यं चपलस्वभावं, राजीमतीं राजकुमारिकां च ।
गत्वा सलीलं गिरिनारशैलं, भेजे व्रतं केवलमुक्तियुक्तम् ॥२

निःशेषयोगीश्वरमौलिरत्नं, जितेन्द्रियत्वे विहितप्रयत्नम् ।
तमुत्तमानन्दनिधानमेकं,
नमामि नेमिं विलसद्विवेकम् ॥ (त्रि.भि.) ३

## २३. श्रीपार्श्वनाथजिनेन्द्र-चैत्यवन्दनम्

(पञ्चचामर)

श्रयामि तं जिनं सदा मुदा प्रमादवर्जितं,
स्वकीयवाग्विलासतो जितोरुमेघगर्जितम् ।
जगत्प्रकामकामितप्रदानदक्षमक्षतं,
पदं दधानमुच्चकैरकैतवोपलक्षितम् ॥ १

सतामवद्यभेदकं प्रभूतसम्पदां पदं,
वलक्षपक्षसङ्गतं जनेक्षणक्षणप्रदम् ।
सदैव यस्य दर्शनं विशां विमर्दितैनसां,
निहन्त्यशातजातमात्मभक्तिरक्तचेतसाम् ॥ २

अवाप्य यत्प्रसादमादितः पुरुश्रियो नरा,
भवन्ति मुक्तिगामिनस्ततः प्रभाप्रभास्वराः ।
भजेयमाश्वसेनिदेवदेवमेव सत्पदं,
तमुच्चमानसेन शुद्धबोधवृद्धिलाभदम् ॥ ३

## २४. श्रीमहावीरजिनेन्द्र-चैत्यवन्दनम्

(पृथ्वी)

वरेण्यगुणवारिधिः परमनिर्वृतः सर्वदा,
समस्तकमलानिधिः सुरनरेन्द्रकोटिश्रितः ।
जनालिसुखदायको विगतकर्मवारो जिनः,
सुमुक्तजनसङ्गमस्त्वमसि वद्र्धमानप्रभो ! ॥ १

जिनेन्द्र ! भवतोऽद्भुतं मुखमुदारबिम्बस्थितं,
विकारपरिवर्जितं परमशान्तमुद्राङ्कितम् ।
निरीक्ष्य मुदितेक्षणः क्षणमितोऽस्मि यद्भावनां,
जिनेश ! जगदीश्वरोद्भवतु सैव मे सर्वदा ॥ २

विवेकिजनवल्लभं भुवि दुरात्मनां दुर्लभं,
दुरन्तदुरितव्यथाभरनिवारणे तत्परम् ।
तवाङ्घ्रिपदपद्मयोर्युगमनिन्द्यवीरप्रभो !,
प्रभूतसुखसिद्धये मम चिराय सम्पद्यताम् ॥ ३

पू. मु.श्री मुक्तिविमलगणीविरचिता

# १७. ॥ चैत्यवन्दनचतुर्विंशतिका ॥

## १. श्रीआदीश्वरजिनचैत्यवन्दनम्

(वसन्ततिलका)

कल्याणपेशलसमूहवरेण्यवल्ली-
सन्दोहसिञ्चनसुनीरदनीरपूरः ।
सज्ज्ञानभास्करविभासितविश्वविश्वो
दद्याच्छ्रियं शुभवतां जिननाभिसूनुः ॥ १

भावारिवारणनिवारणदारुणोरु-
सारङ्गराजमघघातकिघातकश्च ।
सौभाग्यभाग्यभरवैभवशोभिताङ्गो
दद्याच्छ्रियं शुभवतां वरमारुदेवः ॥ २

सिद्धाचलावनिधरोत्तममौलिभाग-
चूडामणिः प्रथमभूपतिराजराजः ।
श्रीयुक्तमुक्तिविमलायनसार्थवाहो
दद्याच्छ्रियं शुभवतां भवतां वृषाङ्कः ॥ ३

## २. श्रीअजितनाथजिनचैत्यवन्दनम्

(उपजाति)

संसारकान्तारविहारवारि-वचःप्रकारी गुणरत्नधारी ।
आनन्दसन्दोहपुलाकिकन्दो ददातु सौख्यं जितशत्रुसूनुः ॥ १

सद्वृत्तमुक्ताफलवारवारि-वरो वरेण्यो वरविश्ववारे ।
आत्मीयभासा जितबालहेलिर्ददातु सौख्यं जितशत्रुपुत्रः ॥ २

क्षमाकरः क्षेमकरः क्षमोऽक्ष-विपक्षपक्षक्षणनैकदक्षः ।
श्रीयुक्तमुक्तिप्रवरप्रियेशो ददातु सौख्यं जितशत्रुपुत्रः ॥ ३

## ३. श्रीसम्भवनाथजिनचैत्यवन्दनम्

(इन्द्रवज्रा)

देवेन्द्रनागेन्द्रनरेन्द्रवृन्दै-रासेवनीयोऽभयदानदाता ।
सन्तप्तभूरिच्छविभासमानः श्रीसम्भवेशोऽवतु वो भवाब्धेः ॥१

स्वीयोग्ररंहोजितसप्तसप्ति-सप्तीशसत्सप्तिकलङ्किताङ्गः ।
सेनाभवो भव्यजितारिसूनुः श्रीसम्भवेशोऽवतु वो भवाब्धेः ॥२

अज्ञानसन्तानमहान्धकार-गाढव्रजोच्छेदनतीव्रकान्तिः ।
वित्तेजसा भिन्नतमःसमूहः श्रीसम्भवेशोऽवतु वो भवाब्धेः ॥३

## ४. श्रीअभिनन्दनजिनचैत्यवन्दनम्

(उपेन्द्रवज्रा)

पुरोगशाखामृगलांच्छिताङ्गो सुवर्णवर्णः प्रथिताग्रवर्णः ।
सुसंवरोर्वीधववंशसोमो भुवि प्रजीयादभिनन्दनेशः ॥ १

अपारसंसारमहाकूपीट-धवाग्रपोतोपमतां दधानः ।
सुसौम्यशाम्योदयराजमानो भृशं प्रजीयादभिनन्दनेशः ॥ २

दयावरेण्यव्रततीततीद्ध-पयोधरो धैर्यधरेषु धुर्यः ।
सुमुक्तिकान्ताहृदि वर्यहारो भृंश प्रजीयादभिनन्दनेशः ॥ ३

## ५. श्रीसुमतिनाथजिनचैत्यवन्दनम्

(द्रुतविलम्बित)

कपटपेटकपाटनपाटवं भवभरोद्भवभीतिविभेदकम् ।
प्रवरमेघमहीपतिदेहजं सुसुमतिं सुमतिं प्रणमाम्यहम् ॥ १

अघवितानभिदं किल मङ्गला-सुजननीजठराकरहीरकम् ।
सुरसुराधिपपूजितसत्पदं सुसुमतिं सुमतिं प्रणमाम्यहम् ॥ २

भविमनोजलजन्मविभाकरं प्रबलमन्मथदावविभाकरम् ।
भ्रमणवारणवारणकेतनं सुसुमतिं सुमतिं प्रणमाम्यहम् ॥ ३

## ६. श्रीपद्मप्रभजिनचैत्यवन्दनम्

(भुजङ्गप्रयात)

कलानां निधिः शेवधिः सद्‌गुणानां
घृणानां कधिः सन्निधिर्भव्यकानाम् ।
गतोपाधिराधिव्रजोच्छेदवैद्यो
जिनेन्द्रो हि पद्मप्रभः सम्प्रजीयात् ॥ १

निजज्योतिषा धिक्कृताग्रप्रवालो
भविव्रातताम्राक्षराशौ रसालः ।
स्ववाणीरसैः शामिताशेषतापः
सुपद्मप्रभः सम्प्रजीयाज्जगत्याम् ॥ २

सुमुक्तिप्रियाऽकुण्ठकण्ठाग्रहारः
पयोजाङ्कितः सन्दितावारमारः ।
धरोर्वीधवाग्रान्वयाकाशसूरो
जगत्यां प्रजीयात् सुपद्मप्रभेशः ॥ ३

## ७. श्रीसुपार्श्वनाथजिनचैत्यवन्दनम्

(शिखरिणी)

सुवर्णाभं पापप्रकरमकरावासवडवं
भवीशानां नाथं सुरपतिनुतं स्वस्तिककलम् ।
गणाधीशैः सेव्यं यतिततिपतिं पीतसुरसं
सुपार्श्वेशं वन्दे भवभयमिदं सन्ततमहम् ॥ १

सुकारुण्याम्भोजव्रजविकसनाशीतकिरणं
प्रतिष्ठोर्वीनाथान्वयकधिसमुल्लासनहरिम् ।
खगश्चक्राख्यश्चोदयशिखरिणीव द्युतिपतिं
सुपार्श्वेशं वन्दे भवभयभिदं सन्ततमहम् ॥ २

सुपृथ्वीसत्कुक्षिप्रियमणिखनीलामणिशमं
भवाम्भोधेः पारङ्गतमकगणोच्छेदनपरम् ।
सुमुक्तिप्राणेशाहृदयसदने हारमनघं
सुपार्श्वेशं वन्दे भवभयभिदं सन्ततमहम् ॥ ३

## ८. श्रीचन्द्रप्रभस्वामिचैत्यवन्दनम्

(सौभाग्यविमल)

स्वीयसुरुच्या जितसितचन्द्रश्चन्द्रकलङ्को भविगदचन्द्रः ।
चन्द्रपुरीशः शमघनचन्द्रो नन्दति चन्द्रप्रभमुनिचन्द्रः ॥ १

सत्तमगोत्रः सुरधृतगोत्रो भावुकगोत्रः शमजितगोत्रः ।
उत्तमगोत्रः प्रगदितगोत्रो नन्दति चन्द्रप्रभमुनिचन्द्रः ॥ २

भव्यचकोरप्रकरनिशेशः सुन्दरसौभाग्यविमलकेशः ।
मुक्तिशुमार्गे वरतुरगेशो नन्दति चन्द्रप्रभमुनिचन्द्रः ॥ ३

## ९. श्रीसुविधिनाथजिनचैत्यवन्दनम्

(मणिगुणनिकर)

विमलकमलभवमुखकलिततनुर्विशदविशदशुचिजितशरदुडुपः।
प्रवरसुगुणजितमणिगुणनिकरः
प्रजयति जगति सुविधिजिनरमणः ॥ १

भविजनसमवननयिजगतिपतिर्गणपतिगणवनवरवसतिपतिः ।
भ्रमभरतिमिरविशरसुशुचिपति-
र्मनुजततिमवति सुविधिजिनपतिः ॥ २

घनरसजसदृशवरकरकमलो वरतरनरभरशिखरिसुकमलम् ।
दितबहुलतरकलुषततिरमलः
सुविधिरवतु गुणगणनिधिरनिशम् ॥ ३

## १०. श्रीशीतलनाथजिनचैत्यवन्दनम्

(प्रमाणिका)

सुजातरूपदीधितिं जिनाभ्रचण्डदीधितिम् ।
भवाधितापनाशनं नमामि शीतलाधिपम् ॥ १

मनुष्यदेवतागणैः सुराधिपैः प्रपूजितम् ।
अनन्तसौख्यदायिनं स्तुवे सुशीतलाधिपम् ॥ २

सुमुक्तिकामिनीधवं भविप्रजाधराधवम् ।
गणेशसेवितक्रमं सुशीतलाप्तकं स्तुवे ॥ ३

## ११. श्रीश्रेयांसनाथजिनचैत्यवन्दनम्

(स्रग्धरा)

भ्राजिष्णुर्मोक्षलक्ष्म्याः प्रचुरतमतमः कानने वीतिहोत्रो
गोत्रः श्रीविष्णुसञ्ज्ञक्षितिपतिजनने विष्णुसंसेविताङ्घ्रिः ।
देवार्च्यः खड्गिलक्ष्मा कनकशुचिरुचिर्भावशौचप्रदाता
श्रीमच्छ्रेयांसनाथः क्षपयतु निखिलं क्षय्यपक्षं जिताक्षः ॥ १

विभ्राजद्भूघनाभाभिभवितपटुभाभानुभारप्रचारः
प्रत्यक्षो भव्यभाजां भवभवभयभिद्विष्णुमातुस्तनूजः ।
जिष्णुर्बाढं लटाम्भःखरकरकिरणः शुद्धधर्मोपदेशी
श्रेयः श्रेयांसनाथो दिशतु शिवभृतां भूरिगाम्भीर्यभाजाम् ॥ २

आनन्दव्रातपाथोरुहहरिणगरुत् शुद्धसिद्धान्तवादी
निःशेषक्षोणिनाथप्रविकटमुकुटो गच्छनाथैः प्रपूज्यः ।
मुक्तिप्राणप्रियेशः समसुहृदहितः सार्वसम्पत्तियुक्तः
श्रेयः श्रेयांसनाथो वितरतु तरसा प्राणभ्राजामदभ्रम् ॥ ३

## १२. श्रीवासुपूज्यजिनचैत्यवन्दनम्

(अनुष्टुप्)

विमलकेवलालोका-ऽऽलोकिताऽखिललोकक ! ।
रक्ष रक्ष पतन्तं मां वासुपूज्य ! भवावटे ॥ १

त्वमेव कामधेनुर्मे त्वमेव कल्पपादपः ।
ततः कल्मषदारिद्र्या-द्रक्ष रक्ष जगत्पते ! ॥ २

ये त्वां नमन्ति सद्भव्या मुक्तिपदं प्रयान्ति ते ।
ममापि तत्पदं देहि वासुपूज्य ! जगत्प्रभो ! ॥ ३

## १३. श्रीविमलनाथजिनचैत्यवन्दनम्

(दयाविमल)

विशदशरदुषाधवधवलयशो-
धवलितहरिदङ्गणमकहरणम् ।
जिनकथितदयाविमलसुनिलयं
मनसिजजयिनं भज विमलजिनम् ॥ १

सुरसुरपतिभिर्नरनरपतिभि-
र्नुतपदयमलं शिवहरिकमलम् ।
छितदुरितवनं किरकलितघनं
भविजनमहितं भज विमलजिनम् ॥ २

कनककमनगोजितनवकिरणं
गणभृदभिनुतं जिनगणसहितम् ।
शिवगतिवनितोत्तमपतिममलं
शशधरवदनं भज विमलजिनम् ॥ ३

## १४. श्रीअनन्तनाथजिनचैत्यवन्दनम्

(इन्द्रवंशा)

श्रीसिंहसेनावनिनाथदारकं कल्याणसन्तानवितानकारकम् ।
श्येनाङ्किताङ्गं सुयशावपुर्भवं वन्दे सदाहं सदनन्तनायकम् ॥१

पुण्यर्द्धिशत्रुञ्जयशैलभूधवं भव्यप्रजापालनशुद्धभूधवम् ।
स्वीयर्द्धिविस्मापितसर्वविष्टपं वन्दे सदाहं सदनन्तनायकम् ॥२

जाड्यौघजम्बालनिरासनामृतं दुष्कर्महालाहलनाशनामृतम् ।
मुक्तिप्रदं सत्तमकोशलेश्वरं वन्दे सदाहं सदनन्तनायकम् ॥ ३

## १५. श्रीधर्मनाथजिनचैत्यवन्दनम्

(कामक्रीडा)

श्रेयःपाथोनाथोल्लासे भौतीरत्नं सज्ज्ञानं
भव्यागारं भव्याधारं संसिद्धार्थं सर्वज्ञम् ।
भानुक्षोणीभृत्सन्तानाकाशे सद्भासां नाथं
पापव्रातानां छेत्तारं श्रीधर्मेशं वन्देऽहम् ॥ १

गाङ्गेयाभं शुद्धात्मानं भावारीणां जेतारं
व्याधामाङ्कं दीप्यत्कामक्रीडालीलाभेत्तारम् ।
लेखस्तोमैर्लेखाधीशैर्मर्त्याधीशैः संसेव्यं
विश्वाकूतानां ज्ञातारं श्रीधर्मेशं वन्देऽहम् ॥ २

अज्ञानौघध्वान्तध्वंसे प्रेष्ठज्योतिः सेक्तारं
सौभाग्याक्तं रत्नद्रङ्गेद्रङ्गेशं सत्पातारम् ।
सिद्धान्तानां सङ्कर्त्तारं मुक्तिप्रेष्ठाभर्त्तारं
विद्वन्मौलौ चूडारत्नं श्रीधर्मेशं वन्देऽहम् ॥ ३

## १६. श्रीशान्तिनाथजिनचैत्यवन्दनम्

(मालिनी)

कमनकनकपादं गर्जिताम्भोदनादं
कमलकलितपादं भ्रान्त्यगे पिण्डपादम् ।
समयहरिपयोदं भव्यगेहं यशोदं
भज भविकधिजादं शान्तिनाथं सुपादम् ॥ १

प्रदितदुरितभारं खण्डितावारमारं
भविजनसुखकारं प्राप्तसंसारपारम् ।

कुमतिजगतिसीरं शल्यधूलीसमीरं
गणधरतरुनीरं शान्तिनाथं स्तुवेऽरम् ॥ २

गजपुरनगरेशं धीरतायां धरेशं
भवतिमिरदिनेशं लोकतारानिशेशम् ।
प्रवरशमधनेशं मुक्तिकान्ताहृदीशं
भज शमतटिनीशं शान्तिनाथं जिनेशम् ॥ ३

## १७. श्रीकुन्थुनाथजिनचैत्यवन्दनम्

(स्वागता)

सूरभूमिधववंशवरेण्य-पुष्कराङ्गणनभोमणितुल्यः ।
भव्यकाङ्क्षितसुपूरणकल्पः कुन्थुनाथजिनपो भुवि जीयात् ॥१

तप्तहाटकविभो गणधारः छागलाञ्छितशरीर उदारः ।
हस्तिपत्तनविभुर्दिततान्तः कुन्थुनाथजिनपो भुवि जीयात् ॥ २

ज्ञानरत्नजलधिः किल सुश्री-कुक्षिशुक्तिवरमौक्तिकतुल्यः ।
देवराजपरिपूजितपादः कुन्थुनाथजिनपो भुवि जीयात् ॥ ३

## १८. श्रीअरनाथजिनचैत्यवन्दनम्

(कुसुमविचित्रा)

जिनपतिचैत्ये कुसुमविचित्रा द्युतिजितदेवीमहितचरित्रा ।
अरजिनमूर्त्तिर्जयति पवित्रा शिवसुखदात्री सकलभवित्रा ॥ १

यतिततिनव्या भविजनसेव्या सुरवरभव्या त्रिजगति भव्या ।
अरजिनमूर्त्तिः कृतसुखपूर्त्ति-श्चिरमवताद्वः प्रकलिततत्त्वा ॥ २

सुभगविधात्री सुपथनयित्री भवभयभेत्री त्रिभुवनजैत्री ।
अरजिनमूर्त्तिर्विहितखदान्तिः विमलसुमुक्तिः कृतभविशान्तिः॥

## १९. श्रीमल्लिनाथजिनचैत्यवन्दनम्

(वंशस्थ)

विशालवंशस्थमशेषभावुक-प्रसारवल्लीवनसारणीसमम् ।
भवाधितापव्यपरोपणक्षमं क्षमं क्षमीशं भज मल्लिपारगम् ॥ १

अजातजालं सकलाजगज्जग-ज्जगज्जनानन्दकरं निरन्तरम् ।
महामहीमण्डलमण्डनं जिनं सुमल्लिनाथं भज कुम्भलाञ्छनम् ॥

यशोविनिर्द्धूततमीशमण्डलं प्रतापसन्तर्जितहेलिमण्डलम् ।
सुभाग्यभाग्योदयसंविधानकं सुमुक्तिनाथं भज मल्लितीर्थपम् ॥३

## २०. श्रीमुनिसुव्रतस्वामिजिनचैत्यवन्दनम्

(तोटक)

भवकोटिसमर्जितसम्प्रसरद्-व्रजिनव्रजतामसतीव्रकरम् ।
सुकरं परितोऽटककीर्त्तिभरं मुनिसुव्रततीर्थपतिं भज भोः ॥ १

करुणावरुणाम्बुधिमङ्गिमनः-कदलीदलिर्वादमुदारधनम् ।
निजकान्तितिरस्कृतसाम्बुघनं मुनिसुव्रततीर्थपतिं भज भोः ॥२

सुभगान्वितदेहमकप्रमयं वरकच्छपलाञ्छितसंहननम् ।
शुभमुक्तिमहासृतिहारिहरिं मुनिसुव्रततीर्थपतिं भज भोः ॥ ३

## २१. श्रीनमिनाथजिनचैत्यवन्दनम्

(हरिणी)

भविजनमनःपाथोजौघप्रकाशनपुष्कर-
तिलकममराधीशव्रातप्रपूजितपद्युगम् ।
विबुधहरिणीनेत्रानेत्रोत्करैरजितं सदा
नमिजिनपतिं वन्दे नित्यं गणाब्धिनिशामणिम् ॥ १

सकलविकलप्राणिस्तोमप्रजेतृमनोभव-
तपनतपनातापाक्रान्तप्रपन्नजगद्घनम् ।
नरककुगतिव्यूह-क्षीरप्रशोषनभोमणिं
नमिजिनपतिं वन्दे नित्यं गणाब्धिनिशामणिम् ॥ २

विजयनरराट्पत्नीवप्राप्रसूजठराम्बर
विलसदमलज्योतिःस्फातिप्रयुक्तमीश्वरम् ।
वरगणधरप्राग्भारेण प्रसेवितपत्कजं
नमिजिनपतिं वन्दे नित्यं सुवाग्जितसत्कजम् ॥ ३

## २२. श्रीनेमिनाथजिनचैतन्यवन्दनम्

(विद्युन्माला)

श्रेयःपाथोधौ सारङ्गं विद्वत्कोकौघे सारङ्गम् ।
एनोरूक्षे सत्सारङ्गं वन्दे नेमिं सत्सारङ्गम् ॥ १

हिंसाधूल्यौघे सारङ्गं कन्दर्पोच्छेदे सारङ्गम् ।
रागद्विड्वल्लीसारङ्गं वन्दे नेमिं सत्सारङ्गम् ॥ २

दम्भव्रातेभे सारङ्गं दुष्कर्म्मैधःसत्सारङ्गम् ।
मुक्तिश्रेष्ठश्रीसारङ्गं वन्दे नेमिं सत्सारङ्गम् ॥ ३

## २३. श्रीपार्श्वनाथजिनचैत्यनवन्दम्

(शार्दूलविक्रीडित)

स्वच्छातुच्छनिजाङ्गसच्छविजितच्छायेशमच्छच्छविं
छिन्नच्छिद्रमतुच्छकेवलमघच्छद्मच्छटाछेदकम् ।
प्रोच्छिन्नारिमनच्छकृच्छ्रभिदमुच्छिन्नप्रवादिच्छलं
श्रीपार्श्वं परमेश्वरं भजत भो नित्यं श्रियामास्पदम् ॥ १

माद्यन्मोहमहान्धकारनिकरप्रध्वंसहंसोपमं
भव्यत्वाञ्चितभव्यभव्यभिमतप्राग्भारस्वर्भूरुहम् ।
नैर्मल्यालयमग्रलोककलितं कल्याणमालालयं
श्रीपार्श्वेशमनङ्गवेगरहितं वन्दे सदा सौख्यदम् ॥ २

सौभाग्यौघविलासलालिततनुं पुण्याम्बुजाभ्रध्वजं
श्रीपार्श्वार्चितमग्रमुक्तिविमलश्रेष्ठाध्वसार्थेश्वरम् ।
श्रीपार्श्वं भज शुद्धसिद्धिमहिलाभालस्थलालङ्कृतिं
दुर्वादिव्रजकुञ्जरोत्कर भिदाशार्दूलविक्रीडितम् ॥ ३

## २४. श्रीमहावीरस्वामीजिनचैत्यवन्दनम्

(पञ्चचामर)

सुमङ्गलालिबन्धुरं भवाधितापकन्धरं
सुबुद्धिवार्द्धिचन्दिरं कुबुद्धिवल्लिचन्दिरम् ।
स्वपार्श्वयोर्द्वयोर्वरं लसत्प्रपञ्चचामरं
सुवीरवीरमीश्वरं नमाम्यहं जिनेश्वरम् ॥ १

सुभव्यसत्त्वसन्निधिं जिनोक्ततत्त्वशेवधिं
मदामयोत्करौषधिं शमत्वरत्ननीरधिम् ।

विधूतसर्वदूषणं जगत्त्रयप्रभूषणं
सुवीरनायकं मुदा नमामि मन्दिरं मुदाम् ॥ २

स्फुरत्प्रबोधबोधिताखिलप्रबोध्यबन्धुरं
शुभप्रभावभासितप्रभूतभूतभावितम् ।
स्वकीयवाणिसद्विलाससञ्जिताब्दगर्जितं
सुवीरनाथमच्युताग्रजव्रजार्चितं स्तुवे ॥ ३

## २५. प्रशस्तिर्लिख्यते

(शार्दूलविक्रीडित)

आनन्दाद्विमलास्तपागणवरे जाताः सुसूरीश्वराः
तच्छिष्याः कृतिनः सुऋद्धिविमला ज्ञानादिरत्नाकराः ।
स्फुर्जत्कीर्त्तिसुकीर्त्तिकीर्त्तिविमलास्तेषां विनेयाः पुनः
तेषां धीरसुवीरवीरविमला जाताः सुशीलालयाः ॥ १

तेषां शिष्यवरा विशुद्धविमलास्तेषां विशुद्धाशयाः
सौदर्याः सुमहोदयादिविमला मोक्षस्य मार्गाध्वगाः ।
तेषां शिष्यधवाः प्रमोदविमलाः सर्वप्रमोदप्रदाः
तेषां सन्मणयो मणीविमलजित्सञ्ज्ञाः सुशिष्याधिपाः ॥ २

उद्योताद्विमलाः प्रखण्डितमला उद्योतदीप्ताः पुन-
स्तेषां ज्ञानसुदानिदानविमलाः शिष्या निदानं श्रियाम् ।
पन्न्यासाः सुदया दयादिविमलास्तेषां विनेया नयाः
सौभाग्याद्विमलाः सुभाग्यभरभृद्देहा मुदामालयाः ॥ ३

तच्छिष्येण सुमुक्तिमुक्तिविमलाख्येनर्षिणा सद्गुणा
पन्न्यासाख्यपदान्वितेन मयका स्तोत्रावली चार्हताम् ।

क्लृप्तेयं गुरुपुण्यतो लघुचतुर्विंशत्यभिख्या मुदा
प्रारम्भो विहितः सुराजनगरे तत्रैव पूर्णीकृता ॥ ४

संवद्व्योमतुरङ्गनन्दवसुधामाने (१९७०) शुभे चाश्विने
मासे पञ्चदशे विधूज्ज्वलदिने सूर्याह्ववारे वरे ।
स्तोत्राली विहिता शुभा शुभवतां संवाच्यमाना सदा
यावच्चन्द्रदिवाकरौ विजयतां तावत्सतां हर्षदा ॥ ५

इति श्रीनिस्सीमसौम्यतासदनवदनप्रभाप्राग्भारपराभूतपीयूष-पादसुविहितसभासार्वभौमसमानश्रीमत्पंन्यासदयाविमलगणि-निर्मलसरस्वतीमण्डलमण्डितसकलपण्डितसमाजपयोजविका-शनाम्भोजपाणिसन्निभमुख्यशिष्यश्रीमत्पन्न्याससौभाग्यविमलगणि-पादारविन्दचञ्चरीकायमाणविनेयपंन्यासमुक्तिविमलगणिप्रचिता लघुचैत्यवन्दनचतुर्विंशतिका सम्पूर्णा ॥

❃

# परिशिष्ट

## સ્તોત્રસંદેશમાલાના ૨૦ ભાગમાં આવેલા છંદોની યાદી

अचलधृति
अतिधृति
अतिशर्करी
अतिशायिनी
अतिरुचिरा
अनङ्गशेखर
अनुष्टुप्
अपरनाराचक
अपरललितक
अपरवक्र
अपराजिता
अपरान्तिका
अभिमुखी
अवितथ
अशोकपुष्पमञ्जरी
अष्टि
असम्बाधा
आख्यानकी
आपातलिका
आर्या

आर्यागीति
आलिंगनक

इन्द्रवंशा
इन्द्रवज्रा

उज्जवल
उत्कलिका
उदयम्
उद्गता
उद्धत
उपचित्रा
उपजाति
उपेन्द्रवज्रा
उर्वशी

ऋषभ
ऋषभगजविलसित

एकावली
औपच्छन्दसका-परान्तिका
औपच्छन्दसिक

कन्या
कामक्रीडा
कामबाण
किसलयमाला
कुटज
कुटील
कुसुमलता
कुसुमविचित्रा
कुसुमितलता
कुसुमितलतावेल्लिता
केकीरव
केसर
क्रीडनक

क्षिप्तक

खिज्जित

गाहा
गीतपद्धति
गीति
गुणमणिनीकर

चन्दनप्रकृति
चन्द्रवर्त्म
चन्द्रलेखा
चन्द्रिणी
चपलम्
चम्पकमाला
चलधृति
चलम्
चित्रमाला
चित्रलेखा
चित्राक्षरा
चूडामणि

छाया

जगती
जया

जयानन्द
जलधरमाला
जलोद्धतगति

तामरस
तोटक
त्रिभङ्गी

दण्डक
(अर्णवदण्डक
उद्दामदण्डक
गगनदण्डक
चण्डवृष्टिदण्डक
प्रयातदण्डक
महादण्डक
सुरामदण्डक)
दयाविमल
दीपक
दोधक
दोहा
द्रुतविलम्बित

द्विपदी

धृति

नगस्वरूपिणी
नन्दितक
नन्दिनी
नर्कुटक
नवमालिनी
नाराचक
नारी
निशा

पङ्क्ति
पञ्चकावली
पञ्चचामर
पत्रपतितं
पथ्या
पथ्यावक्त्र
पद्म
पद्धतिका
पादाकुलक

पुष्पदाम
पुष्पिताग्रा
पृथ्वी
प्रकृति
प्रमिताक्षरा
प्रभावती
प्रबोधिता
प्रमाणिका
प्रमुदितवदना
प्रियंवदा
प्रहरणकलिका
प्रहर्षिणी

बृहती

भद्रक
भद्रिका
भाराक्रान्ता
भासुरक
भुजगशशभृता
भुजङ्गपरिरिङ्गितक
भुजङ्गविजृम्भित
भुजङ्गप्रयात

भ्रमरविलसिता

मञ्जुभाषिणी
मणिगुणनिकर
मणिमध्य
मत्तक्रीडा
मत्तमयुर
मत्ता
मत्तेभविक्रीडित
मदनावतार
मदिरा
मधुनामा
मधुमती
मन्दाक्रान्ता
ममातिशायिनी
महास्रग्धरा
मागधिका
माणवक
मालभारिणी
मालाचित्र
मालिनी
मुखमोटनक
मेघमाला

मेघविस्फूर्जिता
मोटनक
मौक्तिकदाम
मौक्तिकमाला
मृगचपला
मृगी
मृदका
मृदङ्गक

युगलम्
युग्मविपुला

रत्नमाला
रथोद्धता
रमणा
रासकनन्दितक
रासकलुब्धक
रुक्मवती
रुचिता
रुचिरा

लक्ष्मी
ललितक

ललिता

वंशपत्रप्रतितं
वंशस्थ
वक्त्र
वनमञ्जरी
वसन्तचामर
वसन्ततिलका
वस्तु
वस्तुवदन
वाणिनी
वानवासिका
विद्युद्विलसित
विद्युन्माला
विभावरी
विभ्रमगति
वियोगनी
विषम
वेगवती
वेष्टक
वैतालीय
वैश्वदेवी
वृन्दारक

श्री
श्लोको
शङ्ख
शरभललित
शर्करी
शशिलेखा
शशिवदना
शशीकला
शार्दूलविक्रीडित
शालिनी
शिखरिणी
शुद्धविराट्
शोभा
श्येनी

संगतक
सान्द्रपदं
सिंहोद्धता
सिद्धि
सुदन्त

सुधा
सुधाकळश
सुन्दरम्
सुप्रभा
सुभद्रामालिनी
सुमति
सुमुख
सुवदना
सोपानक
सोमराजी
सौभाग्यविमल
स्रग्धरा
स्रग्विणी
स्त्री
स्वागता

हंसमाला
हंसलयं
हंसी
हक्काषट्पदी
हरिगीत
हरिणी

## અરિહંત પરમાત્માના સ્તોત્રપાઠનું મહત્વ શું ?

અનાદિ કાળથી આપણા આત્માએ અજ્ઞાનતાદિના કારણે જે જે પ્રવૃત્તિઓ મન-વચન-કાયાથી કરી તેના કારણે આત્માના અસંખ્ય પ્રદેશ પર આઠ કર્મોની અનંતી અનંતી કાર્મણવર્ગણા અડ્ડો જમાવીને બેઠી છે જેના કારણે જીવ દુઃખપૂર્વક સંસારમાં ભટકી રહ્યો છે. દુઃખી થઈ રહ્યો છે. આત્માની પરેશાનીનું મૂળ કર્મ બંધ છે. એવું ગુરુગમથી જાણ્યું, અનુભવ્યું. હવે ભવમુક્ત, દુઃખમુક્ત, કર્મમુક્ત થવાનો ઉપાય શું ? રત્નત્રયીની આરાધના તેમાં જ્ઞાન અને ચારિત્રને સમ્યગ્ બનાવનાર સમ્યગ્દર્શન છે. જેની પ્રાપ્તિ દર્શન મોહનીયાદિ સ્વરૂપ પ્રધાનકર્મના ક્ષય આદિથી થાય અને તે અરિહંત પરમાત્માની સ્તોત્ર ભક્તિ દ્વારા થાય છે.

પ્રતિક્રમણ હેતુપ્રકાશ ગ્રંથમાં પ્રશ્ન છે. 'લોગસ્સ'નો કાઉસ્સગ્ગ વારંવાર કેમ ? તેના ઉત્તરમાં જણાવ્યું.

**अरिहंतपरमात्मस्मरण-प्रधानकर्मक्षयकारणत्वात्** – અરિહન્ત પરમાત્માનું સ્મરણ પ્રધાન કર્મક્ષયનું કારણ છે. તેથી પૂર્વના મહાપુરુષોએ પોતાના હૈયામાં પ્રભુ પ્રત્યે જાગેલા બહુમાનભાવના કારણે હૃદયમાં પ્રગટેલી સ્ફુરણાઓને અક્ષર દેહ આપી પોતાના આત્માને કર્મમુક્ત બનાવવાનો પુરુષાર્થ કર્યો છે. તો આપણે પણ તેઓની કૃતિના આલંબને આપણા આત્મામાં સમ્યગ્દર્શન પ્રાપ્ત કરી જ્ઞાનપૂર્વકના ચારિત્ર દ્વારા કર્મક્ષય સાધી આત્માને ભવમુક્ત, દુઃખમુક્ત, કર્મમુક્ત બનાવવા દ્વારા આત્માનું સામ્રાજ્ય પ્રાપ્ત કરીએ.

# શાસ્ત્રસંદેશનું નવલું નજરાણું
# "પદ્યાનુક્રમણિકા સંપુટ"

- આ સંપુટમાં ચાર ભાગ છે.
- પ્રથમ ભાગમાં આગમના ૪૪ ગ્રંથો અને સંવેગરંગશાલાની પદ્યાનુક્રમણિકા છે.
- દ્વિતીય ભાગમાં પ્રાકૃતના ૩૭૩ ગ્રંથોની પદ્યાનુક્રમણિકા છે.
- તૃતીય ભાગમાં સંસ્કૃતના ૨૦૫ ગ્રંથો અને લોકપ્રકાશની પદ્યાનુક્રમણિકા છે.
- ચતુર્થભાગમાં ત્રિષષ્ટિશલાકાપુરુષચરિત્ર અને વૈરાગ્યકલ્પલતા-રતિની પદ્યાનુક્રમણિકા છે.
- આ સંપુટમાં છ પરિશિષ્ટો છે.
- આ સંપુટમાં ટોટલ ૬૨૬ ગ્રંથોનો સમાવેશ કરેલ છે.
- આ સંપુટમાં ટોટલ ૧,૭૭,૦૦૦ શ્લોકનો સમાવેશ કરેલ છે.
- આ સંપુટના ટોટલ ૧૫૭૦ પેજ છે.
- આ સંપુટની કિંમત ૧૮૦૦/-રૂપિયા છે.

# स्तोत्रसंदेशमाला

१ अर्हदादिसहस्रनामसमुच्चयः
२ अनेककर्तृकृतचतुर्विंशतय
३ बहुकर्तृकृतानेकस्तोत्रसमुच्चयः
४ श्रीपञ्चजिनेश्वर गणधराणां स्तोत्राणि
५ कल्याणक–छायापूर्तिस्तोत्राणि
६ चतुर्विंशतिजिनस्तोत्राणि
७ श्रीआदिनाथजिनस्तोत्राणि
८ श्रीनेमिनाथजिनस्तोत्राणि
९ श्रीपार्श्वनाथजिनस्तोत्राणि –१
१० श्रीपार्श्वनाथजिनस्तोत्राणि –२
११ श्रीपार्श्वनाथजिनस्तोत्राणि –३
१२ श्रीमहावीरस्वामिजिनस्तोत्राणि
१३ शेषतीर्थंकरजिनस्तोत्राणि
१४ सामान्यजिनस्तोत्राणि
१५ पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि
१६ शाश्वताशाश्वततीर्थानां स्तोत्राणि
१७ सम्यग्दृष्टिदेव–देवीनां स्तोत्राणि
१८ पू.आचार्यादियोग्यमन्त्रस्तोत्राणि
१९ स्तुतयः १
२० स्तुतयः २